महाभारत ; भीष्मपर्व ; श्रीधर
शिवसहाय द्वारा मंगलवार, कृष्ण
पक्ष, माघ मास, १८ ई० वि० लिपित
१८६ पत्रक॥ लं० ४० १३ पं० ग्रन्थ

ह० लं०

223

223

स्वस्तिश्रीगणेशायनमः ॐनमोभगवतेवासुदेवाय नारायणंनमस्कृत्यनरंचैवनरोत्तमं देवींसरस्वतींव्यासंततोजय
भीष्म. मुदीरयेत् जनमेजयउवाच कथंयुयुधिरेवीराः कुरुपांडवसोमकाः पार्थिवाश्चमहाभागानानादेशसमागताः वै
१ शंपायनउवाच यथायुयुधिरेवीराःकुरुपांडवसोमकाः कुरुक्षेत्रेतपःक्षेत्रेशृणुतत्पृथिवीपते अवतीर्यकुरुक्षेत्रं
पांडवाःसहसोमकैः कौरवानभ्यवर्त्तंतजिगीषंतोमहाबलाः वेदाध्ययनसंपन्नासर्वेयुद्धाभिनंदिनः आशंसंतो
जयंयुद्धेवधंचाभि[illegible]मुखारणे क्षेत्रस्यपूर्वभागेतुस्थिताप्रत्यङ्मुखायुधि अभियायदुराधर्षांधार्त्तराष्ट्र
स्यवाहिनी प्रत्यङ्मुखाःपश्चिमेभागेन्यवसंतिससैनिकाः समंतपंचकाद्बाह्येशिविराणिसहस्रशः कारयामास
विधिवत्कुंतीपुत्रोयुधिष्ठिरः शून्येवपृथिवीसर्वाहद्धबालावशेषिता निरश्वपुरुषेवासीद्रथकुंजरवर्ज्जिता
यावत्तपतिसूर्योहिजंबूद्वीपस्यमंडले तावदेवसमावृत्तंबलंपार्थिवसत्तम एकस्थाःसर्ववर्णास्तेमंडलंबहुयोज
नं पर्यक्रामंतदेशांश्चनदीशैलान्वनानिच तेषांयुधिष्ठिरोराजासर्वेषांपुरुषर्षभ आदिदेशसवाह्यानांभक्ष्य
भोज्यमनंतकं संज्ञाःसुविविधास्तास्तास्तेषांचक्रेयुधिष्ठिरः एवंवादिवेदितव्यःपांडवेयोहमित्युत अभिज्ञाना
निसर्वेषांसंज्ञाश्चाभाषणानिच योजयामासकौरव्योयुद्धकालउपस्थिते दृष्ट्वाध्वजाग्रंपार्थानांयुद्धकालेसुयोधि
राम नः सहसर्वैर्महीपालैःप्रत्यव्यूहतपांडवान् पांडुरेणातपत्रेणध्रियमाणेनमूर्द्धनि मध्येनागसहस्रस्यभ्रातृ
१ भिःपरिवारितः दृष्ट्वादुर्योधनंहृष्टाःसर्वेपांडवसैनिकाः सर्वेदध्मुर्महाशंखान्भेरीजघ्नुःसहस्रशः ततःप्रहृष्टा

भिधावंति विशाशवो दंडपाणयः उपरुंधंति कृत्वा च नगराण्ययुयुत्सवः अन्योन्यमभितिष्टंति नगराण्ययुयुत्स
वः पद्मोत्पलानि वृक्षेषु जायंते कुमुदानि च विष्वग्वाताश्च वांत्युग्रा रजो नाप्युपशाम्यति अभीक्ष्णं कंपते भूमिरर्करा हु
रूपेति च श्वेतो ग्रहस्तथा चित्रां समतिक्रम्य तिष्टति अभावं हि विशेषेण कुरूणां तत्र पश्यति धूमकेतुर्महाघोरः
पुष्यं चाक्रम्य तिष्टति अनयोरश्विवं घोरं करिष्यति महाग्रहः शुक्रः प्रोष्ठपदे समारुह्य विरोचते उत्तरे तु परिक्र
म्य सहितः प्रभुदीक्षिते श्वेतो ग्रहः प्रज्वलितः सधूम इव पावकः ऐंद्रं तेजस्विनं क्षत्रं ज्येष्ठामाक्रम्य तिष्टति बुधः प्रज्वलि
तो घोरमपसव्यं प्रवर्तते चित्रां स्वात्यंतरे चैवाधिष्ठितः परुषो ग्रहः वक्रानुवक्रं कृत्वा च श्रवणे पावकः प्रभुः ब्रह्मराशिं
समाक्रम्य लोहितांगो व्यवस्थितः सर्वसस्यप्रतिच्छन्ना पृथिवी फलमालिनी पंचशीर्षा यवाश्चैव शतशीर्षाश्च शालयः
प्रधानाः सर्वलोकस्य यस्यायत्तमिदं जगत् ता गावः प्रस्नुता वत्सैः शोणितं प्रक्षरंत्युत निश्चेरुरपिधानेभ्यः खड्गाः प्रज्वलि
ता भृशं व्यक्तं पश्यंति शस्त्राणि संग्रामं समुपस्थितं अग्निवर्णा यथा भासः शस्त्राणामुदकस्य च कवचानां ध्वजानां
च भविष्यति महाक्षयः पृथ्वी शोणितावर्ता ध्वजोडुपसमाकुला कुरूणां वैशसे राजन् पांडवैः सह भारत
दिक्षु प्रज्वलितास्वास्या व्याहरंति मृगद्विजाः अत्याहितं दर्शयंतो वेदयंति महद्भयं एकपक्षाक्षिचरणः
शकुनिः खचरो निशि रौद्रं वदति संरब्धः शोणितं छर्दयन्मुहुः ग्रहौ ताम्रारुणशिखौ प्रज्वलंतौ व्यवस्थितौ स
प्तर्षीणामुदाराणां समवच्छाद्य वै प्रभां संवत्सर प्रहत्या च ग्रहौ प्रज्वलितावुभौ विशाखायाः समीपस्थौ बृह
स्पतिशनैश्चरौ कृत्तिकासु ग्रहस्तीव्रो नक्षत्रे प्रथमे ज्वलन् वपूंष्यपहरन्भासा धूमकेतुरिव स्थितः त्रिषु पू

वैषु सर्वेषु नक्षत्रेषु विशांपते बुधः संपतते भीरुणां जनयन्सु महद्भयं चतुर्द्दशीं पंचदशीं भूतपूर्वां च षोडशीं इमां तु नाभि १
भीष्म. जाने ह्यमावास्यां चतुर्द्दशीं चंद्रसूर्यावुभौ ग्रस्तावेकमासे त्रयोदशीं अपर्वणि ग्रहावेतौ प्रजाः संक्षययिष्य
४ तः रजोवृत्ता दिशः सर्वाः पांशुवर्षाः समंततः उत्पातमेघा रौद्राश्च रात्रौ वर्षंति शोणितं मांसवर्षं पुनस्तीव्रमासी
त्कस्म चतुर्द्दशीं अर्द्धरात्रे महाघोरमतृप्यंस्तत्र राक्षसाः प्रतिस्रोतोवहंत्यश्च सरतः शोणितोदकाः फेणायमा
णाः कूपाश्च नर्द्दंति वृषभा इव पतंत्युल्काः सनिर्वाताः शुष्काशनि विमिश्रिताः अद्य चैव निशां व्युष्टामुदये भानु
राहतः ज्वलंतीभिर्महोल्काभिश्चतुर्भिः सर्वतो दिशं आदित्य उपतिष्ठद्भिस्तत्र चोक्तं महर्षिभिः भूमिपालस
हस्राणां भूमिः पास्यति शोणितं कैलासमंदराभ्यां च तथा हिमवतो गिरेः सहस्रशो महान्शब्दः शिखरा
णि पतंति च महंति भूमिकंपश्च चत्वारः सागराः पृथक् वेलामुद्वर्त्तयंति स्म क्षोभयंतः पुनः पुनः वृक्षानु
न्मथ्य वांत्युग्रा वाताः शर्करकर्षिणः पतंति चैत्यवृक्षाश्च ग्रामेषु नगरेषु च पीतलोहितनीलश्च ज्वलत्यग्नि
र्हुतो द्विजैः वामार्चिः शावगंधी च धूमप्रायः खरः स्वनः स्पर्शा गंधा रसाश्चैव विपरीता महीपते धूमायंते
ध्वजा राज्ञां कंपमाना मुहुर्मुहुः मुंचंत्यंगारवर्षाणि भेर्योऽथ पटहास्तथा प्रसादशिखराग्रेषु पुरद्वारेषु राम
चोपरि गृध्राः परिपतंत्युग्रा वाममंडलमाश्रिताः पक्कापक्केति सुभृशं वाश्यंते वयांसि च निलीयंते ध्व ४
जाग्रेषु क्षयाय पृथिवीक्षितां ध्यायंतः प्रकिरंतश्च वाला वेपथुसंयुताः रुदंति दीनास्तुरगा मातंगाश्च

सहस्रशः एतच्छ्रुत्वा भवान अप्राप्तकालं व्यवस्यतु यथा लोकाः समुत्सादं नापगच्छंति भारत वैशंपायन उवाच
पितुर्वचो निशम्यैतत धृतराष्ट्रोऽब्रवीदिदं दिष्टमेतत्पुरा मन्ये भविष्यति न संशयः क्षत्रियाः क्षत्रधर्मेण वध्यंते य
दि संयुगे वीरलोकं समासाद्य सुखं प्राप्स्यंति केवलं इति श्रीमहाभारते भीष्मपर्वणि निमित्तकथनं नाम
वैशंपायन उवाच एवमुक्तो मुनिस्तत्त्वं कवीन्द्रो राजसत्तम पुत्रेण धृतराष्ट्रेण ध्यानमन्वगमत्तदा पुनरेवाब्रवीद्वाक्यं कल्पवा
दी महातपाः असंशयं पार्थिवेंद्र कालः संक्षिपते जगत् सृजते च पुनर्लोकान्निह विद्यते शाश्वतं ज्ञातीनां च कुरूणां च संबं
धिसुहृदां तथा धर्म्यं देशय पंथानं समर्थो ह्यसि वारणे क्षुद्रं ज्ञातिवधं प्राहुः मा कुरुष्व ममाप्रियं कालोयं पुत्ररूपेण तव जातो
विशांपते न वधः पूज्यते वेदे हितं नैतत्कथंचन हन्यात्स सर्वयो हन्यात्कुलधर्मं स्विकां तनुं कालेनोत्पथमायाति शक्ते सति
यथा पथ्यि कुलस्यास्य विनाशाय तथैव च महीक्षितां यशो धर्मं च कीर्तिं च पालय स्वर्गमाप्स्यसि लभतां पांडवो राज्यं
ससंगच्छंतु कोरवाः एवं ब्रुवति विप्रेंद्रे धृतराष्ट्रोंबिकासुतः आक्षिप्य वाक्यं वाक्यज्ञो वाक्यपथेनान्वयुंजत धृतराष्ट्र उवाच
यथा भवान्वेत्ति तथास्मि वेत्ता भावाभावौ विदितो मे यथावत् स्वार्थे हि संमुह्यति सर्वलोको मां चापि लोकैः सममेव विद्धि
प्रसादये त्वामतुलप्रभावं त्वं नो गतिर्दर्शयिता च धीरः न चापि ते वशगा मे महर्षे न कल्मषं कर्तुमिहार्हसे मां त्वं हि धर्मः पवि ६३
त्रं यशः कीर्तिर्धृतिः -- कुरूणां पांडवानां च मान्यश्चापि पितामहः व्यास उवाच वैचित्रवीर्य नृपते यत्ते मनसि वर्तते
ऽभिधत्स्व यथाकामं छेत्तास्मि तव संशयं धृतराष्ट्र उवाच यानि लिंगानि सर्वाणि भगवन्विजयिष्यतां तानि सर्वाणि

भीष्म ५

भगवन्स्त्रोतुमिच्छामि तत्त्वतः ॥ व्यास उवाच ॥ प्रसन्नभाः पावक ऊर्द्ध्वरश्मिः प्रदक्षिणावर्त्तशिखो विधूमः पुण्यो गंधश्चा
हुतीनां प्रवाति जयस्यैतद्भाविनो रूपमाहुः ॥ दृष्टावाच पृष्ठतो वायसानां संप्रस्थितानां च गमिष्यतां च ये पृष्ठतस्ते त्वरयं
ति राजन् ये त्वग्रतस्ते प्रतिषेधयंति ॥ कल्याणवाचः शकुना राजहंसाः शुकाः क्रौंचाः शतपत्राश्च यत्र प्रदक्षिणाश्चैव भवं
ति संख्ये ध्रुवं जयं तत्र वदंति विप्राः ॥ अलंकारैः कटकैः केतुभिश्च सुखप्रसादैर्हयवर्णैश्च राजन् भ्राजिष्मती
दुःप्रतिप्रेक्षणीया येषां चमूस्ते भिभवंति शत्रून् ॥ हृष्टा वाचस्तथा सत्त्वं योधानां यत्र भारत न म्लायंते स्रजश्चै
व ते जयंति रणे रिपून् ॥ इष्टो वामः प्रविष्टस्य दक्षिणः प्रविविक्षतः पश्चात्संसाधयत्यर्थं पुरस्तात्प्रतिषेधति
शब्दरूपरसस्पर्शा गंधाश्चाविनताः शुभाः सदा योधाः प्रहृष्टाश्च येषां तेषां जयो ध्रुवः ॥ अन्वेनं वायवो यांति त
था भ्राणि वयांसि च अनुप्लवंति मेघाश्च तथैवेन्द्रधनूंषि च ॥ एतानि जयमानानां लक्षणानि विशांपते भवंति वि
परीतानि मुमूर्षाणां जनाधिप ॥ अल्पायां वा महत्यां वा सेनायामिति निश्चितं ॥ हर्षो योधगणस्यैकं जयलक्षण
मुच्यते ॥ एको दीर्णो दारयति सेनां सुमहतीमपि तां दीर्णामनुदीर्यंते योधाः शूरतमा अपि ॥ दुर्निवारतमा चैव
प्रभग्ना महती चमूः ॥ संहत्य महतीं सेनां चतुरंगां महीपतिः उपायपूर्वं मेधावी यतेत सततोत्थितः ॥ उपायवि
जयं श्रेष्ठमाहुर्भेदेन मध्यमं जघन्य एष विजयो यो युद्धेन विशांपते ॥ महादोषः सन्निपातस्ततोऽव्ययः स
उच्यते ॥ परस्परज्ञाः संहृष्टाः व्यवधृताः सुनिश्चिताः पंचाशदपि ते शूराः मर्दंति महतीं चमूं ॥ दृष्ट्वा सुपर्णोपचि

राम ५

तांमहतीमपिभारत नवाद्गुल्येनसेनायाजयोभवतिनिश्चितं
जयनोह्यपिसंग्रामेजयवंतोभवंत्युत इतिमहाभारतेभीष्मपर्वणि वैशंपायनउवाच एवमुक्त्वाययौ
व्यासोधृतराष्ट्रायधीमते धृतराष्ट्रोपितच्छ्रुत्वाध्यानमेवान्वपद्यत समुहूर्तमिवध्यात्वाविनिःमुहुर्मुहुः श्वस्य२
संजयंसंशितात्मानमपृच्छद्भरतर्षभ संजयैतेमहीपालाः शूरायुद्धाभिनंदिनः अन्योन्यमभिनिघ्नंति
शस्त्रैरुच्चावचैरपि पार्थिवाःपृथिवीहेतोःसमभितःघ्नंतिभूमिपाः येःसर्वतःसमाव्याप्ताःसमस्ताजगतीं हि
यं भौममैश्वर्यमिच्छंतोनमृष्यंतोपरस्परं मन्येबहुगुणाभूमिस्तन्ममाचक्ष्वसंजय बहुवर्णि

सर्वाण्येवपरिमेयानि न चैषां रूपमैश्वरं तत्रतत्रेह दृश्यंते धातवः पंचभौतिकाः तेषां मनुष्यास्तर्केण प्रमाणानिप्रच
क्षते अचिंत्याः खलु ये भावा नं तांस्तर्केण साधयेत् प्रकृतिभ्यः परं यच्च तदचिंत्यस्य लक्षणं सुदर्शनं प्रवक्ष्यामि
द्वीपं ते कुरुनंदन परिमंडलो महाराज द्वीपोसौ चक्रसंस्थितः नदीजालपरिच्छन्नः पर्वतैश्चापि संवृतः पुरैश्च वि
विधाकारै रम्यैर्जनपदैस्तथा वृक्षैः पुष्पफलोपेतैः संपन्नो धनधान्यवान् लवणेन समुद्रेण समंतात्परिवेष्टितः
यथा च पुरुषः पश्येद्दर्शे वपुरात्मनः एवं सुदर्शनो द्वीपो दृश्यते चंद्रमंडले द्विरंशे पिप्पलस्तत्र द्विरंशे च शशो
महान् सर्वौषधिसमावापः सर्वतः परिसंवृतः आपस्ततोन्या विज्ञेया एष संक्षेप उच्यते इति श्री महाभारते
भीष्मपर्वणि द्वीपकथने धृतराष्ट्र उवाच उक्तो द्वीपस्य संक्षेपो विस्तरं ब्रूहि संजय यावद्भूम्यवकाशोयं दृश्य
ते यस्तु लक्षणे तस्याः प्रमाणं प्रब्रूहि ततो वृक्ष्यसि पिप्पलं वैशंपायनः एवमुक्तः स राज्ञा तु संजयो वाक्यम
ब्रवीत् प्रागायता महाराज षडेते रत्नपर्वताः अवगाढा ह्युभयतः समुद्रौ पूर्वपश्चिमौ हिमवान्हेमकूट
श्च निषधश्च नगोत्तमः नीलश्च वैडूर्यमयः श्वेतश्च रजतप्रभः सर्वधातुपिनद्धश्च शृंगवान्नाम पर्वतः एते वै
पर्वता राजन् सिद्धचारणसेविताः तेषामंतरविष्कंभो योजनानि सहस्रशः तत्र पुण्या जनपदास्तानि वर्षाणि
भारत वसंति तेषु सत्वानि नानाजातानि सर्वशः इदं तु भारतं वर्षं ततो हैमवतं परं हेमकूटात्परं चैव हरिवर्षं प्र
चक्षते दक्षिणेन तु नीलस्य निषधस्योत्तरेण तु प्रागायतो महाराज माल्यवान्नाम पर्वतः ततः माल्यव
परं

भीष्म. ७ तः पर्वतोगंधमादनः परिमंडलस्तयोर्मध्ये मेरुः कनकपर्वतः आदित्यतरुणाभासोविधूमइव पावकः यो
जनानांसहस्राणिषोडशाधः किलस्मृतः उच्छ्रश्चतुराशीतियोजनानांमहीपते अतऊर्द्धंचतिर्यक्चलो
कानावृत्यतिष्ठति तस्यपार्श्वेष्विमेद्वीपाश्चत्वारः संस्थिताः प्रभो भद्राश्वः केतुमालश्चजंबूद्वीपश्चभारत
उत्तराश्चैवकुरवः कृतपुण्यप्रतिश्रयाः विहंगः सुमुखोयत्रसुपर्णस्यात्मजः स्मृतः सवैविचिंतयामाससौव
र्णान्वीक्ष्यवायसान् मेरुरुत्तममध्यानामधमांचपक्षिणां अविशेषकरोयस्मात्तस्मादेनंत्यजाम्यहं तमादि
त्योनुपर्येतिसततंज्योतिषांपतिः चंद्रमाश्चसनक्षत्रोवायुश्चैवप्रदक्षिणं सपर्वतोमहाराजदिव्यपुष्प
फलान्वितः भवनैरावृतः सर्वैर्जांबूनदमयैः शुभैः तत्रदेवगणाराजन्गंधर्वोरगराक्षसाः अप्सरोगणसंयु
ताः शैलेक्रीडंतिनित्यदा तत्रब्रह्माचरुद्रश्चशक्रश्चापिसुरेश्वरः समेत्यविविधैर्यज्ञैर्यजंतेनेकदक्षिणैः
तुंबुरुर्नारदश्चैवविश्वावसुर्हहाहुहूः अभिगम्यामरश्रेष्ठंस्तवैःस्तुवंतिनित्यशः सप्तर्षयोमहात्मानः
कश्यपश्चप्रजापतिः तत्रगच्छंतिभद्रंतेसदापर्वणिपर्वणि तस्यैवमूर्द्धन्युशनाकाव्योदैत्यैर्महीपते तस्य
हीमानिरत्नानितस्येमेरत्नपर्वताः तस्मात्कुबेरोभगवांश्चतुर्थंभागमश्नुते ततः कलांसवित्तस्यमनुष्येभ्यः राम ७
प्रयच्छति पार्श्वेतस्योत्तरेदिव्यंसर्वर्तुकुसुमंशिवं कर्णिकारवनंदिव्यंलताजालसमुद्गतं तत्रसाक्षात्पशु

प्तैर्दिव्यैर्भूतैः समावृतः उमासहायोभगवान्रमतेभूतभावनः कर्णिकारमयींमालांविभुःपादावलंविनीं
त्रिभिर्नेत्रैः कृतोद्योतस्त्रिभिःसूर्यैरिवोदितैः तमुग्रतपसःसिद्धाःसुव्रताःधर्मवादिनः पश्यंतिनहिदुर्वृत्ताः
शक्योद्रष्टुंमहेश्वरं तस्यशैलस्यशिखरात्क्षीरधारानरेश्वर त्रिंशद्बाहुपरिग्राह्याभीमनिर्घातनिस्वना पु
ण्यपुण्यतमैर्जुष्टागंगाभागीरथीशुभा पतत्यजस्रंवेगेनह्रदेचंद्रमसप्रभो तयाह्युत्पादितःपुण्यःसह्र
दःसागरोपमः तांधारयामासपुरादुर्धरांपर्वतैरपि शतंवर्षसहस्राणांशिरसावैमहेश्वरः मेरोस्तुपश्चिमे
पार्श्वेकेतुमालोमहीपते जंबूखंडश्चतत्रैवसुमहान्नंदनोपमः आयुर्दशसहस्राणिवर्षाणांतत्रभारत सु
वर्णवर्णाश्चनराःस्त्रियश्चाप्सरसोपमाः अनामयावीतशोकानित्यंमुदितमानसाः जायंतेमानवास्तत्रनि
ष्टप्तकनकप्रभाः गंधमादनशृंगेषुकुवेरःसहराक्षसैः संवृतोप्सरसांसंघैर्मोदतेगुह्यकाधिपः गंधमाद
नपादेषुपरमेष्वपरगंडिकाः एकादशसहस्राणिवर्षाणांपरमायुषः तत्रकृष्णानराराजंस्तेजोयुक्तामहाब
लाः स्त्रियश्चोत्पलवर्णाभाःसर्वाःसुप्रियदर्शिनाः नीलात्परतरंश्वेतंश्वेताद्धैरण्यकंपरं वर्षमैरावतंनाम
ततःशृंगवतःपरं धनुःस्थितेमहाराजद्वेवर्षेदक्षिणोत्तरे इलावृतंमध्यमंतुपंचवर्षाणिचैवहि उत्त
रोत्तरमेतेभ्योवर्षमुद्रिच्यतेगुणैः आयुःप्रमाणमारोग्यंधर्मतःकामतोर्थतः समन्वितानिभूतानि
तेषुवर्षेषुभारत एवमेषामहाराजपर्वतैःपृथिवीचिता हेमकूटस्तुसुमहान्कैलासोनामपर्वतः

भीष्म०
८

यत्र वैश्रवणो राजा गुह्यकैः सह मोदते अस्योत्तरेण कैलासं मैनाकं पर्वतं प्रति सुवर्णशृंगः सुमहान्दिव्यो मणि-
मयो गिरिः तस्य पार्श्वे महद्दिव्यं शुभ्रं कांचनवालुकं रम्यं बिंदुसरो नाम यत्र राजा भगीरथः दृष्ट्वा भागीरथीं गंगा
मुवास बहुलाः समाः यूपा मणिमयास्तत्र चैत्याश्चापि हिरण्मयाः तत्रेष्ट्वा च गतः सिद्धिं सहस्राक्षो महायशाः सृष्टा भूत
पतिर्यत्र सर्वलोकान् सनातनान् उपास्यते तिग्मतेजा वृतो भूतैः समागतैः नरनारायणौ ब्रह्मा भवः स्थाणुः प्रजाप
तिः तत्र त्रिपथगा देवी प्रथमं तु प्रतिष्ठिता ब्रह्मलोकादवक्रांता सप्तधा प्रतिपद्यते विश्वौकसारा नलिनी
पावना च सरस्वती जंबूनदी च सीता च गंगा सिंधुश्च सप्तमी अचिंत्या दिव्यसंकल्पा प्रभोरेवैष संभवः उपासते
यत्र सत्रं यत्र सा युगपर्यये दृश्या दृश्या च भवति तत्र तत्र सरस्वती एता दिव्याः सप्त गंगास्त्रिषु लोकेषु विश्रु
ताः रक्षांसि वै हिमवति हेमकूटे तु गुह्यकाः सर्पा नागाश्च निषधे गोकर्णे च तपोधनाः देवासुराणां चाक्रीडः
श्वेतः पर्वत उच्यते गंधर्वा निषधे शैले नीले ब्रह्मर्षयो नृप शृंगवांस्तु महाराज पितॄणां प्रतिसंचरः इत्येता
नि महाराज सप्त वर्षाणि भागशः भूतान्युपनिविष्टानि गतिमंति ध्रुवाणि च तेषामृद्धिर्बहुविधा दृश्यते देवमा
नुषी अशक्या परिसंख्यातुं श्रद्धेया तु बुभूषता यां तु पृच्छसि मां राजन्दिव्यामेतां शशाकृतिं पार्श्वे शशा
स्य द्वे वर्षे उभये दक्षिणोत्तरे कर्णौ तु नागद्वीपं च कश्यपद्वीपमेव च ताम्रवर्णः शिरो राजन् श्रीमान्मलय
पर्वतः एतद्द्वितीयं द्वीपस्य दृश्यते शशसंस्थितं इति श्रीमहाभारते भीष्मपर्वणि भुवनकोशे धृतराष्ट्र-

राम
८

मेरोरथोत्तरं पार्श्वं तन्ममाचक्ष्व संजय निखिलेन महाबुद्धे माल्यवंतं पर्वतं संजय उवाच दक्षिणेन तु नीलस्य मे
रोः पार्श्वे तथोत्तरे उत्तराः कुरवो राजन् पुण्याः सिद्धनिषेविताः तत्र वृक्षा मधुफला नित्यपुष्पफलोपगाः पुष्पाणि
च सुगंधीनि रसवंति फलानि च सर्वकामफलास्तत्र केचिद्वृक्षा जनाधिप अपरे क्षीरिणो नाम वृक्षास्तत्र नरा
धिप ये क्षरंति सदा क्षीरं षड्रसं ह्यमृतोपमं वस्त्राणि च प्रसूयंते फलेष्वाभरणानि च सर्वा मणिमयी भूमिः सू
क्ष्मकांचनवालुका सर्वर्त्तुसुखसंस्पर्शा निष्पंका जनाधिप देवलोकाच्युताः सर्वे जायंते तत्र मानवाः तुल्यरू
पगुणोपेताः समेषु विषमेषु च मिथुनानि च जायंते स्त्रियश्चाप्सरसोपमाः तेषां तु क्षीरिणां क्षीरं पिबंत्यमृ
तसंभवं मिथुनं जायते काले समं तत्र प्रवर्द्धते तुल्यरूपगुणोपेतं समवेषं तथैव च एकैकमनुरक्तं च चक्रवा
कसमं विभो निरामया वीतशोका नित्यं मुदितमानसाः दशवर्षसहस्राणि दशवर्षशतानि च जीवंति ते म
हाराज न चान्योन्यं जहत्युत भारुंडा नाम शकुनास्तीक्ष्णतुंडा महाबलाः ते निर्हरंति हि मृतान्दरीषु प्रक्षिपं
ति च उत्तराः कुरवो राजन्व्याख्यातास्ते समासतः मेरोः पार्श्वमहं पूर्वं वक्ष्याम्यथ यथातथं तस्य पूर्वाभिषे
कं तु भद्राश्वस्य विशांपते भद्रसालवनं यत्र कालाम्रश्च महाबलः स्त्रियः कुमुदवर्णाभाः सुंदर्यः प्रियदर्श
नाः चंद्रप्रभाश्चंद्रवर्णाः पूर्णचंद्रनिभाननाः चंद्रशीतलगात्र्यश्च नृत्यगीतविशारदाः दशवर्षसहस्रा
णि तत्रायुर्भरतर्षभ कालाम्ररसपीतास्ते नित्यं संस्थितयौवनाः दक्षिणेन तु नीलस्य निषधस्योत्तरेण

व सुदर्शनो नाम महाराज जंबूवृक्षः सनातनः योजनानां सहस्रं च शतं च भरतर्षभ उत्सेधो वृक्षराजस्य दि
वस्पृग्मनुजेश्वर अरत्नीनां सहस्रं च शतानि दश पंच च परिणाहस्तु वृक्षस्य फलानां रसभेदिनां पतमानानि
तान्युर्वीं कुर्वंति विपुलं स्वनं मुंचंति च रसं राजंस्तस्मिन्रजतसन्निभं तस्य जंबूफलरसो नदी भूत्वा जनाधि
प मेरुं प्रदक्षिणं कृत्वा संप्रयात्युत्तरान्कुरून् पिबंति तत्र संहृष्टा जना नित्यं जनाधिप तस्मिन्फलरसे
पीते न जरा बाधते च तान् तत्र जांबूनदं नाम कनकं देवभूषणं तरुणादित्यवर्णाश्च जायंते तत्र मानवाः
तथा माल्यवतः शृंगे दीप्यते तत्र हव्यवाट् नाम्ना संवर्तको नाम कालाग्निर्भरतर्षभ तथा माल्यवतः शृं
गे पूर्वपूर्वानुगंडिका योजनानां सहस्राणि पंचाशन्माल्यवान्स्मृतः महारजतसंकाशा जायंते तत्र मान
वाः ब्रह्मलोकगताः सर्वे सर्वे च ब्रह्मवादिनः तपस्तु तप्यमानास्ते भवन्ति ह्यूर्ध्वरेतसः रक्षणार्थं तु
भूतानां वालखिल्या मनस्विनः ऽप्ररुणस्याग्रतो यांति परिवार्य दिवाकरं रात्रौ च संति ते सर्वे माल्यव
तं नगोत्तमं ऽप्रष्टाशीतिसहस्राणि पर्वांगुष्ठनिभास्तु ते षष्टीवर्षसहस्राणि षष्टीवर्षशतानि च आ
दित्यतापनप्राप्ते विशंति शशिमंडलं इति श्रीमहाभारते भीष्मपर्वणि भुवनकोशे धृतराष्ट्र उवाच
वर्षाणां चैव नामानि पर्वतानां च संजय आचक्ष्व मे यथातत्त्वं ये च पर्वतवासिनः संजय उवाच दक्षि

णेन तु श्वेतस्य निषधस्योत्तरेण च वर्षं हिरण्यकं नाम यत्र हैमवती नदी दक्षिणेन तु नीलस्य निषधस्यो
त्तरेण तु वर्षं रमणकं नाम जायंते तत्र मानवाः शुक्लाभिजनसंपन्नाः सर्वे प्रियदर्शनाः निःसपत्नाश्च ते सर्वे जायंते
तत्र मानवाः दशवर्षसहस्राणि शतानि दश पंच च जीवंति ते महाराज नित्यं मुदितमानसाः यत्र चायं महाराज पर
क्षिराट् पतगोत्तमः यत्तानुकामहाराज धनिनः प्रियदर्शनाः महाबलास्तत्र सदा राजन्मुदितमानसाः एकादशसह
स्राणि वर्षाणां तु जनाधिप आयुःप्रमाणं जीवंति शतानि दश पंच च शृंगाणि वै शृंगवतस्त्रीण्येव विमलानि च
एकं मणिमयं तत्र द्वितीयं रौक्ममेव च सर्वरत्नमयं चैव भवनै रूपशोभितं तत्र स्वयंप्रभा देवी नित्यं वसति शांडिली
उत्तरेण च शृंगस्य समुद्रांते जनाधिप वर्षमैरावतं नाम तस्माच्छृंगवतः परं न सूर्यस्तपति न च जीवंति मानवाः तत्र
चंद्रमाश्च सनक्षत्रो ज्योतिर्भूत इवावृते पद्मप्रभाः पद्मवर्णाः पद्मपत्रनिभेक्षणाः पद्मपत्रसुगंधाश्च जायंते
तत्र मानवाः अनिःष्पंदाः सुगंधाश्च निराहारा जितेंद्रियाः देवलोकच्युताः सर्वे तथा विरजसो नृप त्रयोद
श सहस्राणि वर्षाणां ते जनाधिप आयुःप्रमाणं जीवंति नरा भरतसत्तम क्षीरोदस्य समुद्रस्य तथैवोत्त
रतः प्रभुः हरिर्वसति वैकुंठः सकटे कनकात्मके अष्टचक्रं हि तद्यानं भूतयुक्तं मनोजवं अग्निवर्णं म
हावेगं जांबूनदपरिष्कृतं स प्रभुः सर्वभूतानां विभुश्च भरतर्षभ संक्षेपो विस्तरश्चैव कर्ता कारयिता च
सः पृथिव्यापस्तथाकाशं वायुस्तेजश्च पार्थिव स यज्ञः सर्वभूतानामास्यं तस्य हुताशनः वैशंपायन उ०

भीष्म. १०

एवमुक्तः संजयेन धृतराष्ट्रो महायशाः ध्यानमन्वगमद्राजा पुत्रान्प्रति जनाधिप स विचिंत्य महाराज पुनरेवा
ब्रवीद्वचः असंशयं सूतपुत्र कालः संक्षिपते जगत् सृजते च पुनः सर्वं विद्यते नेह शाश्वतं नरो नारायणश्चैव
सर्वज्ञः सर्वभूतहृत् देवा वैकुंठ इत्याहुर्वेदे विष्णुमिति प्रभुं इति श्री महाभारते भीष्मपर्वणि भुवनकोशे
धृतराष्ट्र उवाच यदिदं भारतं वर्षं यत्रेदं मूर्छितं बलं यत्रातिमात्रं लुब्धोयं पुत्रो दुर्योधनो मम यत्र गृध्नाः
पांडुपुत्राश्च यत्र मे रमते मनः एतन्मे तत्त्वमाचक्ष्व कुशलो ह्यसि संजय संजय उवाच न तत्र पांडवा गृध्नाः
शृणु राजन्वचो मम गृध्नो दुर्योधनस्तत्र शकुनिश्चापि सौबलः अपरे क्षत्रियाश्चापि नानाजनपदेश्व
राः ये गृध्ना भारते वर्षे न मृष्यंति परस्परं अत्र ते वर्णयिष्यामि वर्षं भारत भारते प्रियमिंद्रस्य देवस्य
मनोर्वैवस्वतस्य च पृथोश्च राजन्वैण्यस्य तथेक्ष्वाकोर्महात्मनः ययातेरंबरीषस्य मांधातुर्नहुष
स्य च तथैव मुचकुंदस्य शिवेरौशीनरस्य च ऋषभस्य तथैडस्य नृगस्य नृपतेस्तथा कुशिकस्य च दुर्ध
र्ष गाधेश्चैव महात्मनः सोमकस्य च राजर्षेर्दिलीपस्य च भारत अन्येषां च महाराज क्षत्रियाणां बली
यसां सर्वेषामेव राजेंद्र प्रियं भारत भारतं तत्र वर्षं प्रवक्ष्यामि यथाश्रुतमरिंदम शृणु मे गदतो राज
न्यन्मां त्वमनुपृच्छसि महेंद्रो मलयः सह्यः शुक्तिमान्गंधमादनः विंध्यश्च पारिपात्रश्च सप्तैते कु
लपर्वताः तेषां सहस्रशो राजन्पर्वतास्तु समीपगाः अभिज्ञाताः सारवंतो विपुलाश्चित्रसानवः

राम १०

ग्रम्ये ततोपरि माता हृस्वा हृस्वोपजीविनः ग्रार्या म्लेछा श्च कौरव्य तेः मिश्राःपुरुषा विभो नदीपि
बंति बहुला गंगा सिंधु सरस्वती गोदावरी नर्मदां च बाहुदां च महानदी शतद्रूं चंद्रभागां च यमुनां च म
हानदी दृषद्वती विपाशां च विपाशां स्थूलवालुका नदी वेत्रवती चैव कृष्णवेणीं च निम्नगां इरावती
वितस्तां च जमुनी देवकामपि वेदस्मृति वेदसिनी त्रिदिवामिक्षुलाविलां करीषिणीं चित्रवहां चित्रसे
नां च निम्नगां गोमती धुतपापां च वंदनां महानदी कौशिकी निम्नितं कृत्यां विचितां लोहितारणीं
रहस्यां शतकुंभां च शरयूं च नरेश्वर चर्मण्वती चेत्रवती हस्तिसोमां दिशां तथा शतावरीं पयोष्णीं च प
रां भैमरथीं तथा कावेरीं चुलुकां च तापीं शतबलामपि निचितां महितां चापि सुप्रयोगां नराधिप
विचित्रां कुंडलां सिंधुं राजिरां पुरमालिनी पूर्वाभिरामां वीरां च वेमां सोमवती तथा पलाशिनीं पापह
रां महेंद्रां पिप्पलावती विरूपिनी मसिक्नी च वेमां मोघवती तथा वरूपिनी मसिक्नी च पुरुष्णां वासि
मर्द्दन प्रतकां पुष्करां सेतां माघांघ नवतीं तथा भोनामत्यां महाहंसी च पृच्ण्यां गाढां च कौरव मुदांनी
लामधन्यां च कुशनारां महानदी सदाकांतां कलां चैव तपावीरवतीमपि वास्तूं सुवास्तूं गौरीं च के
शुकां सारिरावती हैमवती चित्रवती चित्रसेनां च निम्नगा रथचित्रां ज्योतिरथां विश्वामित्रां कु
पिंजलां उपेंद्रां बहुलां चैव कुवेरां अंबुवाहिनी वेणंदी पिंगलां वेणां तुंगभद्रां महानदी विदिशां

भीष्म. ११

श्वसवेणां च ताम्रां च कपिलामपि सतलुं च नामां वेदाश्वां हरिस्रांच महापगां कावेरीं सरस्वत्यां भारद्वाजीं च
निम्नगां कौशिकीं निम्नगां शोणां बाहुदामथ चंदनीं दुर्गामानशिलां चैव ब्रह्ममेध्यां सरस्वतीं परोक्षामहि
रोहीं च तथा जंबुनदीमपि सुनासां तमसां दासीं त्रसणमाल्यां वराणसीं नीलां धृतकरीं चैव पर्णाशां चैव महा
नदीं तामसीं हवभां चैव महानद्याः जयाधिप सदानीरामथाहृत्यां मंदगां मंदवाहिनीं मंदाकिनीं वैतर
णीं कोकां चैव महानदीं ब्राह्मणीं च महागौरीं दुर्गामपि च भारत चित्रमाल्यां चित्रवहां मंजुलां करणवाहि
नीं शुक्तिमतीमरेल्वां च पुष्पवेणुत्पलावतीं लोहितां करतोयां च तथैव वृषभंगिनीं कुमारीम्रषि
कुल्यां च ब्रह्मकुल्यां च भारत सपुण्याश्च गयाश्चैव सर्वा गंगाश्च मारिष विश्वस्य मातरः सर्वाः सर्वाश्चै
व महाबलाः तथा नद्यः सुप्रकाशाः शतशोथ सहस्रशः मयैताः सहिताराजन्समाख्याता यथावि
धि अथापरान्जनपदान्निबोध गदतो मम तत्रेमे कुरुपांचालाः शाल्वा माद्रेय जांगलाः शूरसेनाः
कलिंगाश्च बोधा मोकास्तथैव च मत्स्या मुकुटाः सौबल्याः कुंतलाः काशिकोशलाः चेदयो मत्कषा करू
षाश्च भोजाः सिंधुपुलिंदकाः उत्तमाश्च दशार्णाश्च मेकलाश्चोत्कलैः सह पंचालिकाः कौशिकाश्चैव
नैकपृष्ठा युगंधराः गोधा मद्राः कलिंगाश्च काशयोऽपरकाशयः जठराः कुकुशाश्चैव सुदाशार्णा
श्च भारत कुंतयोऽवंतयश्चैव तथैवापरकुंतयः गोविंदा मंडकाः खंडा विदर्भा रूपवासिकाः अश्मकाः

राम ११

पांसुराष्ट्राश्च गोपराष्ट्राः परीतकाः आदिराष्ट्रा मुकराश्च बलिराष्ट्रं च केवलं वाणवास्याऽपवाहाश्च चक्राश्चक्र
भयाश्शकाः विदेहा मागधाः सुत्मा वलजा विजयास्तथा अंगा वंगाः कलिंगाश्च शकृल्लोमान एव च मल्लाः सु
देष्णाः प्रह्लादास्तथा माहिषककर्षिकाः वाहीका वाटधानाश्च आभीराः कालतोयकाः अपरांध्राश्च शूद्राश्च प
ह्लवाश्च चर्मखंडिकाः अटवीशबराश्चैव मरुभूमाश्च भारत उपावृत्ता अनुपावृत्ताश्च सुराष्ट्राः केकयास्तथा कुंतापरां
ताह्वेयाः कक्षाः सामुद्रनिष्कुटाः अंध्राश्च बहवो राजन्नंतगिर्य्यास्तथैव च बहिर्गिर्य्याः गमलदा मगध्यमान
वर्त्तकाः सह्योत्तराः प्रावृषेयाः भार्गवाश्च जनाधिप पुंड्रा भार्गाः किराताश्च सुदेष्णाः प्रमदास्तथा तीरग्राहाः
श्वरतोया रातिकारस्य कोकणाः तिलकाः भारशालाश्च मधुमत्ताः सकुंतलाः काश्मीराः सिंधुसौवीरा गांधा
रा दर्शकास्तथा अभीसाराः कुलाताश्च शैवल्या बह्लिकास्तराः दर्वीकाश्च वकादार्वा वलस्तारमणास्रमाः वह
रद्दाश्च कौरवा सुदामानः सुवर्णिकाः दर्भाः कभीसकाश्चैव पुलिंदा स्तयलकास्तथा वानायवो दशेम्याश्चारो
माणः कुशबिंदकाः कच्छा गोपालकच्छाश्च लांगलाः परवल्लभाः किराता बर्बराः सिद्धा विदेहास्ताम्रलिप्तकाः
उड्राः सम्मीरं ध्रा पार्वतीयाश्च मारिष अथापरे जानपदाः दक्षिणा भरतर्षभ द्रविडाः केरलाः प्राच्या मूषिक
कावनवासिनः कर्णाटकामाहिषका विकल्पा मूषिकास्तथा क
समंगाः कोपनाश्चैव कुकुरांगदमारिषाः ध्वजिन्युत्सवसंकेताः सैनिकाः सर्वसैनयः शकाः केकरिकाः प्रो
ष्ठा परमंचव्यीस्तथा तथैव विंध्यकुलिकाः पुलिंदा वल्कलैः सह मालवा मल्लिवाश्चैव तथैवापर वर्त्ति

भीष्म. काः कुलिंदाःकुलिकाश्चैव अपारद्दाःकुरुकास्तथा मूरकास्तनबालाश्च समिश्राः प्रतिमुंजयः आदिदायाःश्विरा ला १

१२ श्वमूचकास्तनयातथा अविकादर्भकलिकासंगणापरतःगणाः उत्तराश्चापरे म्लेछाजनाभारतसत्तमं यवना

श्चसकांबोजादारुणाम्लेछजातयः सक्रुस्मद्रुहाःकुंतलाश्च हूणाःपारतकैःसह तथैवमणाश्चीनास्तथैवपरमालि व ३

काः क्षत्रियाश्चानिवेशाश्च वैश्यपष्टद्रकुलानिच अराभीराश्च दरदाःकाश्मीरापशुभिःसह खसिकाश्च उरवाराश्च

पहूवागिरिगह्वराः सात्रेयाःसभरद्वाजास्तथैवस्तनयोनिकाः अपकाश्चलिंदाश्च किरातानांचजातयः तो

मराहंसमार्गाश्च तथैवकरजंभकाः एतेचान्येजनपदाःप्राच्योदीच्यास्तथैवच उद्देश पमात्रेणमयादेशाःप्रकी

र्त्तिताःप्रभो यथागुणंवलंचापिनीत्यामर्वमहाफलं दुह्येधेनुःकामदुधाभूमिसम्यगनुष्ठिता तस्यांगृध्यं

तिराजानःशूराः धर्मार्थकोविदाः तेत्यजंत्याहवेप्राणान्रसगृध्रास्तरस्विनः देवमानुषकायानांकामंभूमि माय)

र्णं अन्योन्यस्यावलुंपंतिसारमेयाइवामिषं राजानोभरतश्रेष्ठभोक्तुकामावसुंधरां नचापितृप्तिकामानां

विद्यतेचेहकस्यचित् तस्मात्परिगहेभूमेर्यतंतेकुरुपांडवाः साम्नादानेनभेदेनदंडेनैवचपार्थिव माता

पितावपुत्राश्चखंद्यौश्चनरपुंगव भूमिर्भवतिभूतानांसम्यगछिद्रदर्शिनी इतिश्रीमहाभारतेभीष्मप

र्वणिजंबूखंडविनिर्माणे धृतराष्ट्रउवाच भारतस्यास्यवर्षस्यतथाहैमवतस्यच प्रमाणमायुषः राम

सूतफलंचापिशुभाशुभं अनागतमतिक्रांतंवर्त्तमानंचसंजय आचक्ष्वमेविस्तरेणहरिवर्षंतथैवच १२

संजयउवाच चत्वारिभारतेवर्षेयुगानिभरतर्षभ कृतंत्रेताद्वापरंचतिष्यंचकुरुनंदन पूर्वंकृतंयु

त्वां सेनामभिवीक्ष्य च पांडवाः बभूवुर्हृष्टमनसो वासुदेवस्य वीर्यवान् ततो योधान्हर्षयितो वासुदेवधनंजयौ दध्मा
तु पुरुषव्याघ्रौ दिव्यौ शंखौ रथस्थितौ पांचजन्यस्य निर्घोषं देवदत्तस्य चोभयोः श्रुत्वा सवाहना योधाः शकृन्मू
त्रं प्रसुस्रुवुः यथा सिंहस्य नदतः स्वनं श्रुत्वेतरे मृगाः तत्संप्रमुग्धमेवासीद्धृतराष्ट्रबलेन तदा उदतिष्ठद्रजो भूमे
त ८ र्न प्रज्ञायत किंचन अंतर्धीयत चादित्यः सैन्येन रजसावृते तदा ववर्ष पर्जन्यो मांसशोणितकर्दमान् ध्वंसि सर्वा
ण्यनीकानि तदद्भुतमिवाभवत् वायुस्तदा प्रादुरभूत्ततः शर्करकर्षणः विनिघ्नंस्तान्यनीकानि विनिघ्नं
ष्टं बलं द्रजः उभे सेने महाराज युद्धायाभ्युदिते भृशं कुरुक्षेत्रे स्थिते यत्ते सागरक्षुभितोपमे तयोः सुसेन
योरासीत्तदद्भुतसमागमः युगांते समनुप्राप्ते द्वयोः सागरयोरिव शून्यैव पृथिवी सर्वा वृद्धबालावशेषिता
निरश्वपुरुषा चासीद्रथकुंजरवर्जिता तेन सेनासमूहेन समानीतेन कौरवैः ततस्ते समयं चक्रुः कुरुपांडव
सेनिकाः धर्मांश्च स्थापयामासुर्योधानां भरतर्षभ निवृत्ते चैव तो युद्धे स्याच्च प्रीतिः परस्परं यथा सर्वसमायो
गं न च स्याच्छलनं पुनः वाचा युद्धे प्रवृत्ते तु वाचैव प्रतिषेधनं निःक्रांत पतिनामध्यान्नहंतव्यः कथंचन
रथी च रथिना योध्यो गजेन गजधूर्गतः करोतु युद्धे पादातिः पादातेनैव भारत यथा योग्यं यथावीर्यं यथोत्साहं
यथावयः समाभाष्य प्रहर्तव्यो नस्थन च विह्वले परेण सह संसक्तः हंतव्यो नापरेण च क्षीणशस्त्रो विव
र्मश्च न हंतव्यः कथंचन न सूतेषु न धुर्येषु न च शस्त्रोपजायिषु न भेरीशंखवादेषु प्रहर्तव्यः कथंचन

भी०प०
२

एवंतेसमयंकृत्वाकुरुपांडवसोमकाः विस्मयंपरमंजग्मुःप्रेक्षमाणाःपरस्परं वैशंपायन० निविश्यचमहात्मानं
ततस्तेपुरुषर्षभाः सोमकाःसुमनसोराजन्बभूवुःसहसैनिकाः इतिश्रीमहाभारतेभीष्मपर्वणिसेनास्थापनं
नामप्रथमोध्यायः १ वैशंपायनउवाच ततःपूर्वापरेसंध्येसमीक्ष्यभगवानृषिः सर्ववेदविदांश्रेष्ठोव्यासःसत्यवतीसुतः
भविष्यतिरणेघोरेभारतानांपितामहः प्रत्यक्षदर्शीभगवान्भूतभव्यभविष्यवित् वैचित्रवीर्यंराजानंसरहस्यंब्रवीदिदं
शोचंतमार्तंपुत्राणामनयंपार्थिवंतदा व्यासउवाच राजन्परीतकालास्तेपुत्राश्चान्येचभूमिपाः निहनिष्यंतिसंग्रा
मेसमासाद्येतरेतरं तेषुकालपरीतेषुविनश्यत्सुचभारत कालपर्यायमाज्ञायमास्मशोकेमनःकृथाः यदित्विच्छसि
संग्रामेद्रष्टुमेतद्विशांपते चक्षुर्ददामितेहंतयुद्धंपुत्रनिशामय धृतराष्ट्रउवाच नरोचयेज्ञातिवधंद्रष्टुंब्रह्मर्षिस
त्तम युद्धमेतत्त्वशेषेणशृणुयांतवतेजसा वैशंपायनउवाच एतस्मिन्नेच्छतिद्रष्टुंसंग्रामंश्रोतुमिच्छति कुरूणामी
श्वरोव्यासःसंजयायवरंददौ एषतेसंजयोराजन्युद्धमेतद्वदिष्यति एतस्यसर्वंसंग्रामेनपरोक्षंभविष्यति च
क्षुषासंजयोराजन्दिव्येनैवसमन्वितः कथयिष्यतितेयुद्धंसर्वज्ञश्चभविष्यति प्रकाशंवाप्रकाशंवादिवा
वायदिवानिशि मनसाचिंतितमपिसर्वंवेत्स्यतिसंजयः नैनंशस्त्रा

राम
२

ं नाम ततस्त्रेतायुगं विभो संक्षेपात् द्वापरस्याथ ततः पुष्यं प्रवर्त्तते चत्वारि च सहस्राणि वर्षाणां कुरुसत्तम
द्विसाहस्रं द्वापरं तु शतं तिष्ठति सांप्रतं न प्रमाणस्थितिर्ह्यस्ति ष्येऽस्मिन् भरतर्षभ गर्भस्थाश्च म्रियंते च त
था जाताश्च योत्तम महाबला महासत्वाः प्रजा गुणसमन्विताः प्रजायंत कृते राजन्मुनयः सतपोधनाः
महोत्साहा महात्मानो धार्मिकाः सत्यवादिनः जाताः कृतयुगे राजन्धनिनः प्रियदर्शिनः आयुष्मंतो
महावीर्या धनुर्द्धरवरा युधि जायंते क्षत्रियाः शूरास्त्रेतायां चक्रवर्त्तिनः सर्ववर्णा महाराज जायंते द्वाप
रे सदा महोत्साहा महावीर्याः परस्परहितैषिणः तेजसाल्पेन संयुक्ताः क्रोधनाः पुरुषा नृप लु
ब्धाश्चानृतकाश्चैव तिष्ये जायंत भारत संक्षेपो वर्त्तते राजन्द्वापरेऽस्मिन्नराधिप गुणोत्तरं हैम
नरं हरिवर्षं ततः परं इति श्रीमहाभारते भीष्मपर्वणि जंबूखंडविनिर्माणे धृतराष्ट्र उवाच जंबूद्वी
पस्त्वया प्रोक्तो यथावदिह संजय विष्कंभमस्य प्रब्रूहि परिमाणं च तत्त्वतः समुद्रस्य प्रमाणं च सम्यग
च्छिद्रदर्शने शाकद्वीपं च मे ब्रूहि कुशद्वीपं च संजय शाल्मलं चैव तत्त्वेन क्रौंचद्वीपं तथैव च ब्रूहि गा
वल्गणे सर्वं राहोः सोमार्कयोस्तथा संजय उवाच राजन्सुबहवो द्वीपा यैरिदं संततं जगत् सप्तद्वी
पान्प्रवक्ष्यामि चंद्रादित्यौ ग्रहांस्तथा अष्टादश सहस्राणि योजनानां विशांपते षट्शतानि च
परीणाहि विष्कंभो जंबूपर्वतः लवणस्य समुद्रस्य विष्कंभो द्विगुणः स्मृतः नानाजनपदाकीर्णो

मणिविद्रुमचित्रितैः अनेकधातुचित्रैश्च पर्वतैरुपशोभितः सिद्धचारणसंकीर्णः सागरः परिमंड
लं शाकद्वीपे प्रवक्ष्यामि यथावदिह पार्थिव शृणु मे त्वं यथान्यायं ब्रुवतः कुरुनंदन जंबूद्वीपप्रमाणेन
द्विगुणः स नराधिप विष्कंभेदेन महाराज सागरोपि च सर्वशः क्षीरोदो भरतश्रेष्ठ येन संपरिवा
रितः तत्र पुण्या जनपदा न तत्र म्रियते जरा कुत एव तु दुर्भिक्षं क्षमातेजोयुगा हि ते शाकद्वीपस्य संक्षे
पो यथावदिह संजय उक्तस्त्वया महाभाग विस्तरं ब्रूहि सूतज संजय उवाच तथैव पर्वता राजन् सप्तात्र
मणिभूषिताः रत्नाकरास्तथा नद्यस्तेषां नामानि मे शृणु ऽप्रतीवगुणवत्सर्वं यत्र पुण्यं जनाधि
प देवर्षिगंधर्वयुतः परमो मेरुरुच्यते प्रागायतो महाराज मलयो नाम पर्वतः यतो मेघाः प्रवर्तंते
प्रभवंति च सर्वशः ततः परेण कौरव्य जलधारो महागिरिः यत्र नित्यमुपादत्ते वासवः परमं जलं
यतो वर्षं प्रभवति वर्षकाले जनेश्वर उच्चो गिरी रैवतको यत्र नित्यं प्रतिष्ठितं रेवती दिवि नक्षत्रं पि
तामहकृतो विधिः उत्तरेण तु राजेंद्र श्यामो नाम महागिरिः यतः श्यामत्वमापन्नाः प्रजा जनपदेश्व
राः धृतराष्ट्र उ० सुमहान्संशयो मेद्य प्रोक्तोयं संजय त्वया प्रजाः कथं सूतपुत्र संप्राप्ताः श्यामतामिह
संजय उ० सर्वेष्वेव महाराज द्वीपेषु कुरुनंदन गौरः कृष्णश्च वर्णौ द्वौ तयोर्वर्णांतरं नृप श्यामो यस्मात्प्र
वृत्तो वै तत्ते वक्ष्यामि तत्त्वतः ततः परं कौरवेंद्र दुर्गशैलो महोदयः केसरी केसरयुतो यतो वातः प्रवा

यति तेषां योजनविष्कंभो द्विगुणः पूर्वभागशः वर्षाणि तेषु कौरव्य संप्रोक्तानि मनीषिभिः महामेरु
र्महाकोशो जलदः कुमुदोत्तरः जलधारो ऽपरो राजन्सुकुमार इति स्मृतः रैवतस्य तु कौमारः श्याम
स्य च मणीचयः केसरस्य च मोदाकी परेण च महापुमान् परिवार्य्य च कौरव्य दीर्घह्रस्वत्वमेव च जंबूद्वी
पः समाख्यातः तस्य मध्ये महाद्रुमः शाको नाम महाराज प्रजा तस्य तमोनुगाः तत्र पुण्या जनपदाः पूज्यते
च चतुष्करः तत्र गच्छंति सिद्धाश्च चारणा दैवतानि च धार्मिकाश्च प्रजा राजन् चत्वारो ऽतीव भारत वर्णाश्च धर्म
निरताः न च स्तेनो ऽत्र दृश्यते दीर्घायुषो महाराज जरामृत्युविवर्जिताः प्रजास्तत्र विवर्द्धंते वर्षास्विव समुद्रगाः
नद्यः पुण्यजलास्तत्र गंगा च बहुधा गतिः सुकुमारी कुमारी च शीताशी वेणिकास्तथा महानदी च कौरव्य मन
था मणिजला नदी इक्षुवर्धिनिका चैव तथा भरतसत्तम ततः प्रवृत्ताः पुण्योदा नद्यः कुरुकुलोद्वह सहस्रा
णां शतान्येक यतो वर्षति वासवः न तासां नामधेयानि परिमाणं तथैव च शक्यंते परिसंख्यातुं पुण्यास्ता हि
सरिद्वराः तत्र पुण्या जनपदाश्चत्वारो लोकसम्मताः मगाश्च मगधाश्चैव मानसा मंदगास्तथा मगा ब्राह्म
णभूयिष्ठाः स्वकर्मनिरता नृप मगधेषु पि राजन्या धार्मिकाः सर्वकामदाः मानसेषु महाराज वैश्य कर्मोप
जीविनः सर्वकामसमायुक्ताः शूराः धर्मार्थनिश्चिताः शूद्रास्तु मंदगे नित्यं पुरुषा धर्मशालिनः न तत्र रा

भीष्म १८ नाराजेंद्र न दंडो न च दांडिकाः स्वधर्मेणैव धर्मज्ञाः ते रक्षंति परस्परं एतावदेव शक्यं तु तस्मिन्द्वीपे प्रभाषितं
एतावदेव श्रोतव्यं शाकद्वीपे महौजसे इति श्रीमहाभारते भीष्मपर्वणि जंबूद्वीपनिर्माणे द्वादशोऽध्यायः १२
संजय उवाच उत्तरेषु तु कौरव्य द्वीपेषु श्रूयते कथा यथाश्रुतं महाराज ब्रुवतस्तन्निबोध मे घृतोदः समुद्रोऽत्र दधिमंडोदकोऽपरः सुरोदः सागरश्चैव तथान्यो धर्मसागरः परस्परेण द्विगुणाः सर्वे द्वीपाः नराधिप सर्वतश्च महाराज पर्वतैः परिवारिताः गौरस्तु मध्यमे द्वीपे गिरिर्मनःशिलो महान् पर्वतः पश्चिमः कृष्णो नारायणसखो नृप तत्र रत्नानि दिव्यानि स्वयं रक्षति वासवः प्रजापतिमुपासीनः विदधे सुखं
कुशद्वीपे कुशस्तंभो मध्ये जनपदस्य ह संपूज्यते शाल्मलिश्च द्वीपे शाल्मलिके नृप क्रौंचद्वीपे तथा क्रौंचो गिरिः रत्नचयाकरः संपूज्यते महाराज चातुर्वर्ण्येन नित्यदा गोमेदः पर्वतो राजन्सुमहान्सर्वधातुमान् यत्र नित्यं निवसति श्रीमान्कमललोचनः मोक्षिभिः संस्तुतो नित्यं प्रभुर्नारायणो हरिः कुशद्वीपे तु राजेंद्र पर्वतो विद्रुमैश्चितः सुनामा नाम दुर्धर्षो द्वितीयो हेमपर्वतः द्युतिमान्नाम कौरव्य तृतीयः कुमुदो गिरिः चतुर्थः पुष्पवान्नाम पंचमस्तु कुशेशयः षष्ठो हरिगिरिर्नाम षडेते पर्वतोत्तमाः तेषामंतराविष्कंभो द्विगुणः प्रविभागशः औद्भिदं प्रथमं वर्षं द्वितीयं वेणुमंडलं तृतीयं सुरथं नाम चतुर्थं प राम १८


लवंस्मृते पर्वदिमन्यं वमवर्षं वदेवर्षप्रभाकरः सप्तमंकपिलंवर्षंसप्तैतेवर्षजुंजकाः एतेषुचैवगंधर्वाप्र
जाश्चैवजगदीश्वर विहरंतिरमंतेच नतेषुम्रियतेजनाः नतेषुदस्यवःसंतिम्लेछजात्योपिवान्नप गौर
प्रायोजनस्तत्रसुकुमारश्चपार्थिव ग्रंथिश्चिष्टेषुसर्वेषुवक्ष्यामिमनुजेश्वर वामनादं
धकारकः ग्रंथकारात्परोराजन्नंतरद्व्यग्रमनाःभृणु क्रौंचद्वीपमहाराजमैनाकःपुरुषोत्तम मैनाकात्
परतोराजन्गोविंदोगिरिरुत्तमः गोविंदात्परतोराजन्निवजोनामपर्वतः परस्तुद्विगुणस्तेयोविष्कंभा
धर्मवर्द्धनः देशांस्तत्रप्रवक्ष्यामितन्मेनिगदतःभृणु क्रौंचस्यकुशलोदेशोवामनस्यमनोनुगः मनो
नुगात्परश्चोष्णोदेशःकुरुकुलादवः उष्मात्परःप्रावरकःप्रावरादंधकारकः ग्रंथकारकदेशात्तुमु
निदेशःपरःस्मृतः मुनिदेशात्परश्चैवप्रोच्यतेविदुनिस्वनः सिद्धचारणसंकीर्णोगौरप्रायोजनाधिप
एतेदेशामहाराजदेवगंधर्वसेविताः पुष्करेपुष्करोनामपर्वतोमणिरत्नवान् तत्रनित्यंनिवसतिस्वयंदे
वःप्रजापतिः तंपर्युपासतेनित्यंदेवाःसर्वमहर्षिभिः वाग्भिर्मनोनुकूलाभिःपूजयंतोनराधिप
जंबूद्वीपात्प्रवर्ततेरत्नानिविविधान्युत द्वीपेषुतेषुसर्वेषुप्रजानांकुरुनंदन विप्राणांब्रह्मचर्येणस

भीष्म० तेनचपरमेनच परीणाहायप्रमाणाभ्यांद्विगुणंद्विगुणंततः एतेजनपदाराजन्दीपेष्वेतेषुभारत उक्ताजन
१५ पदायेषुधर्मश्चैकःप्रदृश्यते ईश्वरोदंडमुद्यम्यस्वयमेवप्रजापतिः द्वीपानेतान्महाराजरक्षंस्तिष्ठतिसर्व
दा सराजासशिवोराजन्सपितासपितामहः गोपायतिनरश्रेष्ठप्रजाःसजडपंडिताः भोजनंचात्रकौरव्यप्र
जाःस्वयमुपस्थितं सिद्धमेवमहाराजभुंजतेतत्रनित्यशः ततःपरंसमानामदृश्यतेलोकसंस्थितिः च
तुरस्रामहाराजत्रयस्त्रिंशत्तुमंडलं तत्रतिष्ठंतिकौरव्यचत्वारोलोकसंमताः दिग्गजाभरतश्रेष्ठवामनैराव
तादयः सुप्रतीकास्तथाराजप्रभिन्नकरटमुखाः तस्याहंप्रमाणंतुनसंख्यातुमहोत्सहे असंख्यातःसनि
त्यंहितिर्यगूर्द्धमधस्तथा तत्रवैवायवोवांतिदिग्भ्यःसर्वाभ्यएवच असंबाधामहाराजतानिगृह्णंतितेगजाः
पुष्करैःपद्मसंकाशैर्वर्ष्मवद्भिर्महाप्रभैः तेशनैःपुनरेवाशुवायून्मुंचंतिनित्यशः श्वसद्भिर्मुच्यमानास्
तुदिग्गजैरिहमारुताः आगच्छंतिमहाराजतान्निगृह्णंतिवैजनाः धृतराष्ट्रउवाच परोवैविस्तरोत्य
र्थंत्वयासंजयप्रकीर्तितः दर्शितंद्वीपसंस्थानमुत्तरंब्रूहिसंजय संजयउवाच उक्ताद्वीपामहाराजग्र राम
हान्मेशृणुतत्त्वतः स्वर्भानुःकौरवश्रेष्ठयावदेषप्रभावतः परिमंडलोमहाराजस्वर्भानुःश्रूयतेग्रहः १५

योजनानांसहस्राणिविष्कंभोद्वादशास्यवै परिणाहेनषट्त्रिंशद्विपुलत्वेनचानघ षष्टिमाहुःसहस्राणि
बुधाःपौराणिकास्तथा चंद्रमास्तुसहस्राणिद्वेचान्येकुरुनंदन विष्कंभेनततोराजन्राजन्नेकादशस्मृतः
विष्कंभेनकुरुश्रेष्ठत्रयस्त्रिंशत्तुमंडलं एकोनषष्टिविस्ताराच्छीतरश्मेर्महात्मनः सूर्यस्त्वष्टौसहस्राणि
द्वेचान्येकुरुनंदन विष्कंभेनततोराजन्मंडलंत्रिंशतंसमं अष्टपंचाशतंराजन्विपुलत्वेनचानघ श्रू
यतेपरमोदारःपतंगोसौविभावसुः एतत्प्रमाणमर्कस्यनिर्दिष्टमिहभारत सराहुश्छादयत्येतौ
यथाकालंमहातपाः चंद्रादित्यौमहाराजसंक्षेपोयमुदाहृतः इत्येतत्तेमहाराजविपुलत्वेनचान
घ [illegible]

भीष्म.
१६

राम
१६



भीष्म. ९

कथंभीष्मेणसंग्राममकुर्वन्पांडुनंदनाः कथंचनाजयभीष्मो द्रोणेजीवतिसंजय कृपेतन्निहितेत
त्रभारद्वाजात्मने तथा भीष्मः प्रहरतांश्रेष्ठः कथंसंनिधनंगतः कथंचातिरथस्तेन पांचालेनशिखं
डिना भीष्मोविनिहतोयुद्धेदेवैरपिदुरुत्सहः यःस्पर्द्धतेरणेनित्यंजामदग्न्यंमहाबलं अजितंजाम
दग्न्येनशक्रतुल्यपराक्रमं तंहतंसमरेभीष्मंमहारथबलोद्युतं संजयाचक्ष्वमेवीरंयेनशर्मनविद्महे
मामकाःकेमहेष्वासंनाजहुःसंजयाच्युतं यस्मिन्नजातेमहावीर्येशांतनुर्लोकशंकरे शोकंदुःखंचदैन्यंच
प्राजहत्पुत्रलक्ष्मणि प्रोक्तंपरायणंतत्रसधर्मनिरतंशुचिं वेदवेदांगतत्वज्ञंकथंसंशसिमेहतं सर्वा
विनयोपेतंदांतंशांतंमनस्विनं हतंशांतनवंश्रुत्वामन्येशेषंहतंबलं धर्माद्धर्मोबलवान्संप्राप्नु
तिमेमतिः यत्रवृद्धंगुरुंहत्वाराज्यमिच्छंतिपांडवाः जामदग्न्यःपुरारामःसर्वास्त्रविदनुत्तमः अंबार्थमु
द्यतःसंख्येभीष्मेणयुधिनिर्जितः तमिंद्रसमकर्माणंककुदंसर्वधन्विनां हतंशंससिमेभीष्मंकिंनु
दुःखमतःपरं असकृत्क्षत्रियाव्राताःसंख्येयेनविवर्जिताः जामदग्न्यस्तथारामःपरवीरविघातिना
तस्मान्नूनंमहावीर्यात्गांगेयात्युद्धदुर्मदात् तेजोवीर्यबलैर्भूयान्शिखंडीद्रुपदात्मजः यःशूरंकृति

राम १२

नं युद्धे सर्वशास्त्रविशारदं परमास्त्रविदं वीरं जघान भरतर्षभ केवीरास्तममित्रघ्नमन्वयुःशत्रुसंसदि प्रोसमेतद्यथा
वृत्तं युद्धं भीष्मस्य पांडवैः योधव हतवीरामे सेनापुत्रस्य पांडवैः अगोपमिव चोद्भ्रांतं गोकुलं तद्बलं मम पोरुषं स
र्वलोकस्य परं यस्य महाहवे मामकानां हते तस्मिन्कथमासीन्मनस्तदा जीविते प्यद्य सामर्थ्यं किमिवास्मासुः
संजय घातयित्वा महावीर्यं पितरं लोकधार्मिकं अगाधे सलिले मग्नां नावं दृष्ट्वेव पारगाः भीष्मे हते भृ
शं दुःखान्मन्ये शोचंति पुत्रकाः अद्रिसारमयं नूनं सुदृढं हृदयं मम यच्छ्रुत्वा पुरुषव्याघ्रं हतं भीष्मं न दीर्य
ते यस्मिन्नस्त्रं च मेधा च नीतिश्च भरतर्षभ अप्रमेयानि दुर्धर्षे कथं स निहतो युधि मोर्वीघोषः स्तनयित्नुः
पृषत्कं पृषतो महान् धनुर्ह्रादमहाशब्दो महामेघ इवोन्नतः यदभ्यवर्षत्कौंतेयान्सपांचालान्ससृंजया
न् निघ्नन्पररथान्वीरो दानवानिव वज्रभृत् इष्वस्त्रसागरं घोरं बाणग्राहं दुरासदं कार्मुकोर्मिणमक्ष
य्यमद्वीपं समरे प्लवं गदासिमकरावर्तं हययग्राहं गजाविलं हयान्गजान्पदातींश्च रथांश्च तरसा बहून्
निमज्जयंतं समरे परवीरापहारिणं विदह्यमानं कोपेन तेजसा च परंतप वलेव मकरावासं के वीराः प
र्यवारयन् भीष्मो यदकरोत्कर्म समरे संजयारिहा दुर्योधनहितार्थाय के तदास्य पुरोभवन् केरक्षन्

भीष्म॰
१८

स्त्रिणं वक्रं भीष्मस्यामिततेजसः पृष्ठतः के परावीराः पार्श्वेऽभवन्यतव्रताः केऽपुरस्तादवर्त्तंत गच्छतो दुर्ग
मां गतिं समूहे के परान्वीराः प्रत्ययुध्यंत संजय रक्षमाणाः कथं वीरैर्गोप्यमानाश्च तेतनुं दुर्जयानाम
नीकानिनाजयंस्तरसायुधि सर्वलोकेश्वरस्येव परमेष्ठिप्रजापतेः कथं प्रहर्तुमपि ते शेकुः संजयापा
र्थिवाः तस्मिन्द्वीपे पराश्वस्य युध्यंति कुरवः परैः तं निमग्नं नरव्याघ्रं भीष्मं शंससि संजय यस्य वीर्ये
समाश्वस्य मम पुत्रो बृहद्बलः न पांडवानगणयत्कथं स निहतः परैः यः पुराविबुधैः सेंद्रैः सहाय्ये युद्ध
दुर्मदैः कांक्षितो दानवान्घ्नद्भिः पिता मम महाव्रताः नचास्त्रेण न शौर्येण तपसा मेधया न च नप्रीत्या न पु
नस्या गान्मृत्योः कश्चिद्धि मुच्यते कालो नूनं महावीर्यः सर्वलोकदुरत्ययः यत्र शांतनवं भीष्मं हतं सं
शास्सि संजय पुत्रशोकाभिसंतप्तो महद्दुःखमचिंतयन् आशांसे हं पुरा त्राणं भीष्माच्छंतनुनंदनात्
यदादित्यमिवाऽपश्यपत्यंतं भुवि संजय दुर्योधनः शांतनवं किं तदा प्रत्यपद्यत नहि स्वेषां परेषां
वा बुध्या संजय चिंतयन् शेषं किंचित्प्रपश्यामि प्रत्यनीके महीक्षितां दारुणः क्षत्रधर्मोयमृषिभिः
संप्रदर्शितः यत्र शांतनवं हत्वा राज्यमिछंति पांडवाः वयं वा राज्यमिछामो घातयित्वा पितामहं

राम
१८

तत्र धर्मे स्थिताः पार्था नापराध्यंति पुत्रकाः एतदार्येण कर्तव्यं कृछ्रास्वापत्सु संजय पराक्रमं परं
शक्त्या तस्मिन्प्रतिष्ठिते अनीकानि विनिघ्नंतं ह्रीमंतं परमाजितं कथं शांतनवं तात पांडुपुत्राण्यपा
तयन् कथं युक्तान्यनीकानि कथं युद्धं महात्मभिः कथं वा निहतो भीष्मः पिता संजय मे परैः दुराश
यश्च कर्णश्च शकुनिश्चापि सौबलः दुःशासनश्च कितवो हते भीष्मे किमब्रुवन् यच्छरीरैरुपसंकीर्
र्णां नरवारणवाजिनां शरशक्तिगदाखड्गतोमराढ्यां भयावहां प्राविशन् कितवा मंदाः सभां युधि दु
रासदां प्राणद्यूते प्रतिभये ह्यदीव्यंत नरर्षभाः को जयन् के जितास्तत्र हतलक्षाणि पातिताः युद्धे भी
ष्माच्छांतनवादन्यन्ममाचक्ष्व संजय नहि मे शांतिरस्तीह युधि देवव्रतं हतं पितरं भीष्मकर्माणं
श्रुत्वा मां दुःखमाविशत् आर्त्तिं मे हृदये रूढां महतीं पुत्रकारितां त्वं मे सर्पिरिवाग्निमुद्दीप
यसि संजय महांतं भारमुद्यम्य विख्यातं सार्वलौकिकं दृष्ट्वा विनिहतं भीष्मं मन्ये शोचंति पुत्रकाः
श्रोष्यामि तानि नीकानि दुर्योधनकृतान्यहं तस्मान्मे सर्वमाचक्ष्व यद्वृत्तं तत्र संजय संग्रामे पृ
थिवीशानामस्माकं दुर्विसंभवात् अनीतं वा सुनीतं वा तन्ममाचक्ष्व संजय यत्कृतं तत्र भीष्मे

भीष्म०
१९

णसंग्रामे जयमिच्छतां तेजोयुक्तं हतास्त्रेण शंसतस्माप्यशोचतः यथा तदभवद्युद्धं कुरुपांडवसे
नयोः क्रमेणाथ येन यस्मिंश्च काले यत्तु यथाभवत् भीष्मपर्वणि धृतराष्ट्रप्रश्नः संजय उवाच
त्वयुक्तोयमनुप्रश्नो महाराज यथार्हसि न तु दुर्योधने दोषमिममासक्तुमर्हसि यश्चात्मनो दुश्च
रिताद्शुभं प्राप्नुयान्नरः एनसा तेन नान्यं स उपशंकितुमर्हसि महाराज मनुष्येषु निंद्यं यः सर्वमा
चरेत् स वध्यः सर्वलोकेषु निंदितानि समाचरन् अजेय कृतप्रज्ञ पांडवैस्त्वत्प्रतीक्षया अनुभू
तः सहामात्यैः सोतवानसि चिरं वने हयानां च गजानां च राज्ञां चामिततेजसां प्रत्यक्षं यन्मया दृ
ष्टं दृष्टं योगबलेन च शृणु तत्पृथिवीपाल मा च शोके मनः कृथाः दृष्टमेतत्पुरा नूनं मे वै भावि
नराधिप नमस्कृत्वा पितुस्तेहं पाराशर्याय धीमते यस्य प्रसादाद्दिव्यं मे प्राप्तं ज्ञानमनुत्तमं दृ
ष्टिश्चातींद्रिया राजन्दूराच्छ्रवणमेव च परचित्तस्य विज्ञानमतीतानागतस्य च व्युत्थप्र
न्वेति विज्ञानमाकाशे च गतिः सदा शस्त्रैरसंगो युद्धेषु वरदानान्महात्मनः शृणु मे विस्तरेण
हविचित्रं परमाद्भुतं भरतानां महद्युद्धं यथाभूल्लोमहर्षणं तेष्वनीकेषु यत्तेषु व्यूढेषु च

राम
१९

विधानतः दुर्योधनो महाराज दुःशासनमथाब्रवीत् दुःशासनरथास्तूर्णं युज्यंतां भीष्मरक्षिणः
अनीकानि च सर्वाणि शीघ्रं त्वमनुचोदय अयं स समनुप्राप्तो वर्षपूगाभिचिंतितः पांडवानां ससैन्यानां कुरूणां च सं
मागमः नात्र कार्यतमं मन्ये रक्षणं भीष्मस्य रक्षणात् हन्यात् गुप्तो ह्यसौ पार्थान्सोमकांश्च ससृंजयान् अब्रवीच्च
विशुद्धात्मा नाहं हन्यां शिखंडिनं श्रूयते स्त्री ह्यसौ पूर्वं तस्माद्वर्ज्यो रणे च सः तस्माद्भीष्मो रक्षितव्यो विशेषेणेति मम
तिः शिखंडिनो वधे यत्ताः सर्वे तिष्ठंतु मामकाः तथा प्राच्याः प्रतीच्याश्च दाक्षिणात्योत्तरापथाः सर्वशस्त्रास्त्र
कुशलास्ते रक्षंतु पितामहं अरक्ष्यमाणं हि वृको हन्यात् सिंहं महावने मा सिंहं जंबुकेनेव घातयेथाः शिखंडि
ना सव्यं चक्रं युधामन्युरुत्तमौजाश्च दक्षिणं गोप्तारौ पांडवस्यैतौ फाल्गुनो हि शिखंडिनः संरक्ष्यमाणः पा
र्थेन भीमेन च विवर्जितः यथा न हन्याद्गांगेयं दुःशासन तथा कुरु भीष्मपर्वणि धृतराष्ट्र गर्दननाम संज
य उवाच ततो रजन्यां व्युष्टायां शब्दः समभवन्महान् क्रोशतां भूमिपालानां युज्यतां युज्यतामिति शंखदुंदु
भिनिर्घोषैः सिंहनादैश्च भारत हयह्रेषितशब्दैश्च रथनेमिस्वनैस्तथा गजानां बृंहितैश्चैव योधानां चा
भिगर्जतां क्ष्वेडितास्फोटितोत्क्रुष्टैस्तुमुलं सर्वतोऽभवत् उदतिष्ठन्महाराज सर्वं युक्तमशेषतः सूर्योदये
महत्सैन्यं कुरुपांडवसेनयोः तव राजेंद्र पुत्राणां पांडवानां तथैव च दुःप्रधृष्याणि चारूणि शस्त्राणि

कवचानिच तत:प्रकाशेसैन्यानिसमदृश्यंतभारत त्वदीयानांपरेषांचशास्त्रवंतिमहांतिच तत्रनानारथा
श्चैवजांबूनदपरिस्कृता: विभ्राजमाना दृश्यंतेमेघाइवसविद्युत: रथानीकान्यदृश्यंतनगराणिचसर्वश:
अतीवशुशुभेतत्रपितातेपूर्णचंद्रवत् धनुर्भि:ऋष्टिभि:खड्गैर्गदाभि:शक्तितोमरै: परिघा:प्रहरणै:शु
भै:स्वेष्वनीकेष्ववस्थिता: गजा रथा:पदाताश्चतुरंगाश्चविशांपते व्यतिष्ठन्वागुराकारा:शतशोथसहस्र
श: कांचनामतिचित्रांगाज्वलंतइवपावका: अर्चिष्मंतोव्यदृश्यंत ध्वजाराज्ञांसहस्रश: महेंद्रकेतव:शुभ्रा
महेंद्रसदनेष्विव सन्नद्धास्तेषुवीरा ददृशु:युद्धकांक्षिण: उद्यतैरायुधैश्चित्रतलबद्धकलापिन:
ममकक्षामनुष्येंद्राश्चमूमुखगताबभु: शकुनि:सौबल:शल्योमहावाद्रुजयद्रथ: विंदानुविंदौकेकया:कां
बोजश्चसुदक्षिण: श्रुतायुश्चकलिंगश्चजयत्सेनश्चपार्थिव: बृहद्बलश्चकौशल्य:कृतवर्माचसात्वत:
सर्वेतेपुरुषव्याघ्रा:शूरा:परिघबाहव: अक्षौहिणीनांहिपतयोयज्वानोभूरिदक्षिणा: एतेचान्येचब
हवोदुर्योधनवशानुगा: राजानोराजपुत्राश्चनीतिमंतोमहाबला: सन्नद्धासमदृश्यंतसेष्वनीकेष्ववस्थि
ता: बद्धकृष्णाजिना:सर्वेध्वजिनोमुंजमालिन: सृष्टादुर्योधनस्यार्थेब्रह्मलोकायदीक्षिता:

समरुद्धा दृष्ट्वा वाहिन्यस्तथा गरुढव्यवस्थिताः एकादशी धार्त्तराष्ट्री कौरवाणां महाचमू अग्रतः सर्वसैन्या
नां यस्यां शांतनवोग्रणीः श्वेतोष्णीषं श्वेतहयं श्वेतवर्माणमच्युतं अपश्याम महाराज भीष्मं चंद्रमिवो
दितं हेमतालध्वजं भीष्मं राजते स्यंदने स्थितं श्वेताभ्रमिव तीक्ष्णांशुं ददृशुः कुरुपांडवाः दृष्ट्वा चमूमुखं तत्र स
मकंपत पांडवाः संजयाश्च महेष्वासा धृष्टद्युम्नपुरोगमाः जृंभमाणं यथा सिंहं दृष्ट्वा क्षुद्रमृगा वने धृष्टद्युम्नमु
खाः सर्वे समुद्विविजिरे मुहुः एकादशैताः श्रीयुक्ता वाहिन्यस्तव भारत पांडवानां यथा सप्त महापुरुषपालिताः
उन्मत्तमकरावर्त्तौ महाग्राहसमाकुलौ युगांते समुपेतौ द्वौ दृश्यते सागराविव नैव नस्तादृशो राजन्दृष्टपूर्वो न च श्रु
तः अनीकानां समेतानां समुदायस्तथाविधः भीष्मपर्वणि पृतनाविभागो संजय उवाच यथा स भगवान्व्या
सः कृष्णद्वैपायनोब्रवीत् तथैव सहिताः सर्वे समाजग्मुर्महीक्षितः मघाविषयगः सोमस्तद्दिनं प्रत्यपद्यत दी
प्यमानाश्च संपेतुर्दिवि सप्त महाग्रहाः द्विधाभूत इवादित्य उदये प्रत्यदृश्यत ज्वलंत्या शिखया भूयो भानुमानु दितो
दिवि ववाशिरे च दीप्तायां दिशि गोमायुवायसाः लिप्समानाः शरीराणि मांसशोणितभोजनाः अहन्यहनि पार्था
नां कुरुवृद्धः पितामहः भरद्वाजात्मजश्चैव प्रातरुत्थाय संयतौ जयोस्तु पांडुपुत्राणामित्यूचतुररिंदमौ युयुधा
ते न वार्थाय यथा स समयः कृतः सर्वधर्मविशेषज्ञः पिता देवव्रतस्तव समानीय महीपालानिदं वचनमब्र

भीष्म. वीत द्वंद्वः क्षत्रिया द्वारं स्वर्गायाऽपावृतं महत् गछध्वं तेन शक्रस्य ब्रह्मणश्च सलोकतां एष नः शाश्वतः पं
२१ थाः पूर्वैः पूर्वतरैर्गतः संभावयत चात्मानमव्यग्रमनसो युधि नाभागो हि ययातिश्च मांधाता नहुषो नृपः सं
सिद्धाः परमं स्थानं गताः कर्मभिरीदृशैः अधर्मः क्षत्रियस्यैष यद्व्याधिमरणं गृहे यदाजौ निधनं प्राप्य सोऽस्य
धर्मः सनातनः एवमुक्ता महीपाला भीष्मेण भरतर्षभ निर्ययुः स्वान्यनीकानि शोभयंतो रथोत्तमैः स तु
वैकर्तनः कर्णः सामात्यः सह बंधुभिः न्यासितः समरे शस्त्रं भीष्मेण भरतर्षभ अपेतकर्णाः पुत्रास्ते राजान
श्चैव तावकाः निर्ययुः सिंहनादेन नादयंतो दिशो दश श्वेतछत्रैः पताकाभिर्ध्वजवारणवाजिभिः तान्यनीका
न्यशोभंत रथैरथ पदातिभिः भेरीपणवशब्दैश्च पटहानां च निस्वनैः रथनेमिनिनादैश्च बभूव लुलिता म
ही कांचनांगदकेयूरैः कार्मुकैश्च महारथाः भ्राजमाना व्यदृश्यंत साग्नयः पर्वता इव तालेन महता भीष्मः
पंचतारेण केतुना विमलादित्यसंकाशस्तस्थौ कुरुचमूपतिः ये त्वदीया महेष्वासा राजानो भरतर्षभ अ
वर्तंत यथादेशं राजन् शांतनवस्य ते सानुगो वासवसमः सहितः सर्वराजभिः ययौ मातंगराजेन राजा हेम राम
पताकिना पद्मवर्णस्त्वदीयानां सर्वेषामग्रतः स्थितः अश्वत्थामा ययौ तत्र सिंहलांगूलकेतनः श्रुतायुधा २१
श्चित्रसेनः पुरुमित्रो विविंशतिः शल्यो भूरिश्रवाश्चैव विकर्णश्च महारथः एते सप्त महेष्वासा द्रोणपु

रोगमाः स्यंदनैर्वरवर्माणोभीष्मश्रीमन्पुरःसराः तेषामपिमहोत्सेधाः शोभयंतोरथोत्तमान् भ्राजमा
नाध्यदृश्यंतजांबूनदमहाध्वजाः जांबूनदमयीवेदीकमंडलविभूषितः केतुराचार्यमुख्यस्यद्रोणस्यधनु
षासह अनेकशतसाहस्रमनीकमनुवर्षतिः महान्दुर्योधनस्यासीन्नागोमणिमयोध्वजः तस्यपौरवकालिं
गाःकांबोजश्चसुदक्षिणः क्षेमधन्वासुमित्रश्चतस्थुःप्रमुखतोरथाः स्यंदनेनमहार्हेणकेतुनावृषभेणच
प्रकर्षन्निवसेनाग्रंमागधस्तुनृपोययौ तदंगपतिनागुप्तंकृपेनचमहात्मना शारदाभ्रघनप्रख्यंप्राच्या
नामभवद्बलं अनीकप्रमुखेतिष्ठन्वराहेणमहायशाः शुशुभेकेतुम
ताग्रेणतस्यामन्वयावर्तिनः अश्वेनागसहस्राणिसादिनामयुतानिषट् तत्सिंधुपतिनाराज्ञापालितंध्व
जिनीमुखं यावंतुरथनागाश्चशुभंशोभनमहाबलं षष्ट्यारथसहस्रैस्तुगजोनामयुतेनच पतिसर्वकलिंगा
नांययौकेतुमतासह तस्यपर्वतसंकाशाव्यरोचंतमहागजाः महावीरैःपताकाभिश्चशोभिताः
शुशुभेकेतुमुख्येनपावकेनकलिंगजः श्वेतछत्रेणनिष्केनचामरव्यजनेनच केतुमानपिमातंग[illegible]
मांकुशं आस्थितःसमरेराजन्मेघस्थइवभानुमान् तेजसादीप्यमानस्तुवारणोत्तममास्थितः भगदत्तो
ययौराजायथावज्रधरस्तथा गजस्कंधगतावास्तांगोशीर्षवानसंमितौ विंदानुविंदावावंत्योकेतुमंतमनुव्रतौ

सरथानीकवान्व्यूहोहस्तिगोत्रमशीर्षवान् वाजिपक्षःपतन्नुग्रः विहितोराजन्दरा
त्मशांतनवेनच तथैवाचार्यपुत्रेणबाल्हीकेनकृपेणच भीष्मपर्वणिव्यूहरचने संजयउवाच ततःकिल
कलाशब्दोहद्दकंपयकंपनः व्यश्रूयतमहाराजयोधानांप्रयुज्यतां शंखदुंदुभिनिर्घोषैर्वारणानांच
बृंहितैः रथानांनेमिघोषैश्च दीर्यतेवसुधरा हयानांहेषमाणानांयोधानांचैवगर्जतां क्षणेनखंदि
शोभूमिःशब्देनापूरितंतदा पुत्राणांतवदुर्द्धर्षपांडवानांतथैवच समकंपंतसैन्यानिपरस्परमानमी
क्षितां तत्रनागारथाश्चैवजांबूनदविभूषिताः भ्राजमानाव्यदृश्यंतमेघाइवसविद्युतः ध्वजाश्चविविधाका
रास्तावकानांनराधिप कांचनांगादिनोरेजुः पावकाः ज्वलिताःपावकाइव स्वेषांचैवपरेषांचसमदृश्यंत
भारत महेंद्रकेतवःशुभ्रामहेंद्रसदनेष्विव कांचनैःकवचैर्वीराज्वलनार्कसमप्रभाः सन्नद्धाप्रत्यदृ
श्यंतग्रहाःप्रज्वलिताइव उद्यतैरायुधैश्चित्रैस्तलबद्धाःपताकिनः ऋषभाक्षामहेष्वासाश्चमूमुखगता
स्प बभुः भीष्मंपुत्रास्तव नराधिप दुःशासनोदुर्विषहोदुर्मुखोदुःसहस्तथा विविंशतिश्चित्रसेनोवि राम
कर्णश्चमहारथः सत्यव्रतःपुरुमित्रोजयोभूरिश्रवाशलः रथाविंशतिसाहस्रास्तथैषामनुया २२
यिनः अभीषाहाःशूरसेनाःशिबयोऽथवसातयः शाल्वामत्स्यास्तथांबष्ठास्त्रिगर्ताकेकयास्तथा

सौवीराः केतुमालाश्च प्राच्योदीच्यवासिनः द्वादशैते जनपदाः सर्वे शूराः स्तनुत्यजाः महतारथवंशेनते
ऽभ्यरक्षन्पितामहं अनीकं दशसाहस्रं कुंजराणां तरस्विनां नरपतिस्त्वद्दूयानीकमन्वयात् रथानां चक्ररक्षाश्च पादर
क्षाश्च दंतिनः अभवद्वाहिनी मध्ये श्रातानामयुतानि षट् पदाताश्चाग्रतो गच्छन्धनुश्चर्मासिपाणयः अनेकश
तसाहस्रा नखरप्रासयोधिनः अक्षौहिण्या दशैकाचतव पुत्रस्य भारत सा दृश्यते महाराज गंगेव यमुनांतरा इति
भीष्मपर्वणि धृतराष्ट्र उवाच अक्षौहिण्या दशैकाचव्यूढां दृष्ट्वा युधिष्ठिरः कथमल्पेन सैन्येन प्रत्यव्यूहत पां
डवः यो वेदमानुषं व्यूहं दैवं गांधर्वमासुरं कथं भीष्मं स कौंतेयः प्रत्यव्यूहत संजय संजय उवाच धार्तराष्ट्राण्यनी
कानि दृष्ट्वा व्यूढानि पांडव अभ्यभाषत धर्मात्मा धर्मराजो धनंजयं र्वचनात्तात वेदयंति बृहस्पतेः संह
तान्योधयेदल्पान्कामं विस्तारयेद्बहून् सूचीमुखमनीकं स्यादल्पानां बहुभिः सह युद्धो घोरोनल्पी
यसुतरां परैः एतद्वचनमाज्ञाय महर्षेर्व्यूहपांडव तच्छ्रुत्वा धर्मराजस्य प्रत्यभाषत पांडवः एष व्यूहामि ते व्यूहं रा
जसत्तम दुर्जयं अचलं नाम वज्राख्यं विहितं वज्रपाणिना यः स वात इवोद्धूतः समरे दुःसहः परैः स नः पुरो यो
त्स्यते वै भीमः प्रहर्ता वरः तेजांसि रिपुसैन्यानां मृद्नन्पुरुषसत्तमः अग्रेग्रणीर्यास्यति नो युद्धोपायविचक्ष
णः यं दृष्ट्वा कुरवः सर्वे दुर्योधनपुरोगमाः निवर्त्स्यंति संत्रस्ताः सिंहं क्षुद्रमृगा यथा तं सर्वे संश्रयिष्या

भीष्म॰ २३ मः प्राकारमकुतोभयाः भीमं प्रहरतां श्रेष्ठं देवराजमिवामराः न हि सोस्ति पुमांल्लोके यः संक्रुद्धं वृकोदरं द्रष्टुमत्यु
ग्रकर्माणं विषहेद्भरतर्षभ एवमुक्त्वा महाबाहुस्तथा चक्रे धनंजयः व्यूह्य तानि बलान्याशु प्रययौ फाल्गुनस्तदा
संप्रयातान्कुरून्दृष्ट्वा पांडवानां महाचमूः गंगेव पूर्णा स्तिमिता स्यंदमाना व्यदृश्यत भीमसेनोग्रणीस्तेषां धृष्टद्यु
म्नश्च वीर्यवान् नकुलः सहदेवश्च धृष्टकेतुश्च पार्थिव विराटश्च ततः पश्चाद्राजाप्यक्षौहिणीपतिः भ्रातृभिः
सह पुत्रैश्च सोभ्यरक्षत पृष्ठतः चक्ररक्षौ तु भीमस्य माद्रीपुत्रौ महाद्युती द्रौपदेयाः ससौभद्राः पृष्ठगोपास्तरस्वि
नः धृष्टद्युम्नश्च पांचालास्तेषां गोप्ता महारथः सहितः पृतनाशूरै रथमुख्यैः प्रभद्रकैः शिखंडी तु ततः पश्चादर्जुनेना क्ष्रे ६
भिरक्षितः यत्तो भीष्मविनाशाय प्रययौ भरतर्षभ पृष्ठतोप्यर्जुनस्यासीद्युयुधानो महाबलः चक्ररक्षौ तु पांचा
ल्यौ युधामन्यूत्तमौजसौ केकया धृष्टकेतुश्च चेकितानश्च वीर्यवान् भीमसेनो गदां बिभ्रद्वज्रसारमयीं दृढां
वि ७ चरन्वेगेन महता समुद्रमपि शोषयेत् एते तिष्ठंति सामात्याः प्रेक्षकास्ते जनाधिपाः धृतराष्ट्रस्य दायादा इति
बीभत्सुरब्रवीत् भीमसेनं तदा राजन्दर्शयन्स महाबलं ब्रुवाणं तु तथा पार्थं सर्वसैन्यानि भारत अपूजयंस्त राम
दा वाग्भिरनुकूलाभिराहवे राजा तु मध्यमानीके कुंतीपुत्रो युधिष्ठिरः बृहद्भिः कुंजरैर्मत्तैश्चलद्भिरचलैरिव २२
अक्षौहिण्या च पांचाल्यो यज्ञसेनो महामनाः विराटमन्वयात्पश्चात्पांडवार्थे पराक्रमी तेषामादित्यचंद्रा

भाः कनकोज्ज्वलभूषणाः निर्ययुः सिंहनादेन नादयंतो दिशो दश श्वेतच्छत्रैः पताकाभिर्जवारणवाजिभिः
तान्यनीकान्यशोभंत रथैरथपदातिभिः भेरीपणवशब्देश्च पटहानां च निस्वनैः नानाविरूधराराजन्नयेषा
त्यमहाध्वजः समुत्सार्यंत नपश्चाद्दृष्टपुत्रो महारथ भ्रातृभिः सहपुत्रैश्च सोभ्यरक्षद्युधिष्ठिरं त्वदीया
नां परेषां च रथेषु विपुला ध्वजान् अभिभूयार्जुनस्यैको ध्वजेन स्थो महाकपिः पदातास्त्वग्रतो गच्छन्नसिप्रा
सचर्म्मपाणयः अनेकशतसाहस्रा भीमसेनस्य रक्षिणः वारणा दशसाहस्राः प्रभिन्नकरटामुखाः
शूराहेममयैर्जालैर्दीप्यमाना इवाचलाः क्षरंत इव जीमूता महार्हाः पद्मगंधिनः राजानमन्वयुः पश्चाज्जी
मूता इव वार्षिकाः भीमसेनो गदां भीमां प्रकर्षन्परिघोपमां प्रचकर्ष महत्सैन्यं दुराधर्षो महामनाः तं
मर्कमिव दुःप्रेक्ष्यं तपंतमिव वाहिनीं न शेकुः सर्वयोधास्ते प्रतिवीक्षितुमंतिके वज्रोनामैष स व्यूहो नि
र्भयः सर्वतोमुखः चापविद्युद्ध्वजो घोरो गुप्तो गांडीवधन्विना यं प्रतिव्यूह्य तिष्ठंति पांडवास्तव वाहि
नीं अजेयो मानुषे लोके पांडवैरभिरक्षितः संध्यां तिष्ठत्सु सैन्येषु सूर्यस्योदयनं प्रति प्रावात्सपृषतो वा
युर्निरभ्रे स्तनयित्नुमान् विष्वग्वाताश्च विववुर्नीचैः शर्करकर्षिणः रजश्चोद्धूयत महत्तमश्च्छादयज्ज
गत् पपात महती चोल्का प्राङ्मुखी भरतर्षभ उद्यंतं सूर्यमाहत्य व्यशीर्यत महास्वना अथ सज्जीय

मानेषु सैन्येषु भरतर्षभ निःप्रभोभ्युदयोत्सूर्यः सघोषं च चालह व्यशीर्यत स नादश्च भूस्तदा भरतर्षभ नि
र्घातबहवो राजन् दिक्षु सर्वासु चाभवन् प्रादुरासीद्रजस्तीव्रं न प्रज्ञायत किंचन ध्वजानां धूयमानानां सहसा
मातरिश्वना किंकिणीजालबद्धानां कांचनस्रग्वरांबरैः महतां सपताकानामादित्यसमतेजसां सर्वं रु
णरुणीभूतमासीत्तालवनेष्विव एवं ते पुरुषव्याघ्राः पांडवा युद्धनंदिनः व्यवस्थिताः प्रतिव्यूह्य तव पु
त्रस्य वाहिनीं स्रंसंतेइव मज्जानो योधानां भरतर्षभ दृष्ट्वाग्रतो भीमसेनं गदापाणिमवस्थितं भीष्मपर्व
णि पांडवसेनाविन्यासो नाम धृतराष्ट्र उवाच सूर्योदये संजय के नु पूर्वं युयुत्सवो हृष्यमाना इवासन्
मामका वा भीष्मनेत्राः समीपे पांडवा वा भीमनेत्रास्तदानीं केषां जघन्यौ सोमसूर्यौ सवायू केषां सेनां
श्वापदाश्च भवंत केषां यूनां मुखवर्णाः प्रसन्नाः सर्वं ह्येतद्ब्रूहि मे त्वं यथावत् संजय उवाच उभे सेने
तुल्यमिवोपजाते उभे व्यूहे हृष्टरूपे नरेंद्र उभे चित्रे वनराजिप्रकाशे तथैव चोभे नागरथाश्वपूर्णे उभे
सेने बृहती भीमरूपे तथैव चोभे भारत दुर्विषह्ये तथैव चोभे स्वर्गजयाय सृष्टे तथैव चोभे सत्पुरुषोपजुष्टे
पश्चान्मुखाः कुरवो धार्तराष्ट्राः स्थिताः पार्थाः प्राङ्मुखा योत्स्यमानाः दैत्येंद्रसेनेव च कौरवाणां देवेंद्रसे
नेव च पांडवानां चक्रे वायुः पृष्ठतः पांडवानां धार्तराष्ट्रान् श्वापदा व्याहरंत गजेंद्राणां मदगंधांश्च ती

द्वा त्रिंसे हिरैतवपुत्रस्य नागाः दुर्यो धना हस्तिनं पद्मवर्णोकृष्णं जालवंतं प्रभिन्नं समास्थितो मध्यगतः
कुरूणां संस्तूयमानो वंदिभिर्मागधैश्च चंद्रप्रभं श्वेतमस्यातपत्रं सोवर्णी स्रग्राजति चोत्तमागं तं सर्वतः
शकुनिः पार्वतीयेः सार्द्धं गांधारैर्याति गांधार राजः भीष्मोग्रतः सर्वसैन्यस्य वृद्धः श्वेत छत्रः श्वेत ध
नुः सरवङ्गः श्वेतोष्णीषः पांडुरेण ध्वजेन श्वेतैरश्वैः श्वेत शैल प्रकाशेः तस्य सैन्ये धार्त्तराष्ट्राश्च सर्वे
वाह्लीकानामेकदेशाः शलश्च येचांबष्टाः क्षत्रियाये च सिंधौ तथा सौवीराः पंचनदाश्च शूराः शोणैर्हयैरु
क्मरथो महात्मा द्रोणो धनुष्पाणिरदीनसत्वः आस्ते गुरुः प्रायशः सर्वराज्ञां पश्चाच्चमूमिंद्र इवाभि भा
ति वार्द्धक्षत्रिः सर्वसैन्यस्य मध्ये भूरिश्रवाः पुरुमित्रो जयश्च शाल्वा मत्स्याः केकयाश्चापि सर्वे गजानीकै
र्भ्रातरो योत्स्यमानाः शारद्वतश्चोत्तरधूर्महात्मा महेष्वासो गोतमश्चित्रयोधी शकैः किरातैर्यवनैः पह्लू
वैश्च सार्द्धं चमूमुत्तरतोभियाति महारथैर्वृष्णिभोजैः सुराष्ट्रैर्विदितै राजशस्त्रैः बृहद्बलं कृतव सु ७
र्माभिगुप्तं बलं त्वदीयं दक्षिणेनाभियाति संशप्तकानामयुतं रथानां मृत्युर्जयो वार्जुनस्येति सृष्टाः ये
नार्जुनस्तेन राजन्कृतास्त्राः प्रयाता रस्ते त्रिगर्त्ताश्च शूराः साग्रं शतसहस्रं तु नागानां तव भारत नागे ना
गे रथशतं शतमश्वा रथेरथे

भीष्म॰
२५

राम
२५

भीष्म॰
२६

श्वेतामरेणः सहस्रसूर्यः शतकिंकिनीकः परार्ध्यजंबूनदहेमचित्रः रथोर्जुनस्याग्निरिवांशुमालीविभ्राजतेश्वे
तहयः सुचक्रः तमास्थितः केशवसंगृहीतं कपिध्वजो गांडिवबाणपाणिः धनुर्धरोयस्यसमः पृथिव्यांनविद्य
तेनोभविता कदाचित् उद्वर्तयिष्यंस्तवपुत्रसेनामतीवरौद्रंसविभर्त्तिरूपं अनायुधोयः सभुजोभुजाभ्यांनरा
श्वनागान्युधिभस्मकुर्यात् सभीमसेनः सहितोयमाभ्यांवृकोदरोवीररथस्यगोप्ता तंतत्रसिंहर्षभमत्तखेलंलोके
महेंद्रप्रतिमानकल्पं समीक्ष्यसेनाग्रगतंदुरासदंसंविव्यथुः पंकगतायथाद्विपाः वृकोदरंवारणराजदर्पंयो
धास्तदीयाभयविग्नसत्वाः अनीकमध्येतिष्ठंतंराजपुत्रंदुरासदं अब्रवीद्भरतश्रेष्ठगुडाकेशंजनार्दनः वासुदे
वउवाच यएषरोषात्प्रतपन्बलस्थोयोनःसेनांसिंहइवावरक्षत् सएषभीष्मःकुरुराजकेतुर्येनाहृतास्त्रिंश
तावाजिमेधाः एतान्यनीकानिमहानुभावंगूहंतिमेघाइवरश्मिवंतं एतानिहत्वापुरुषप्रवीरंकांक्षस्वयुद्धंभर
तर्षभेण संजयउवाच धार्तराष्ट्रबलंदृष्ट्वायुद्धायसमुपस्थितं पराजयायशत्रूणांदुर्गास्तोत्रमुदीरय एवमु
क्तोर्जुनः संख्येवासुदेवेनधीमता अर्जुनस्यहितार्थायकृष्णोवचनमब्रवीत् श्रीभगवानुवाच शुचिर्भूत्वामहाबा
हो संग्रामाभिमुखेस्थितः पराजयायशत्रूणांदुर्गास्तोत्रमुदीरय संजयउवाच ए[illegible]कोर्जुनःसंख्येवासुदे
वेनधीमता अवतीर्यरथात्पार्थःस्तोत्रमाहकृतांजलिः अर्जुनउवाच ॐनमस्ते[illegible]सेनानिआर्येमंदरवासिनि राम
कुमारिकालिकापालिकपिलेकृष्णपिंगले भद्रकालिनमस्तुभ्यंमहाकालिनमोस्तुते चंडिचंडेनमस्तुभ्यंतार २६

णी वरवर्णिनि कात्यायिनि महाभागे करालि विजये जये शिखिपिछ्छध्वजधरे नानाभरणभूषिते
अट्टशूलप्रहरणे खड्गखेटकधारिणि गोपेंद्रस्यानुजे ज्येष्टे नंदगोपकुलोद्भवे महिषासृक्प्रिये नित्यं कौ
शिकी पीतवासिनी अट्टहासे कोकमुखे नमस्तेस्तु रणप्रिये उमे शाकंभरि श्वेते कृष्णे कैटभनाशिनि हिर
ण्याक्षि विशालाक्षि सुधूम्राक्षि नमोस्तु ते वेदश्रुति महापुण्ये ब्रह्मण्ये जातवेदसि जंबूकटकचैतेषु नित्यं स
न्निहितालये त्वं ब्रह्मविद्याविद्यानां महानिद्रा च देहिनां स्कंदमातर्भगवति दुर्गे कांतारवासिनि स्वाहाका
रः स्वधा चैव कला काष्ठा सरस्वती सावित्री वेदमाता च तथा वेदांत उच्यते स्तुतासि त्वं महादेवि विशुद्धेनांतरा
त्मना जयो भवति मे नित्यं त्वत्प्रसादाद्रणप्रिये कांतारभयदुर्गेषु भक्तानां पालनेषु च नित्यं वससि पाता
ले युद्धे जयसि दानवान् त्वं जंभनी मोहनी माया ह्रीः श्रीस्तथैव च संध्या प्रभावती चैव सावित्री जननी तथा
तुष्टिः पुष्टिर्धृतिर्दीप्तिश्चंद्रादित्यविवर्द्धिनी भूतिर्भूतिमतां संख्ये वीक्ष्यसे सिद्धचारणैः संजय उवाच ततः
पार्थस्य विज्ञाय भक्तिं मानववत्सला अंतरिक्षगतोवाच गोविंदस्याग्रतः स्थिता देव्युवाच स्वल्पेनैव तु का
लेन शत्रून् जेष्यसि पांडव नरस्त्वमसि दुर्द्धर्ष नारायणसहायवान् अजेयस्त्वं रणेरीणामपि वज्रभृतः
स्वयं इत्येवमुक्त्वा वरदा क्षणेनांतरधीयत लब्ध्वा वरं तु कौंतेय मेने विजयमात्मनः यक्षरक्षःपिशाचेभ्यो
न भयं विद्यते सदा न चापि रिपवस्तेभ्यः सर्प्पाद्या ये च दंष्ट्रिणः न भयं विद्यते तस्य सदा राजकुलादपि

भीष्म. विवादे जयमाप्नोति बद्धो मुच्यति बंधनात् दुर्गं तरति चावश्यं तथा चौरैर्विमुच्यते संग्रामे विजयं नित्यं लक्ष्मीप्राप्नो
२१ ति केवलां आरोग्यबलसंपन्नो जीवेद्वर्षशतं तथा एतद्दृष्टं प्रसादात्तु मया व्यासस्य धीमतः मोहात्वेतौ न जा
नंति नरनारायणावृषी तव पुत्रा दुरात्मानः सर्वे मन्युवशानुगाः प्राप्तकालमिदं वाक्यं कालपाशेन गुं
ठिताः द्वैपायनो नारदश्च कण्वो रामस्तथानघः अवारयंस्तव सुतं न चासौ तद्गृहीतवान् यत्र धर्मो द्युतिः
कीर्तिः यत्र ह्रीः श्रीस्तथा मतिः यतो धर्मस्ततः कृष्णो यतः कृष्णस्ततो जयः भीष्मपर्वणि कात्यायनीस्तवः
धृतराष्ट्र उवाच केषां प्रहृष्टास्तत्राग्रे योधा युध्यंति संजय उदग्रमनसः के वा के वा दीना विचेतसः के पूर्वं
प्रहरंस्तत्र युद्धे हृदयकंपने मामकाः पांडवेया वा तन्ममाचक्ष्व संजय कस्य सेनासमुदये गंधमाल्यस
विद समुद्भवः वाचः प्रदक्षिणाश्चैव योधानामभिगर्जतां संजय उवाच उभयोः सेनयोस्तत्र योधा जहृषिरे तथा स्र
जः समाः सुगंधानामुभयेत्र समुद्भवः संहतानामनीकानां व्यूढानां भरतर्षभ संसर्गात्समुदीर्णानां विमर्दः सु
महानभूत् वादित्रशब्दस्तुमुलः शंखभेरीविमिश्रितः कुंजराणां च नदतां सैन्यानां च प्रहृ
जनन्महान्व्यतिकरोऽभवत् अन्योन्यं वीक्षमाणानां योधानां भरतर्षभ कुंजराणां च नदतां सैन्यानां च प्रहृ राम
ष्यतां भीष्मपर्वणि पांडवसेनावर्णने धृतराष्ट्र उवाच धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः मामकाः २७
पांडवाश्चैव किमकुर्वत संजय संजय उवाच दृष्ट्वा तु पांडवानीकं व्यूढं दुर्योधनस्तदा आचार्यमुपसंग

जेरी०

म्यराजा वचनमब्रवीत् पश्यैतां पांडुपुत्राणामाचार्य महतीं चमूं व्यूढां द्रुपदपुत्रेण तव शिष्येण धीमता अत्र
शूरा महेष्वासा भीमार्जुनसमा युधि युयुधानो विराटश्च द्रुपदश्च महारथः धृष्टकेतुश्चेकितानः काशिराजश्च
वीर्यवान् पुरुजित्कुंतिभोजश्च शैब्यश्च नरपुंगवः युधामन्युश्च विक्रांत उत्तमौजाश्च वीर्यवान् सौभद्रो द्रौपदे
याश्च सर्व एव महारथाः अस्माकं तु विशिष्टा ये तान्निबोध द्विजोत्तम नायका मम सैन्यस्य संज्ञार्थं तान्ब्रवीमि ते
भवान्भीष्मश्च कर्णश्च कृपश्च समितिंजयः अश्वत्थामा विकर्णश्च सोमदत्तिर्जयद्रथः अन्ये च बहवः शूरा मदर्थे
त्यक्तजीविताः नानाशस्त्रप्रहरणाः सर्वे युद्धविशारदाः अपर्याप्तं तदस्माकं बलं भीष्माभिरक्षितं पर्याप्तं त्वि
दमेतेषां बलं भीमाभिरक्षितं अयनेषु च सर्वेषु यथाभागमवस्थिताः भीष्ममेवाभिरक्षंतु भवंतः सर्व एव हि
संजय उवाच तस्य संजनयन्हर्षं कुरुवृद्धः पितामहः सिंहनादं विनद्योच्चैः शंखं दध्मौ प्रतापवान् ततः शं
खाश्च भेर्यश्च पणवानकगोमुखाः सहसैवाभ्यहन्यंत स शब्दस्तुमुलोऽभवत् ततः श्वेतैर्हयैर्युक्ते महति
स्यंदने स्थितौ माधवः पांडवश्चैव दिव्यौ शंखौ प्रदध्मतुः पांचजन्यं हृषीकेशो देवदत्तं धनंजयः पौंड्रं
दध्मौ महाशंखं भीमकर्मा वृकोदरः अनंतविजयं राजा कुंतीपुत्रो युधिष्ठिरः नकुलः सहदेवश्च सुघोष

मणिपुष्पकौ काश्यश्च परमेष्वासः शिखंडी च महारथः धृष्टद्युम्नो विराटश्च सात्यकिश्चापराजितः द्रुपदो
द्रौपदेयाश्च सर्वशः पृथिवीपते सौभद्रश्च महाबाहुः शंखान्दध्मुः पृथक्पृथक् सुघोषो धार्त्तराष्ट्राणां हृ
दयानि विदारयत् नभश्च पृथिवीं चैव तुमुलो व्यनुनादयन् अथ व्यवसितान्दृष्ट्वा धार्त्तराष्ट्रान्कपिध्वजः
प्रहृत्ते शस्त्रसंपाते धनुरुद्यम्य पांडवः हृषीकेशं तदा वाक्यमिदमाह महीपते अर्जुन उवाच सेनयोरुभयो
र्मध्ये रथं स्थापय मेच्युत यावदेतान्निरीक्षेहं योद्धुकामानवस्थितान् कैर्मया सह योद्धव्यमस्मिन्रणसमु
द्यमे योत्स्यमानानवेक्षेहं य एते त्र समागताः धार्त्तराष्ट्रस्य दुर्बुद्धेर्युद्धे प्रियचिकीर्षवः संजय उवाच एवमु
क्तो हृषीकेशो गुडाकेशेन भारत सेनयोरुभयोर्मध्ये स्थापयित्वा रथोत्तमं भीष्मद्रोणप्रमुखतः सर्वेषां च म
हीक्षितां उवाच पार्थ पश्यैतान्समवेतान्कुरूनिति तत्रापश्यत्स्थितान्पार्थः पितृनथ पितामहान् कृपयाप
रयाविष्टः सीदमानोब्रवीदिदं अर्जुन उवाच दृष्ट्वेतान्स्वजनान्कृष्ण युयुत्सून्समवस्थितान् सीदंति मम गा
त्राणि मुखं च परिशुष्यति वेपथुश्च शरीरे मे रोमहर्षश्च जायते गांडीवं स्रंसते हस्तात्त्वक्चैव परिदह्यते न
च शक्नोम्यवस्थातुं भ्रमतीव च मे मनः निमित्तानि च पश्यामि विपरीतानि केशव न च श्रेयोनपश्यामि हत्वा स्व

आचार्यामातुलाभ्रातृन्पुत्रान्पौत्रान्सखींस्तथा
श्वसुरान्सुहृदश्चैव सेनयोरुभयोरपि तान्समीक्ष्य स
कौंतेयः सर्वान्बंधून्वस्थितान् ३

जनमाहवे नकांक्षेविजयंकृष्णनचराज्यंसुखानिच किंनोराज्येनगोविंदकिंभोगैर्जीवितेनच येषामर्थेकां
क्षितंनोराज्यंभोगाःसुखानिच तइमेवस्थितायुद्धेप्राणांस्त्यक्त्वाधनानिच आचार्याःपितरःपुत्रास्तथैवच
पितामहाःमातुलाःश्वसुराःपौत्राःश्यालाःसंबंधिनस्तथा एतान्नहंतुमिच्छामिघ्नतोपिमधुसूदन अपि
त्रैलोक्यस्यराज्यस्यहेतोःकिंनुमहीतले निहत्यधार्त्तराष्ट्रान्नःकाप्रीतिःस्याज्जनार्द्दन पापमेवाश्रयेदस्मा
त्हत्वैतानाततायिनः तस्मान्नार्हावयंहंतुंधार्त्तराष्ट्रान्सबांधवान् स्वजनंहिकथंहत्वासुखिनःस्याममा
धव यद्यप्येतेनपश्यंतिलोभोपहतचेतसः कुलक्षयकृतंदोषंमित्रद्रोहेचपातकं कथंनज्ञेयमस्माभिः
पापादस्मान्निवर्त्तितुं कुलक्षयकृतंदोषंप्रपश्यद्भिर्जनार्द्दन कुलक्षयेप्रणश्यंतिकुलधर्माःसनातनाः
नष्टेधर्मेकुलंकृत्स्नमधर्मोभिभवत्युत अधर्माभिभवात्कृष्णप्रदुष्यंतिकुलस्त्रियः स्त्रीषुदुष्टासुवार्ष्णेय
जायतेवर्णसंकरः संकरोनरकायैवकुलघ्नानांकुलस्यच पतंतिपितरोह्येषांलुप्तपिंडोदकक्रियाः दोषै
रेतैःकुलघ्नानांवर्णसंकरकारकैः उत्साद्यंतेजातिधर्माःकुलधर्माश्चशाश्वताः उत्सन्नकुलधर्माणांमनु
ष्याणांजनार्द्दन नरकेनियतंवासोभवतीत्यनुशुश्रुम। अहोवततमहत्पापंकर्तुंव्यवसितावयं यद्राज्यसुख
लोभेनहंतुंस्वजनमुद्यताः यदिमामप्रतीकारमशस्त्रंशस्त्रपाणयः धार्त्तराष्ट्रारणेहन्युस्तन्मेक्षेमतरंभ

भीष्म. वेत् संजयउवाच एवमुक्त्वार्जुनः संख्ये रथोपस्थ उपाविशत् विसृज्य सशरं चापं शोकसंविग्नमानसः
२९ ॐतत्सदिति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे अर्जुनविखादोनामप्रथ
मोध्यायः संजयउवाच तं तथा कृपयाविष्टमश्रुपूर्णाकुलेक्षणं सीदमानमिदं वाक्यमुवाच मधुसूदनः
श्रीभगवानुवाच कुतस्त्वा कश्मलमिदं विषमे समुपस्थितं अनार्यजुष्टमस्वर्ग्यमकीर्तिकरमर्जुन माक्ले
व्यं गछ कौंतेय नैतत्त्वय्युपपद्यते क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परंतप अर्जुनउवाच कथं भीष्ममहं संख्ये
द्रोणं च मधुसूदन इषुभिः प्रतियोत्स्यामि पूजार्हावरिसूदन गुरूनहत्वा हि महानुभावान् श्रेयो भो
निद क्तुं भैक्ष्यमपीह लोके हत्वार्थकामांस्तु गुरूनिहैव भुंजीय भोगान् रुधिरप्रदिग्धान् नचैतद्विद्मः कतरंनो
गरीयो यद्वा जयेम यदि वा नो जयेयुः यानेव हत्वा न जिजीविषामस्तेवस्थिताः प्रमुखे धार्त्तराष्ट्राः का
र्पण्यदोषोपहतस्वभावः पृच्छामि त्वां धर्मसंमूढचेताः यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे शिष्यस्तेहं
शाधि मां त्वां प्रपन्नं नहि प्रपश्यामि ममापनुद्याद्यच्छोकमुच्छोषणमिंद्रियाणां अवाप्य भूमावस राम
पत्नमृद्धं राज्यं सुराणामपि चाधिपत्यं संजयउवाच एवमुक्त्वा हृषीकेशं गुडाकेशः परंतप नयोत्स्या २९
मीति गोविंदमुक्त्वा तूष्णीं बभूव ह तमुवाच हृषीकेशः प्रहसन्निव भारत सेनयोरुभयोर्मध्ये विषी

दंतमिदंवचः श्रीभगवानुवाच अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे गतासूनगतासूंश्च नानुशोचं
ति पंडिताः नत्वेवाहंजातुनाशंनत्वंनेमेजनाधिपाः नचैवनभविष्यामःसर्वेवयमतःपरं देहिनोस्मिन्यथादेहे
कौमारंयौवनंजरा तथादेहांतरप्राप्तिर्धीरस्तत्रनमुह्यति मात्रास्पर्शास्तु कौंतेयशीतोष्णसुखदुःखदाः आग
मापायिनोनित्यास्तांस्तितिक्षस्वभारत यंहिनव्यथयंत्येतेपुरुषंपुरुषर्षभ समदुःखसुखंधीरंसोमृतत्वायक
ल्पते नासतोविद्यतेभावोनाभावोविद्यतेसतः उभयोरपिदृष्टोंतस्त्वनयोस्तत्वदर्शिभिः अविनाशितुतद्वि
द्धियेनसर्वमिदंततं विनाशमव्ययस्यास्यनकश्चित्कर्तुमर्हति अंतवंतइमेदेहानित्यस्योक्ताःशरीरिणः
अनाशिनोऽप्रमेयस्यतस्माद्युध्यस्वभारत यएनंवेत्तिहंतारंयश्चैनंमन्यतेहतं उभौतौनविजानीतोनायं
हंतिनहन्यते नजायतेम्रियतेवाकदाचिन्नायंभूत्वाभविताबानभूयः अजोनित्यःशाश्वतोयंपुराणोनह
न्यतेहन्यमानेशरीरे वेदाविनाशिनंनित्यंयएनमजमव्ययं कथंसपुरुषःपार्थःकंघातयतिहंतिकं वासां
सिजीर्णानियथाविहायनवानिगृह्णातिनरोपराणि तथाशरीराणिविहायजीर्णान्यन्यानिसंयातिनवा
निदेही नैनंछिंदंतिशस्त्राणिनैनंदहतिपावकः नचैनंक्लेदयंत्यापोनशोषयतिमारुतः अछेद्योयमदा
ह्योयमक्लेद्योशोष्यएवच नित्यःसर्वगतःस्थाणुरचलोयंसनातनः अव्यक्तोयमचिंत्योयमविकार्यो

भीष्म॰ यमुच्यते तस्मादेवं विदित्वैनं नानुशोचितुमर्हसि जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च तस्मादपरिहार्ये
३० र्थेन त्वं शोचितुमर्हसि अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत अव्यक्तनिधनान्येव तत्र का परिदेव
ना आश्चर्यवत्पश्यति कश्चिदेनमाश्चर्यवद्वदति तथैव चान्यः आश्चर्यवच्चैनमन्यः शृणोति श्रुत्वाप्येनं वे
द न चैव कश्चित् देही नित्यमवध्योयं देहे सर्वस्य भारत तस्मात्सर्वाणि भूतानि न त्वं शोचितुमर्हसि
स्वधर्ममपि चावेक्ष्य न विकंपितुमर्हसि धर्म्याद्धि युद्धाच्छ्रेयोन्यत्क्षत्रियस्य न विद्यते यदृच्छया चोपप
न्नं स्वर्गद्वारमपावृतं सुखिनः क्षत्रियाः पार्थ लभंते युद्धमीदृशं अथ चेत्त्वमिमं धर्म्यं संग्रामं न करिष्यसि
ततः स्वधर्मं कीर्त्तिं च हित्वा पापमवाप्स्यसि अकीर्त्तिं चापि भूतानि कथयिष्यंति तेव्ययां संभावितस्य चा
कीर्त्तिर्मरणादतिरिच्यते भयाद्रणादुपरतं मंस्यंते त्वां महारथाः येषां च त्वं बहुमतो भूत्वा यास्यसि लाघवं
अवाच्यवादांश्च बहून्वदिष्यंति तवाहिताः निंदंतस्तव सामर्थ्यं ततो दुःखतरं नु किं हतो वा प्राप्स्यसि स्वर्गं
जित्वा वा भोक्ष्यसे महीं तस्मादुत्तिष्ठ कौंतेय युद्धाय कृतनिश्चयः सुखदुःखे समे कृत्वा लाभालाभौ जया राम
जयौ ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि एषा तेभिहिता सांख्ये बुद्धियोगे त्विमां शृणु बुद्ध्या युक्तो १०

जयापार्थ कर्मबंधं प्रहास्यसि नेहाभिक्रमनाशोस्ति प्रत्यवायो न विद्यते स्वल्पमप्यस्य धर्मस्य त्रायते महतो भ
यात् व्यवसायात्मिका बुद्धिरेकेह कुरुनंदन बहुशाखा ह्यनंताश्च बुद्धयोव्यवसायिनां यामिमां पुष्पितां वाचं प्रव
दंत्यविपश्चितः वेदवादरताः पार्थ नान्यदस्तीति वादिनः कामात्मानः स्वर्गपरा जन्मकर्मफलप्रदां क्रियाविशे
षबहुलां भोगैश्वर्यगतिं प्रति भोगैश्वर्यप्रसक्तानां तयापहृतचेतसां व्यवसायात्मिका बुद्धिः समाधौ न विधी
यते त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन निर्द्वंद्वो नित्यसत्वस्थो निर्योगक्षेम आत्मवान् यावानर्थ उ
दपाने सर्वतः संप्लुतोदके तावान्सर्वेषु वेदेषु ब्राह्मणस्य विजानतः कर्मण्येवाधिकारस्ते मा फलेषु कदाचन
मा कर्मफलहेतुर्भूर्मा ते संगोस्त्वकर्मणि योगस्थः कुरु कर्माणि संगं त्यक्त्वा धनंजय सिद्ध्यसिद्ध्योः समो भू
त्वा समत्वं योग उच्यते दूरेण ह्यवरं कर्म बुद्धियोगाद्धनंजय बुद्धौ शरणमन्विछ कृपणाः फलहेतवः
बुद्धियुक्तो जहातीह उभे सुकृतदुःकृते तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलं कर्मजं बुद्धियुक्ता हि फ
लं त्यक्त्वा मनीषिणः जन्मबंधविनिर्मुक्ताः पदं गछंत्यनामयं यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति
तदा गंतासि निर्वेदं श्रोतव्यस्य श्रुतस्य च श्रुतिविप्रतिपन्ना ते यदा स्थास्यति निश्चला समाधावचला
बुद्धिस्तदा योगमवाप्स्यसि अर्जुन उवाच स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव स्थितधीः किं प्रभा

वेतकिमासीत व्रजेतकिं श्रीभगवानुवाच प्रजहाति यदाकामान्सर्वान्पार्थमनोगतान् आत्मन्येवात्मना
तुष्टः स्थितप्रज्ञस्तदोच्यते दुःखेष्वनुद्विग्नमनासुखेषुविगतस्पृहः वीतरागभयक्रोधः स्थितधीर्मुनि
रुच्यते यःसर्वत्रानभिस्नेहस्तत्तत्प्राप्यशुभाशुभं नाभिनंदतिनद्वेष्टितस्यप्रज्ञाप्रतिष्ठिता यदासंहरते
चायंकूर्मोंगानीवसर्वशः इंद्रियाणींद्रियार्थेभ्यस्तस्यप्रतिष्ठिता विषयाविनिवर्त्तंते निराहारस्यदेहिनः
रसवर्ज्जंरसोप्यस्यपरंदृष्ट्वानिवर्त्तते यततोह्यपिकौंतेयपुरुषस्यविपश्चितः इंद्रियाणिप्रमाथीनिहरंति
प्रसभंमनः तानिसर्वाणिसंयम्ययुक्तआसीतमत्परः वशेहियस्यइंद्रियाणितस्यप्रज्ञाप्रतिष्टिता ध्यायतो
विषयान्पुंसःसंगस्तेषूपजायते संगात्संजायतेकामःकामात्क्रोधोभिजायते क्रोधाद्भवतिसंमोहःसंमो
हात्स्मृतिविभ्रमः स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रनश्यति रागद्वेषविमुक्तैस्तुविषयानिंद्रियैश्च
रन् आत्मवश्यैर्विधेयात्माप्रसादमधिगच्छति प्रसादेसर्वदुःखानांहानिरस्योपजायते प्रसन्नचेतसो
ह्याशुबुद्धिःपर्यवतिष्ठते नास्तिबुद्धिरयुक्तस्यनचायुक्तस्यभावना नचाभावयतःशांतिरशांतस्यकुतः
सुखं इंद्रियाणांहिचरतांयन्मनोनुविधीयते तदस्यहरतिप्रज्ञांवायुर्नावमिवांभसि तस्माद्यस्यमहा
बाहोनिगृहीतानिसर्वशः इंद्रियानींद्रियार्थेभ्यस्तस्यप्रतिष्टिता यानिशासर्वभूतानांतस्यांजागर्त्तिसं

यमी यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः आपूर्यमाणमचलप्रतिष्ठं समुद्रमापः प्रविशंति यद्वत्
तद्वत्कामा यं प्रविशंति सर्वे स शांतिमाप्नोति न कामकामी विहाय कामान्यः सर्वान्पुमांश्चरति निस्पृहः निर्ममो
निरहंकारः स शांतिमधिगच्छति एषा ब्राह्मी स्थितिः पार्थ नैनं प्राप्य विमुह्यति स्थित्वास्यामंतकाले
पि ब्रह्मनिर्वाणमृच्छति भीष्मपर्वणि भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे
सांख्ययोगो नाम द्वितीयोऽध्यायः अर्जुन उवाच ज्यायसी चेत्कर्मणस्ते मता बुद्धिर्जनार्दन तत्किं कर्मणि घोरे
मां नियोजयसि केशव व्यामिश्रेणेव वाक्येन बुद्धिं मोहयसीव मे तदेकं वद निश्चित्य येन श्रेयोहमाप्नुयां
श्रीभगवानुवाच लोकेस्मिन्द्विविधा निष्ठा पुरा प्रोक्ता मयानघ ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनां न
कर्मणामनारंभान्नैष्कर्म्यं पुरुषोऽश्नुते न च संन्यसनादेव सिद्धिं समधिगच्छति न हि कश्चित्क्षणमपि जातु
तिष्ठत्यकर्मकृत् कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः कर्मेंद्रियाणि संयम्य य आस्ते मनसा स्मरन् इंद्रि
यार्थान्विमूढात्मा मिथ्याचारः स उच्यते यस्त्विंद्रियाणि मनसा नियम्यारभतेऽर्जुन कर्मेंद्रियैः कर्मयोगमस
क्तः स विशिष्यते नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः शरीरयात्रापि च ते न प्रसिद्ध्येदकर्मणः यज्ञार्थात्
कर्मणोऽन्यत्र लोकोऽयं कर्मबंधनः तदर्थं कर्म कौंतेय मुक्तसंगः समाचर सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजा
पतिः अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक् देवान्भावयतानेन ते देवा भावयंतु वः परस्परं भावयंतः श्रेयः

भी०प० परममवाप्स्यथ इष्टान्भोगान्हिवोदेवादास्यंतेयज्ञभाविताः तैर्दत्तानप्रदायेभ्योयोभुंक्तेस्तेनएवसः यज्ञशिष्टा
३२ शिनःसंतोमुच्यंतेसर्वकिल्बिषैः भुंजंतेतेत्वघंपापायेपचंत्यात्मकारणात् अन्नाद्भवंतिभूतानिपर्जन्या
दन्नसंभवः यज्ञाद्भवतिपर्जन्योयज्ञःकर्मसमुद्भवः कर्मब्रह्मोद्भवंविद्धिब्रह्माक्षरसमुद्भवं तस्मात्सर्वगतंब्र
ह्मनित्यंयज्ञेप्रतिष्ठितं एवंप्रवर्तितंचक्रंनानुवर्त्तयतीहयः अघायुरिंद्रियारामोमोघंपार्थसजीवति यस्त्वा
त्मरतिरेवस्यादात्मतृप्तश्चमानवः आत्मन्येवचसंतुष्टस्तस्यकार्यंनविद्यते नैवतस्यकृतेनार्थोनाकृते
नेहकश्चन नचास्यसर्वभूतेषुकश्चिदर्थव्यपाश्रयः लोकसंग्रहमेवापिसंपश्यन्कर्तुमर्हसि यद्यदाच
रतिश्रेष्ठस्तत्तदेवेतरोजनाः सयत्प्रमाणंकुरुतेलोकस्तदनुवर्त्तते नमेपार्थास्तिकर्त्तव्यंत्रिषुलोकेषुकिंचन
नानवाप्तमवाप्तव्यंवर्त्तएवचकर्मणि यदिह्यहंनवर्त्तेयंजातुकर्मण्यतंद्रितः ममवर्त्मानुवर्त्तंतेमनुष्याःपार्थसर्वशः
उत्सीदेयुरिमेलोकानकुर्यांकर्मचेदहं संकरस्यचकर्त्तास्यादुपहन्यामिमाःप्रजाः सक्ताःकर्मण्यविद्वांसोयथाकु
र्वंतिभारत कुर्याद्विद्वांस्तथासक्तश्चिकीर्षुर्लोकसंग्रहं नबुद्धिभेदंजनयेदज्ञानांकर्मसंगिनां योषयेत्सर्वकर्माणि
विद्वान्युक्तःसमाचरन् प्रकृतेःक्रियमाणानिगुणैःकर्माणिसर्वशः अहंकारविमूढात्माकर्ताहमितिमन्यते तत्व राम
वित्तुमहाबाहोगुणकर्मविभागयोः गुणागुणेषुवर्त्तंतइतिमत्वानसज्जते प्रकृतेर्गुणसंमूढाःसज्जंतेगुणकर्मसु ३२

तानकृत्स्नविदोमंदान्कृत्स्नविन्नविचालयेत् मयिसर्वाणिकर्माणिसन्यास्याध्यात्मचेतसा निराशीनिर्ममोभूत्वायु
ध्यस्वविगतज्वरः येमेमतमिदंनित्यमनुतिष्टंतिमानवाः श्रद्धावंतोनसूयंतोमुच्यंतेतेपिकर्मभिः येत्वेतदभ्य
सूयंतोनानुतिष्टंतिमेमतं सर्वज्ञानविमूढांस्तान्विद्धिनष्टानचेतसः सदृशंचेष्टतेस्वस्याःप्रकृतेर्ज्ञानवानपि प्र
कृतिंयांतिभूतानिनिग्रहःकिंकरिष्यति इंद्रियस्येंद्रियस्यार्थेरागद्वेषौव्यवस्थितौ तयोर्नवशमागछेत्तौह्य
स्यपरिपंथिनौ श्रेयान्स्वधर्मोविगुणःपरधर्मात्स्वनुष्टितात् स्वधर्मेनिधनंश्रेयःपरधर्मोभयावहः अर्जु
नउवाच अथकेनप्रयुक्तोयंपापंचरतिपूरुषः अनिछन्नपिवार्ष्णेयबलादिवनियोजितः श्रीभगवानुवाच
कामएषक्रोधएषरजोगुणसमुद्भवः महाशनोमहापाप्माविद्धेनमिहवैरिणं अर्जुनउवाच भवत्येषकथंकृष्ण
कथंचैवप्रवर्द्धते किमात्मकःकिमाचारस्तन्ममाचक्ष्वपृछतः श्रीभगवानुवाच कामक्रोधभवोघोरस्तंभहर्षस
मुद्भवः अहंकारभवोनात्मादुस्तरःपापकर्मभिः हारमस्यदधात्येषशोकमस्यददातिच भयंचास्यकरो
त्येषमोहयत्यमुहुर्मुहुः सएषकलुषःक्षुद्रःछिद्रान्वेषीधनंजय लोभप्रवृत्तोमोहात्मामानुषाणामुपद्र
वः आवृतंज्ञानमेतेनज्ञानिनोनित्यवैरिणा कामरूपेणकौंतेयदुष्करेणानलेनच इंद्रियाणिमनोबुद्धि
रस्याधिष्टानमुच्यते एतैर्विमोहयत्येषज्ञानमावृत्यदेहिनां तस्मात्त्वमिंद्रियाण्यादौनियम्यभरतर्षभ

भीष्म॰
२२

पाप्मानंप्रजहिह्येनंज्ञानविज्ञाननाशनं इंद्रियाणिपराण्याहुरिंद्रियेभ्यः परंमनः मनसस्तुपराबुद्धिर्योबुद्धेःपर
तस्तुसः एवंबुद्धेःपरंबुद्ध्वासंस्तभ्यात्मानमात्मना जहिशत्रुंमहाबाहोकामरूपंदुरासदं इतिश्रीभगवद्गीतासूपनि
षत्सुब्रह्मविद्यायांयोगशास्त्रेश्रीकृष्णार्जुनसंवादेबुद्धियोगोनामतृतीयोध्यायः श्रीभगवानुवाच इमंविवस्वते॰
योगंप्रोक्तवानहमव्ययं विवस्वान्मनवेप्राहमनुरिक्ष्वाकवेब्रवीत् एवंपरंपराप्राप्तमिदंराजर्षयोविदुः सकाले
नेहमहतायोगोनष्टः परंतप सएवायंमयातेद्ययोगःप्रोक्तःपुरातनः भक्तोसिमेसखाचेतिरहस्यंह्येतदुत्तमं
अर्जुनउवाच अपरंभवतोजन्मपरंजन्मविवस्वतः कथमेतद्विजानीयांत्वमादौप्रोक्तवानिति श्रीभगवानुवाच
बहूनिमेव्यतीतानिजन्मानितवचार्जुन तान्यहंवेदसर्वाणिनत्वंवेत्थपरंतप अजोपिसन्नव्ययात्माभूतानामी
श्वरोपिसन् प्रकृतिंस्वामधिष्ठायसंभवाम्यात्ममायया यदायदाहिधर्मस्यग्लानिर्भवतिभारत अभ्युत्था
नमधर्मस्यतदात्मानंसृजाम्यहं परित्राणायसाधूनांविनाशायचदुःकृतां धर्मसंस्थापनार्थायसंभवामि
युगेयुगे जन्मकर्मचमेदिव्यमेवंयोवेत्तितत्वतः त्यक्त्वादेहंपुनर्जन्मनैतिमामेतिसोर्जुन वीतरागभयक्रो॰
धायन्मयामामुपाश्रिताः बहवोज्ञानतपसापूताःमद्भावमागताः येयथामांप्रपद्यंतेतांस्तथैवभजाम्यहं राम
ममवर्त्मानुवर्त्तंतेमनुष्याःपार्थसर्वशः कांक्षंतःकर्मणांसिद्धिंयजंतइहदेवताः क्षिप्रंहिमानुषेलोकेसिद्धिर्भ २२

वतिकर्मजा चातुर्वर्ण्यंमयासृष्टंगुणकर्मविभागशः तस्यकर्त्तारमपिमांविद्ध्यकर्त्तारमव्ययं नमांकर्मा
णिलिंपंतिनमेकर्मफलेस्पृहा इतिमांयोभिजानातिकर्मभिर्नसबध्यते एवंज्ञात्वाकृतंकर्मपूर्वैरपिमुमुक्षुभिः
कुरुकर्मैवतस्मात्त्वंपूर्वैःपूर्वतरंकृतं किंकर्मकिमकर्मेतिकवयोप्यत्रमोहिताः तत्तेकर्मप्रवक्ष्यामियज्ज्ञात्वामो
क्ष्यसेशुभात् कर्मणोह्यपिबोधव्यंबोधव्यंचविकर्मणः अकर्मणश्चबोधव्यंगहनाकर्मणोगतिः कर्मण्य
कर्मयःपश्येदकर्मणिचकर्मजः सबुद्धिमान्मनुष्येषुसयुक्तःकृत्स्नकर्मकृत् यस्यसर्वेसमारंभाःकामसंक
ल्पवर्जिताः ज्ञानाग्निदग्धकर्माणंतमाहुःपंडितंबुधाः त्यक्त्वाकर्मफलासंगंनित्यतृप्तोनिराश्रयः कर्म
ण्यपिप्रवृत्तोपिनैवकिंचित्करोतिसः निराशीर्यतचित्तात्मात्यक्तसर्वपरिग्रहः शारीरंकेवलंकर्मकुर्वन्ना
प्नोतिकिल्बिषं यदृच्छालाभसंतुष्टोद्वंद्वातीतोविमत्सरः समःसिद्धावसिद्धौचकृत्वापिनसबध्यते गत
संगस्यमुक्तस्यज्ञानावस्थितचेतसः यज्ञायाचरतःकर्मसमग्रंप्रविलीयते ब्रह्मार्पणंब्रह्महविर्ब्र
ह्माग्नौब्रह्मणाहुतं ब्रह्मैवतेनगंतव्यंब्रह्मकर्मसमाधिना दैवमेवापरेयज्ञंयोगिनःपर्युपासते ब्रह्मा
ग्नावपरेयज्ञंयज्ञेनैवोपजुह्वति श्रोत्रादीनिंद्रियाण्यन्येसंयमाग्निषुजुह्वति शब्दादीन्विषयानन्यइं
द्रियाग्निषुजुह्वति सर्वाणींद्रियकर्माणिप्राणकर्माणिचापरे आत्मसंयमयोगाग्नौजुह्वतिज्ञानदी

भीष्म॰ पिते द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथापरे स्वाध्यायज्ञानयज्ञाश्च यतयः शंसितव्रताः अपाने जुह्वति
३८ प्राणं प्राणेऽपानं तथापरे प्राणापानगती रुद्ध्वा प्राणायामपरायणाः अपरे नियताहाराः प्राणान्प्राणे
षु जुह्वति सर्वेप्येते यज्ञविदो यज्ञक्षपितकल्मषाः यज्ञशिष्टामृतभुजो यांति ब्रह्म सनातनं नायं लो
कोस्त्ययज्ञस्य कुतोन्यः कुरुसत्तम एवं बहुविधा यज्ञा वितता ब्रह्मणो मुखे कर्मजान्विद्धि तान्सर्वानेवं ज्ञा
त्वा विमोक्ष्यसे श्रेयान्द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञः परंतप सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते त
द्विद्धि प्रणिपातेन परिप्रश्नेन सेवया उपदेक्ष्यंति ते ज्ञानं ज्ञानिनस्तत्वदर्शिनः यज्ज्ञात्वा न पुनर्मोहमेवं
यास्यसि पांडव येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो मयि अपि चेदसि पापेभ्यः सर्वेभ्यः पापकृत्तमः स
र्वं ज्ञानप्लवेनैव वृजिनं संतरिष्यसि यथैधांसि समिद्धोग्निर्भस्मसात्कुरुतेर्जुन ज्ञानाग्निः सर्वकर्माणि
भस्मसात्कुरुते तथा नहि ज्ञानेन सदृशं पवित्रमिह विद्यते तत्स्वयं योगसंसिद्धः कालेनात्मनि विंदति श्र
द्धावांल्लभते ज्ञानं तत्परः संयतेंद्रियः ज्ञानं लब्ध्वा परां शांतिमचिरेणाधिगच्छति अज्ञश्चाश्रद्दधानश्च राम
संशयात्मा विनश्यति नायं लोकोस्ति न परो न सुखं संशयात्मनः योगसंन्यस्तकर्माणं ज्ञानसंछिन्नसंशयं ३८
आत्मवंतं न कर्माणि निबध्नंति धनंजय तस्मादज्ञानसंभूतं हृत्स्थं ज्ञानासिनात्मनः छित्वैनं संशयं यो

गमातिष्ठोत्तिष्ठ भारत भीष्मपर्वणि भगवद्गीतासूपनिषत्सु ब्रह्मप्रसंशायोगो नाम चतुर्थोध्यायः ४ अर्जु
न उवाच संन्यासं कर्मणां कृष्ण पुनर्योगं च संशसि यच्छ्रेय एतयोरेकं तन्मे ब्रूहि सुनिश्चितं श्रीभगवानुवाच सन्यासः
कर्मयोगश्च निःश्रेयसकरावुभौ तयोस्तु कर्मसन्यासात्कर्मयोगो विशिष्यते ज्ञेयः स नित्यसन्यासी यो न द्वेष्टि न कां
क्षति निर्द्वंद्वो हि महाबाहो सुखं बंधात्प्रमुच्यते सांख्ययोगौ पृथग्बालाः प्रवदंति न पंडिताः एकमप्यास्थितः सम्य
गुभयोर्विंदते फलं यत्सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते एकं सांख्यं च योगं च यः पश्यति स पश्यति सन्या
सस्तु महाबाहो दुःखमाप्तुमयोगतः योगयुक्तो मुनिर्ब्रह्म न चिरेणाधिगच्छति योगयुक्तो विशुद्धात्मा विजि
तात्मा जितेंद्रियः सर्वभूतात्मभूतात्मा कुर्वन्नपि न लिप्यते नैव किंचित्करोमीति युक्तो मन्येत तत्ववित् पश्यन्शृ
त्रिघ्र ५ ण्वन्स्पृशन्जिघ्रन्नश्नन्गच्छन्स्वपन्श्वसन् प्रलपन्विसृजन्गृह्णन्नुन्मिषन्निमिषन्नपि इंद्रियाणींद्रियार्थेषु वर्त्तं
त इति धारयन् ब्रह्मण्याधाय कर्माणि संगं त्यक्त्वा करोति यः लिप्यते न स पापेन पद्मपत्रमिवांभसा कायेन मनसा
बुद्ध्या केवलैरिंद्रियैरपि योगिनः कर्म कुर्वंति संगं त्यक्त्वात्मशुद्धये युक्तः कर्मफलं त्यक्त्वा शांतिमाप्नोति नैष्ठि
कीं अयुक्तः कामकारेण फले शक्तो निबध्यते सर्वकर्माणि मनसा सन्यस्यास्ते सुखं वशी नवद्वारे पुरे देही नै
व कुर्वन्न कारयन् न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः न कर्मफलसंयोगं स्वभावस्तु प्रवर्त्तते नाद

भीष्म ते कस्यचित्पापं न चैवं सुकृतं विभुः अज्ञानेनावृतं ज्ञानं तेन मुह्यंति जंतवः ज्ञानेन तु तदज्ञानं येषां नाशितमात्म
३५ नः तेषामादित्यवज्ज्ञानं प्रकाशयति तत्परं तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः गच्छंत्यपुनरावृत्तिं
ज्ञाननिर्धूतकल्मषाः विद्याविनयसंपन्ने ब्राह्मणे गवि हस्तिनि शुनि चैव श्वपाके च पंडिताः समदर्शिनः इहैव
तैर्जितः सर्गो येषां साम्ये स्थितं मनः निर्दोषं हि समं ब्रह्म तस्माद्ब्रह्मणि ते स्थिताः न प्रहृष्येत्प्रियं प्राप्य नोद्विजेत्प्रा
प्य चाप्रियं स्थिरबुद्धिरसंमूढो ब्रह्मविद्ब्रह्मणि स्थितः बाह्यस्पर्शेष्वसक्तात्मा विंदत्यात्मनि यत्सुखं स ब्रह्मयोग
युक्तात्मा सुखमक्षयमश्नुते ये हि संस्पर्शजा भोगा दुःखयोनय एव ते आद्यंतवंतः कौंतेय न तेषु रमते बुधः
शक्नोतीहैव यः सोढुं प्राक्शरीरविमोक्षणात् कामक्रोधोद्भवं वेगं स युक्तः स सुखी नरः योंतःसुखोंतरारा
मस्तथांतर्ज्योतिरेव च स योगी ब्रह्मनिर्वाणं ब्रह्मभूतोधिगच्छति लभंते ब्रह्मनिर्वाणमृषयः क्षीणकल्मषाः
छिन्नद्वैधा यतात्मानः सर्वभूतहिते रताः कामक्रोधवियुक्तानां यतीनां यतचेतसां अभितो ब्रह्मनिर्वाणं व
र्त्तते विदितात्मनां स्पर्शान्कृत्वा बहिर्बाह्यांश्चक्षुश्चैवांतरे भ्रुवोः प्राणापानौ समौ कृत्वा नासाभ्यंतरचारि
णौ यतेंद्रियमनोबुद्धिर्मुनिर्मोक्षपरायणः विगतेच्छाभयक्रोधो यः सदा मुक्त एव सः भोक्तारं यज्ञतप राम
सां सर्वलोकमहेश्वरं सुहृदं सर्वभूतानां ज्ञात्वा मां शांतिमृच्छति भीष्मपर्वणि भगवद्गीतासूपनिषत्सु ब्रह्म ३५

सन्यासयोगोनामपंचमोध्यायः श्रीभगवानुवाच अनाश्रितःकर्मफलंकार्यंकर्मकरोतियः ससन्यासीचयोगीच
ननिरग्निर्नचाक्रियः यंसन्यासमितिप्राहुर्योगंतंविद्धिपांडव नह्यसंन्यस्तसंकल्पोयोगीभवतिकश्चन आरुरुक्षो
र्मुनेर्योगंकर्मकारणमुच्यते योगारूढस्यतस्यैवशमःकारणमुच्यते यदाहिनेंद्रियार्थेषुनकर्मस्वनुषज्जते सर्वसं
कल्पसन्यासीयोगारूढस्तदोच्यते उद्धरेदात्मनात्मानंनात्मानमवसादयेत आत्मैवह्यात्मनोबंधुरात्मैवरिपुरात्म
नः बंधुरात्मात्मनस्तस्ययेनैवात्मनाजितः अनात्मनस्तुशत्रुत्वेवर्त्तेतात्मैवशत्रुवत् जितात्मनःप्रशांतस्यपरमात्मा
समाहितः शीतोष्णसुखदुःखेषुतथामानापमानयोः ज्ञानविज्ञानतृप्तात्माकूटस्थोविजितेंद्रियः युक्तइत्युच्य
तेयोगीसमलोष्टाश्मकांचनः सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबंधुषु साधुष्वपिचपापेषुसमबुद्धिर्विशिष्यते
योगीयुंजीतसततमात्मानंरहसिस्थितः एकाकीयतचित्तात्मानिराशीरपरिग्रहः शुचौदेशेप्रतिष्ठाप्यस्थिरमा
सनमात्मनः नात्युच्छ्रितंनातिनीचंचैलाजिनकुशोत्तरं तत्रैकाग्रंमनःकृत्वायतचित्तेंद्रियक्रियः उपविश्या
सनेयुंज्याद्योगमात्मविशुद्धये समंकायशिरोग्रीवंधारयन्नचलंस्थिरः संप्रेक्ष्यनासिकाग्रंस्वंदिशश्चानव
लोकयन् प्रशांतात्माविगभीर्ब्रह्मचारिव्रतेस्थितः मनःसंयम्यमच्चित्तोयुक्तआसीतमत्परः युंजन्नेवंस
दात्मानंयोगीनियतमानसः शांतिंनिर्वाणपरमांमत्संस्थामधिगच्छति नात्यश्नतस्तुयोगोस्तिनचैकांत

भीष्म॰ मनश्नतः नचातिस्वप्नशीलस्यजाग्रतोनैवचार्जुन युक्ताहारविहारस्ययुक्तचेष्टस्यकर्मसु युक्तस्वप्नावबोध
३६ स्ययोगोभवतिदुःखहा यदाविनियतंचित्तमात्मन्येवावतिष्ठते निःस्पृहःसर्वकामेभ्योयुक्तइत्युच्यतेत
दा यथादीपोनिवातस्थोनेंगतेसोपमास्मृता योगिनोयतचित्तस्ययुंजतोयोगमात्मनः यत्रोपरमतेचित्तं
निरुद्धंयोगसेवया यत्रचैवात्मनात्मानंपश्यन्नात्मनितुष्यति सुखमात्यंतिकंयत्तद्बुद्धिग्राह्यमतींद्रियं वे
त्तियत्रनचैवायंस्थितश्चलतितत्वतः यंलब्ध्वाचापरंलाभंमन्यतेनाधिकंततः तस्मिन्स्थितेनदुःखेनगुरु
णापिविचाल्यते तंविद्यादुःखसंयोगवियोगंयोगसंज्ञितं सनिश्चयेनयोक्तव्योयोगोनिर्विण्णचेतसा संक
ल्पप्रभावान्कामांस्त्यक्त्वासर्वानशेषतः मनसैवेंद्रियग्रामंविनियम्यसमंततः शनेशनेरुपरमेद्बुध्याधृति
गृहीतया आत्मसंस्थंमनःकृत्वानकिंचिदपिचिंतयेत् यतोयतोनिश्चरतिमनश्चंचलमस्थिरं ततस्ततोनि
त यम्यैतदात्मन्येववशंनयेत् प्रशांतमनसंह्येनंयोगिनंसुखमुत्तमं उपैतिशांतरजसंब्रह्मभूतमकल्मषं
युंजन्नेवंसदात्मानंयोगीविगतकल्मषः सर्वभूतस्थमात्मानंसर्वभूतानिचात्मनि ईक्षतेयोगयुक्तात्मा
सर्वत्रसमदर्शिनः योमांपश्यतिसर्वत्रसर्वंचमयिपश्यति तस्याहंनप्रणश्यामिसचमेनप्रणश्यति सर्वभू राम
तस्थितंयोमांभजत्येकत्वमास्थितः सर्वथावर्त्तमानोपिसयोगीमयिवर्त्तते आत्मौपम्येनसर्वत्रसमंपश्य ३६

त्रियोऽर्जुन सुखं वा यदि वा दुःखं स योगी परमो मतः अर्जुन उवाच योऽयं योगस्त्वया प्रोक्तः साम्येन मधु
सूदन एतस्याहं न पश्यामि चंचलत्वात्स्थितिं स्थिरां चंचलं हि मनः कृष्ण प्रमाथि बलवद्दृढं तस्याहं नि
ग्रहं मन्ये वायोरिव सुदुःकरं श्रीभगवानुवाच असंशयं महाबाहो मनो दुर्निग्रहं चलं अभ्यासेन तु
कौंतेय वैराग्येण च गृह्यते असंयतात्मना योगो दुःप्राप इति मे मतिः वश्यात्मना तु यतता शक्योऽवाप्तुमु
पायतः अर्जुन उवाच अयतिः श्रद्धयोपेतो योगाच्चलितमानसः अप्राप्य योगसंसिद्धिं कां गतिं कृष्ण ग
च्छति कच्चिन्नोभयविभ्रष्टश्छिन्नाभ्रमिव नश्यति अप्रतिष्ठो महाबाहो विमूढो ब्रह्मणः पथि एतन्मे सं
शयं कृष्ण छेत्तुमर्हस्यशेषतः त्वदन्यः संशयस्यास्य छेत्ता न ह्युपपद्यते श्रीभगवानुवाच पार्थ नैवेह ना
मुत्र विनाशस्तस्य विद्यते नहि कल्याणकृत्कश्चिद्दुर्गतिं तात गच्छति प्राप्य पुण्यकृतां लोकानुषित्वा शाश्वतीः
समाः शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते अथवा योगिनामेव कुले भवति धीमतां एतद्धि दुर्लभ
तरं लोके जन्म यदीदृशं तत्र तं बुद्धिसंयोगं लभते पौर्वदेहिकं यतते च ततो भूयः संसिद्धौ कुरुनंदन
पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोऽपि सः जिज्ञासुरपि योगस्य शब्दब्रह्मातिवर्त्तते प्रयत्नाद्यतमान
स्तु योगी संसिद्धकिल्बिषः अनेकजन्मसंसिद्धस्ततो याति परां गतिं तपस्विभ्योऽधिको योगी ज्ञानि

भीष्म: ष्योपिमतोधिकः कर्मिभ्यश्चाधिकोयोगी तस्माद्योगीभवार्जुन योगिनामपिसर्वेषांमद्गतेनांतरात्मना श्रद्धावान्भ
३७ जतेयोमांसमेयुक्ततमोमतः भीष्मपर्वणिभगवद्गीतासुआत्मसंयमयोगोनामषष्ठोध्यायः श्रीभगवानुवाच
मय्यासक्तमनाःपार्थयोगंयुंजन्मदाश्रयः असंशयंसमग्रंमांयथाज्ञास्यसितच्छृणु ज्ञानंतेहमविज्ञानमिदंव
क्ष्याम्यशेषतः यज्ज्ञात्वानेहभूयोपिज्ञातव्यमवशिष्यते मनुष्याणांसहस्रेषुकश्चिद्यततिसिद्धये यततामपि
सिद्धानांकश्चिन्मांवेत्तितत्वतः भूमिरापोनलोवायुःखंमनोबुद्धिरेवच अहंकारइतीयंमेभिन्नाप्रकृतिरष्टधा
अपरेयमितस्त्वन्यांप्रकृतिंविद्धिमेपरां जीवभूतांमहाबाहोययेदंधार्यतेजगत् एतद्योनीनिभूतानिसर्वा
णीत्युपधारय अहंकृत्स्नस्यजगतःप्रभवःप्रलयस्तथा मत्तःपरतरंनान्यत्किंचिदस्तिधनंजय मयिसर्वमि
दंप्रोतंसूत्रेमणिगणाइव रसोहमप्सुकौंतेयप्रभास्मिशशिसूर्ययोः प्रणवःसर्ववेदेषुशब्दःखेपौरुषंनृषु
पुण्योगंधःपृथिव्यांचतेजश्चास्मिविभावसौ जीवनंसर्वभूतेषुतपश्चास्मितपस्विषु बीजंमांसर्वभूतानांविद्धि
पार्थसनातनं बुद्धिर्बुद्धिमतामस्मितेजस्तेजस्विनामहं बलंबलवतांचाहंकामरागविवर्जितं धर्माविरुद्धोभूते
षुकामोस्मिभरतर्षभ येचैवसात्विकाभावाराजसास्तामसाश्चये मत्तएवेतितान्विद्धिनत्वहंतेषुतेमयि त्रि राम
भिर्गुणमयैर्भावैरेभिःसर्वमिदंजगत् मोहितंनाभिजानातिमामेभ्यःपरमव्ययं दैवीह्येषागुणमयीममामायादु ३७
रत्यया मामेवयेप्रपद्यंतेमायामेतांतरंतिते नमांदुःकृतिनोमूढाःप्रपद्यंतेनराधमाः माययापहृतज्ञाना

आसुरं भावमाश्रिताः चतुर्विधा भजंते मां जनाः सुकृतिनोऽर्जुन आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ तेषां
ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः उदाराः सर्व एवैते ज्ञानी त्वात्मैव
मे मतं आस्थितः स हि युक्तात्मा मामेवानुत्तमां गतिं बहूनां जन्मनामंते ज्ञानवान्मां प्रपद्यते वासुदेवः सर्वमिति स महा
त्मा सुदुर्लभः कामैस्तैस्तैर्हृतज्ञानाः प्रपद्यंतेऽन्यदेवताः तं तं नियममास्थाय प्रकृत्या नियताः स्वया यो यो यां यां तनुं भक्तः श्र
द्धयार्चितुमिच्छति तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहं स तया श्रद्धया युक्तस्तस्याराधनमीहते लभते च ततः का
मान्मयैव विहितान्हितान् अंतवत्तु फलं तेषां तद्भवत्यल्पमेधसां देवान्देवयजो यांति मद्भक्ता यांति मामपि अव्यक्तं व्य
क्तिमापन्नं मन्यंते मामबुद्धयः परं भावमजानंतो ममाव्ययमनुत्तमं नाहं प्रकाशः सर्वस्य योगमायासमावृतः
मूढोऽयं नाभिजानाति लोको मामजमव्ययं वेदाहं समतीतानि वर्तमानानि चार्जुन भविष्याणि च भूतानि मां तु वेद
न कश्चन इच्छाद्वेषसमुत्थेन द्वंद्वमोहेन भारत सर्वभूतानि संमोहं सर्गे यांति परंतप येषां त्वंतगतं पापं जनानां पुं
ण्यकर्मणां ते द्वंद्वमोहनिर्मुक्ता भजंते मां दृढव्रताः जरामरणमोक्षाय मामाश्रित्य यतंति ये ते ब्रह्म तद्विदुः
कृत्स्नमध्यात्मं कर्म चाखिलं साधिभूताधिदैवं मां साधियज्ञं च ये विदुः प्रयाणकालेपि च मां ते विदुर्युक्त
चेतसः भीष्मपर्वणि भगवद्गीतासु जगत्प्रकाशे? तिविज्ञानयोगो नाम सप्तमो ध्यायः अर्जुन उवाच किं तद्ब्रह्म किं
मध्यात्मं किं कर्म पुरुषोत्तम अधिभूतं च किं प्रोक्तमधिदैवं किमुच्यते अधियज्ञं कथं कोऽत्र देहेऽस्मिन्मधुसूदन

 न प्रयाणकालेच कथंज्ञेयोसिविदितात्मभिः श्रीभगवानुवाच अक्षरं परमंब्रह्म स्वभावोध्यात्म उच्यते भू
 तभावोद्भवकरोविसर्गः कर्मसंज्ञितः अधिभूतंक्षरोभावः पुरुषश्चाधिदैवतं अधियज्ञोहमेवात्रदेहेदेहभृतां
वर अंतकालेचमामेवस्मरन्मुक्त्वाकलेवरं यःप्रयातिसमद्भावंयाति नास्त्यत्रसंशयः यंयंवापिस्मरन्भावं
त्यजत्यंतेकलेवरं तंतमेवैतिकौंतेयसदातद्भावभावितः तस्मात्सर्वेषुकालेषुमामनुस्मरयुध्यतः मय्यर्पि
तमनोबुद्धिर्मामेवैष्यस्यसंशयः अभ्यासयोगयुक्तेनचेतसानान्यगामिना परमंपुरुषंदिव्यंयातिपार्थानुचिं
तयन् कविंपुराणमनुशासितारमणोरणीयांसमनुस्मरेद्यः सर्वस्यधातारमचिंत्यरूपमादित्यवर्णं
तमसःपरस्तात् प्रयाणकाले मनसाचलेनभक्त्यायुक्तोबुद्धिबलेनचैव भ्रुवोर्मध्येप्राणमावेश्यसम्यक्सतंप
रंपुरुषमुपैतिदिव्यं यदक्षरंवेदविदोवदंतिविशंतियद्यतयोवीतरागाः यदिच्छंतोब्रह्मचर्यंचरंतितत्तेपदंसं
ग्रहेणप्रवक्ष्ये सर्वद्वाराणिसंयम्यमनोहृदिनिरुध्यच मूर्ध्न्याधायात्मनःप्राणमास्थितोयोगधारणां ओमि
त्येकाक्षरंब्रह्मव्याहरन्मामनुस्मरन् यःप्रयातित्यजन्देहंसयातिपरमांगतिं अनन्यचेताःसततंयोमांस्म
रतिनित्यशः तस्याहंसुलभःपार्थनित्ययुक्तस्ययोगिनः मामुपेत्यपुनर्जन्मदुःखालयमशाश्वतं नाप्नुवंतिम
हात्मानःसंसिद्धिंपरमांगताः आब्रह्मभुवनाल्लोकाःपुनरावर्तिनोर्जुन मामुपेत्यतुकौंतेयपुनर्जन्मनविद्य
ते सहस्रयुगपर्यंतमहर्यद्ब्रह्मणोविदुः रात्रिंयुगसहस्रांतांतेहोरात्रविदोजनाः अव्यक्ताद्व्यक्तयःसर्वाःप्रभ

वंत्यहरागमे रात्र्यागमे प्रलीयंते तत्रैवाव्यक्तसंज्ञके भूतग्रामः सएवायंभूत्वाभूत्वाप्रलीयते रात्र्यागमेंवशः
पार्थप्रभवंत्यहरागमे परस्तस्मात्तुभावोन्योव्यक्तोव्यक्तात्सनातनः यःससर्वेषुभूतेषुनश्यत्सुनविनश्यति
अव्यक्तोक्षरइत्युक्तस्तमाहुःपरमांगतिं यंप्राप्यननिवर्त्तंतेतद्धामपरमंमम पुरुषःसपरःपार्थभक्त्यालः
भ्यस्त्वनन्यया यस्यांतस्थानिभूतानियेनसर्वमिदंततं यत्रकालेत्वनावृत्तिमावृत्तिंचैवयोगिनः प्रयाताःयां
तितंकालंवक्ष्यामिभरतर्षभ अग्निर्ज्योतिरहःशुक्लःषण्मासाउत्तरायणं तत्रप्रयातागछंतिब्रह्मब्र
ह्मविदोजनाः धूमोरात्रिस्तथाकृष्णःषण्मासादक्षिणायनं तत्रचांद्रमसंज्योतिर्योगीप्राप्यनिवर्त्तते
शुक्लकृष्णेगतीह्येतेजगतःशाश्वतेमते एकयायात्यनावृत्तिमन्ययावर्त्ततेपुनः नैतेसृतीपार्थजान
न्योगीमुह्यतिकश्चन तस्मात्सर्वेषुकालेषुयोगयुक्तोभवार्जुन वेदेषुयज्ञेषुतपस्सुचैवदानेषुयत्पुण्य
फलंप्रदिष्टं अत्येतितत्सर्वमिदंविदित्वायोगीपरंस्थानमुपैतिचाद्यं इतिश्रीमहाभारतेभीष्मपर्वणि
भगवद्गीतासूपनिषत्सुअक्षरब्रह्मयोगोनामाष्टमोध्यायः श्रीभगवानुवाच इदंतुतेगुह्यतमंप्रवक्ष्या
नसूयवे ज्ञानंविज्ञानसहितंयत्ज्ञात्वामोक्ष्यसेऽशुभात् राजविद्याराजगुह्यंपवित्रमिदमुत्तमं प्रत्य
क्षावगमंधर्म्यंससुखंकर्तुमव्ययं अश्रद्दधानाःपुरुषाधर्मस्यास्यपरंतप अप्राप्यमांनिवर्त्ततेमृत्युसं

भीष्म- सारवर्त्मनि मयाततमिदंसर्वंजगदव्यक्तमूर्त्तिना मत्स्थानिसर्वभूतानि नचाहंतेष्ववस्थितः
३९ नचमत्स्थानि भूतानि पश्यमेयोगमैश्वरं भूतभृन्नचभूतस्थोममात्माभूतभावनः यथाकाश
स्थितोनित्यंवायुःसर्वत्रगोमहान् तथासर्वाणिभूतानिमत्स्थानीत्युपधारय सर्वभूतानिकौंते
यप्रकृतिंयांतिमामिकां कल्पक्षयेपुनस्तानिकल्पादौविसृजाम्यहं प्रकृतिंस्वामवष्टभ्यविसृजा
मिपुनःपुनः भूतग्राममिमंकृत्स्नमवशंप्रकृतेर्वशात् नचमांतानिकर्माणिनिबध्नंतिधनंजय उदा
सीनवदासीनमसक्तंतेषुकर्मसु मयाध्यक्षेणप्रकृतिःसूयतेसचराचरं हेतुनानेनकौंतेय
जगद्विपरिवर्त्तते अवजानंतिमांमूढामानुषींतनुमाश्रितं परंभावमजानंतोसर्वभूतमहेश्वरं
मोघाशामोघकर्माणोमोघज्ञानाविचेतसः राक्षसीमासुरींचैवप्रकृतिंमोहिनींश्रिताः महा राम
त्मानस्तुमांपार्थदैवींप्रकृतिमाश्रिताः ३९

पितारेवव्रतस्तव धिक्क्षत्रधर्ममित्युक्त्वा प्रायात्पार्थरथं प्रति उभौ श्वेतहयौ राजन्संसक्तौ दृश्य पार्थिवाः सिं
हनादं भृशं चक्रुः शंखशब्दं च मारिष द्रौणिर्दुर्योधनश्चैव विकर्णश्च तवात्मजः परिवार्य रणे भीष्मं स्थि
ता युद्धाय मारिष तथैव पांडवाः सर्वे परिवार्य धनंजयं स्थिता युद्धाय महते ततो युद्धमवर्त्तत गांगेय
स्तु रणे पार्थमानर्छन्नवभिः शरैः तमर्जुनः प्रत्यविध्यद्दशभिर्मर्मभेदिभिः ततः शतसहस्रेण सुप्रयु
क्तेन पांडवः अर्जुनः समरश्लाघी भीष्मस्यावारयद्दिशः शरजालं ततस्तं तु शरजालेन पार्थिव वारया
मास पार्थस्य भीष्मः शांतनवस्तदा उभौ परमसंहृष्टावुभौ युद्धाभिनंदनौ निर्विशेषमयुध्यतां कृतप्र
तिकृतैषिणौ भीष्मचापप्रयुक्तानि शरजालानि संघशः शीर्यमाणान्यदृश्यंत भिन्नान्यर्जुनसायकैः
तथैवार्जुनमुक्तानि शरजालानि भागशः गांगेयशरनुन्नानि न्यपतंत महीतले अर्जुनः पंचविंशत्या
भीष्ममार्छच्छितैः शरैः भीष्मोपि समरे पार्थं विव्याध नवभिः शरैः अन्योन्यं तौ हयान्विद्ध्वा भुजौ च सु
महाबलौ रथेषां रथचक्रं च चिक्रीडतुररिंदमौ ततः क्रुद्धो महाराज भीष्मः प्रहरतां वरः वासुदेवं त्रि
भिर्बाणैराजघान स्तनांतरे भीष्मचापच्युतैस्तैस्तु निर्विद्धो मधुसूदनः विरराज रणे राजन्सपुष्प इ
व किंशुकः ततोर्जुनो भृशं क्रुद्धो निर्विद्धं प्रेक्ष्य माधवं गांगेयसारथिं संख्ये निर्बिभेद त्रिभिः शरैः
यतमानौ तु तौ वीरावन्योन्यस्य रथं प्रति नाशक्नुतां तदान्योन्यमभिसंधातुमाहवे मंडलानि विचित्रा

भीष्म. आगतप्रत्यागतानि च दर्शयामासतू राजन्सूतसामर्थ्यलाघवात् अंतरं च प्रहारेषु तर्कयंतौ
७१ विशांपते राजन्नंतरमार्गस्थौ स्थितावास्तां मुहुर्मुहुः उभौ सिंहरवोन्मिश्रं शंखशब्दं च चक्रतुः त
थैव चापनिर्घोषं चक्रतुस्तौ महारथौ तयोः शंखप्रणादेन रथनेमिस्वनेन च दारिता सहसा भू
मिः सकंपा च ननाद च न तयोरंतरं कश्चिद्ददृशे भरतर्षभ बलिनौ समरे शूरावन्योन्यसदृशावुभौ
चिन्हमात्रेण भीष्मं च प्रजज्ञुस्तत्र पार्थिवाः तथा पांडुसुताः पार्थं चिन्हमात्रेण जज्ञिरे तयोर्नृवरयो
राजन्दृष्ट्वा तादृक्पराक्रमं विस्मयं सर्वभूतानि जग्मुर्भारत संयुगे न तयोरंतरं कश्चिद्रणे पश्यति भारत
धर्मे स्थितस्य हि यथा न कश्चिद्वृजिनं क्वचित् उभौ हि शरजालेन तावदृश्यौ बभूवतुः प्रकाशौ तु
पुनस्तूर्णं बभूवतू रणे तत्र देवाः सगंधर्वाश्चारणाश्च महर्षिभिः अन्योन्यं प्रत्यभाषंत तयोर्दृ
ष्ट्वा पराक्रमं न शक्यौ युधि संरब्धौ जेतुमेतौ महारथौ सदेवासुरगंधर्वैर्लोकैरपि कथंचन आश्चर्य
भूतं लोकेषु युद्धमेतन्महाद्भुतं नैव चैतादृशं युद्धं भविष्यति कदाचन नैव शक्यो रणे जेतुं भीष्मः पा
र्थेन धीमता सधनुः सरथः साश्वः प्रवपन्सायकान्रणे तथैव पांडवं युद्धे देवैरपि दुरासदं न वि
जेतुं रणे भीष्म उत्सहेत धनुर्धरं आलोकादपि युद्धं हि सममेतद्भविष्यति इति स्म वाचः प्रचरंत्यस्तत्र तत्र राम
तः गांगेयार्जुनयोः संख्ये स्तवयुक्ता विशांपते त्वदीयाश्च ततो योधाः पांडवेयाश्च भारत अन्योन्यं समरे जघ्नुस्त ७१
योस्तत्र समागमे शितधारैस्तथा

समरे व्यसृजच्छायकान्बहून् शूरान्जघानसमरे भीमसेनस्यसायकैः तंदृष्ट्वाविरथंतत्रभीमसेन म
रिंदमं शक्रदेवाविदुद्रावशितैरथ महाबलः शक्रदेवायचिक्षेपसर्वसैक्यायसींगदां सतयानिहितोरा
जन्कलिंगस्यसुतोरथात् सध्वजःसहसूतेनजगामधरणीतले हतमात्मसुतंदृष्ट्वाकलिंगानांजना
धिपः रथैरनेकसाहस्रैर्भीमस्यावारयद्दिशः ततोभीमोमहावेगांत्यक्त्वागुर्वीमहागदां उद्बवर्हाथनि
स्त्रिंशंचिकीर्षुःकर्मदारुणं चर्मचाप्रतिमंराजन्नार्षभंपुरुषर्षभः नक्षत्रैरर्द्धचंद्रैश्च शातकुंभमयैश्च
श्चितं कालिंगस्तुततःक्रुद्धोधनुर्ज्यामवमृज्यच प्रगृह्यसरथंघोरंमुग्रंसर्पविषोपमं प्राहिणोद्भी
मसेनायवधाकांक्षीजनेश्वर तमापतंतंवेगेनप्रेषितंनिशितंशरं भीमसेनोद्विधाराजंश्चिच्छेदविपुलासिना
उच्चुक्रोशचसंहृष्टस्त्रासयानोवरूथिनीं कलिंगोपिततःक्रुद्धोभीमसेनायसंयुगे तोमरान्प्राहिणोच्छी
घ्रांश्चतुर्दशशिलाशितान् तानप्राप्तान्महाबाहुःखगतानेवपांडवः चिच्छेदसमहाराजन्नसंभ्रांतोवरा
सिना निकृत्यचरणेभीमस्तोमरान्वैचतुर्द्दश भानुमंतमभिद्रुत्यपांडवःपुरुषर्षभः भानुमांस्तुततोभीमंश
रवर्षैरवाकिरत् ननादबलवान्नादंनादयानोनभस्तलं नतंसममृषेवीरसिंहनादंमहारणे ततःस्वरे
णमहताविननादमहास्वनं तेनशब्देनवित्रस्ताकलिंगानांवरूथिनी नभीमंसमरेमेनेमानुषंपुरु
षर्षभ ततोभीमोमहाराजनदित्वाविविधंस्वनं सासिर्वेगादवप्लुत्यदंताभ्यांवरणोत्तमं आरुरोह

ततोमध्यंनागराजस्यमारिष ततोमुमोचकालिंगः शक्तिंतामकरोद्द्विधा खड्गेनपृथुनामध्येभा
नुमंतमथाच्छिनत् सोत्तमायुधिनंहत्वाराजपुत्रमरिंदम गुरुंभारसहंस्कंधेनागस्यासिमपात
यत् छिन्नस्कंदःसविनदन्पपातगजयूथपः आनुग्नः सिंधुवेगेनसानुमानिवपर्वतः ततस्त
स्मादवप्लुत्यगजाद्भरतसत्तम तंहत्वासमहाबाहुर्भीमोभीमपराक्रमः खड्गपाणिरदीनात्माप्र
तिष्ठद्भुविदंशितः सचचारबहून्मार्गानभीतःप्रतिमानजात् अग्निवर्चइवाविद्धः सर्वतःप्रत्य
दृश्यत अश्ववृंदेषुनागेषुरथानीकेषुचाभिभूः पदातीनांचसंघेषुविनिघ्नन्शोणितोक्षितः
श्येनवद्व्यचरद्भीमोरणेरिपुबलोत्कटः छिंदंस्तेषांशरीराणिशिरांसिचमहाजवः खड्गेनशितधा
रेणसंयुगेगजयोधिनां पदातिरेकःसंक्रुद्धःशत्रूणांभयवर्द्धनः मोहयामासस्वरांस्तान्कालां
तकयमोपमः मूढाश्चतेतमेवाजौविनदंतःसमाद्रवत् मासिमुत्तमवेगेनविचरंतंमहारणे
निकृत्यरथिनांवाजौरथेषांचयुगानिच जघानरथिनश्चापिबलवान्परमर्द्दनः भीमसेन
श्चतान्मार्गान्सुबहून्प्रत्यदृश्यत भ्रांतमुद्भ्रांतमाविद्धमाक्रांतंप्रस्तंतसंतं संपातंसमुदीर्णंचदर्शि
यामासपांडवः केचिदग्रासिनाछिन्नाः पांडवेनमहात्मना विनेदुर्भिन्नमर्माणोविनिष्क्रगतासवः छिन्न
दंताग्रहस्ताश्चभिन्नकुंभास्तथापरे निर्योधाःस्वा

सनीकानि जघ्नुर्भारत वारणाः [illegible] निपेतुरुर्व्यां च तथा दिनदंतो महारवान् छिन्नांश्च करिणां हस्तान्महामा
त्राणि शिरांसि च परितो माद्धे [illegible] र्यांश्च कक्षाश्च कनकोज्वलाः गैवेयाण्यथ शक्तीश्च पताकाः कनकास्तथा
तूणीरान्यथ यंत्राणि विचित्राणि [illegible] धनूंषि च अग्निदंडानि शुभ्राणि तोत्रांश्चैवांकुशैः सह घंटाश्च विविधा रा
जन्हेमगर्भांश्च सरूनापि प [illegible] पतितांश्चैव पश्याम सहसादिभिः छिन्नगात्रैर्वरधरैर्निहतैश्चापि वार
णास्तस्मिन्समाकीर्णा पतितैर्भून्नगैरिव विमृद्यैवं महानागान्ममर्द श्वान्नरर्षभ अश्वारोहव
रांश्च पातयामास भारत [illegible] घोरमभवद्युद्धं तस्य तेषां च मारिष खलीनान्यथ योक्त्राणि कशाश्च कन
कोज्वलाः परितोमाः [illegible] शाश्चपर्यश्च महाधनाः न ककवचान्यथ चर्माणि विचित्रास्तरणानि च त
त्र तत्रापविद्धानि व्य [illegible] महाहवे प्रोथयंत्रैर्विचित्रैश्च खड्गैश्च विमलैस्तथा स चक्रे वसुधां कीर्णां शा
बलैः कुसुमैरिव अश्वारू [illegible] नः कांश्चित्परामृष्य महाबलः पातयामास खड्गेन सध्वजानपि पांडवः
मुहुरुत्पतन् तो दिक्षु धावन् [illegible] स्विनः मार्गांश्चरत्श्चित्रान्व्यस्मयंत नराणे जनाः निजघान पदाकां
श्चिदाक्षिप्यान्यान्पोथय [illegible] खड्गेनान्यांश्च चिच्छेद नादेनान्यानभीषयत् ऊरुवेगेन चाप्यन्यान्पा
तयामास भूतले अपरे चैनमालोक्य भयात्पंचत्वमागताः एवं सा बहुला सेना कलिंगानां तर
स्विनां परिवार्य रणे भीष्मं भीमसेनमुपाद्रवत् ततः कलिंगसेनानां प्रमुखे भरतर्षभ श्रुतायु
षमभिप्रेक्ष्य भीमसेनः समभ्ययात् तमायांतमभिप्रेक्ष्य कालिंगो नवभिः शरैः भीमसेनममेयात्मा

भीष्म. प्रत्यविध्यत्स्तनांतरे कलिंगवाणाभिहतस्तोत्रार्दितइवद्विपः भीमसेनःप्रजज्वालक्रोधेनाग्निरिवेंध
७५ नैः अथाशोकःसमादायरथंहेमपरिष्कृतं भीमंसंपादयामासरथेनरथिनांवरः तमारुह्यरथंतूर्णं
कौंतेयःशत्रुसूदनः कालिंगमभिदुद्रावतिष्ठतिष्ठेतिचाब्रवीत् ततःश्रुतायुर्बलवान्भीमस्यनिशितान्
शरान् प्रेषयामाससंक्रुद्धो दर्शयन्पाणिलाघवं सकार्मुकवरोत्सृष्टैःनवभिर्निशितैःशरैः समाह
तोभृशंराजन्कालिंगेनमहायशाः संचुक्रोधभृशंभीमोदंडाहतइवोरगः क्रुद्धःसचापमानम्यबलव
द्बलिनांवरः कालिंगमवधीत्पार्थो भीमःसप्तभिरायसैः क्षुराभ्यांचक्ररक्षौचकालिंगस्यमहारथौ
सत्यदेवंचसत्यंचप्राहिणोद्यमसादनं ततःपुनरमेयात्मानाराचैर्निशितैस्त्रिभिः केतुमंतंरणेभीमो
गमयद्यमसादनं ततः संक्रुद्धा भीमसेनममर्षणं अनीकैर्बहुसाहस्रैःक्षत्रियाःसमवारय
न् ततःशक्तिगदाखड्ग तोमरर्ष्टिपरश्वधैः कालिंगाश्चततोराजन्भीमसेनमवारन् सन्निवार्यतुतां
राजन्शरवृष्टिंसमुत्थितां गदामादायतरसापरिप्लुत्यमहाबलः भीमःसप्तशतान्वीराननयद्य
मसादनं पुनश्चैवद्विसाहस्रान्कालिंगानरिमर्दनः प्राहिणोद्यमलोकायतदद्भुतमिवाभवत् ए
वंसतान्यनीकानिकालिंगानांपुनःपुनः बिभेदसमरेपार्थःभीमोभीमपराक्रमः हतारोहाश्च
मातंगाःपांडवेनमहात्मना विप्रजग्मुरनीकेषुघनावाताहताइव मर्दंतःस्वान्यनीकानि राम
विनिंदंतःशरातुरान् ततोभीमो महाबाहुःसंगासक्तंमहाभुजः संप्रहस्रोमहाघोरं शंखंप्राध्मापय ७५

गानरणेमध्येव्यतिष्ठति नेनमभ्युत्सहे[illegible]न्निन्नावकोभरतर्षभ धृष्टद्युम्नस्तमारोप्यस्वरथेरथिनांवरः पश्य
तांसर्वसैन्यानांअपोवाह्यशस्विनां संपूज्यमानःपांचाल्यैर्मत्स्यैश्चभरतर्षभ धृष्टद्युम्नंपरिष्वज्यसमेयदृथसा
त्यकिं अथाब्रवीद्भीमसेनंसात्यकिःस[illegible]विक्रमः प्रहर्षयन्यदुव्याघ्रःधृष्टद्युम्नस्यपश्यतः द्दिष्ट्याकलिंगरा
जश्चराजपुत्रश्चकेतुमान् शक्रदे[illegible]कालिंगाःकालिंगाश्चमधेहताः स्वबाहुबलवीर्येणनागाश्वरथसंकुलः
महापुरुषभयिष्ठोवीरयोधनिषू[illegible]विताः महाव्यूहःकलिंगानामेकेनसादितस्त्वया एवमुक्त्वाथाशनेर्नप्ताद्दीर्घबा
हुररिंदमः रथाद्रथमभिद्रुत्यपर्य[illegible]पांडवं ततःसरथमारुह्यपुनरेवमहारथः तावकानवधीक्रुद्धोभी
मस्यबलमादयन् संजय उवाच गत[illegible]भूयिष्ठे तस्मिन्नहनिभारत रथनागाश्वपत्तीनांसादिनांचमहा
क्षये द्रोणपुत्रेणशल्येनकृपेणचमहा[illegible] समसज्जतपांचाल्यांस्त्रिभिरेवमहारथैः सलोकेविदितानश्वा
न्निजघानमहाबलः द्रौणेःपांचाल[illegible]शितैर्दशभिरायतैः ततःशल्यरथंतूर्णमास्थायहृतवाहनः
द्रौणिःपांचालदायादमभ्यवर्षद्द्र[illegible] धृष्टद्युम्नंतुसंसक्तंद्रौणिनादृश्यभारत सौभद्रोभ्यद्रवत्तूर्णंकिर
न्निशितान्शरान् शल्यंचपंचविंशत्या[illegible]पंचनवभिःशरैः अश्वत्थामानमष्टाभिर्विव्याधपुरुषर्षभः अर्जु

भीष्म॰
७७

निंतु ततस्तूर्णं द्रोणो विव्याध पत्रिणा शल्यो दादभिश्चैव कृपश्च निशितैः शरैः विव्याध समरे राजन्रक्षि प्रह
स्तोभ्यविध्यत लक्ष्मणस्तव पुत्रस्तु तव पौत्रमवस्थितं अभ्यवर्षत संक्रुद्धस्ततो युद्धमवर्त्तत दौर्योधनिस्तु सं
क्रुद्धः सौभद्रं नवभिः शरैः विव्याध समरे राजंस्तदद्भुतमिवाभवत् अभिमन्युश्च संक्रुद्धो भ्रातरं भरतर्षभ शरैः
पंचशता राजन्क्षिप्रहस्तोभ्यविध्यत लक्ष्मणोपि ततस्तस्य धनुश्चिछेद पत्रिणा मुष्टिदेशे महाराज ततउ
श्चुक्रुशुर्जनाः तद्विहाय धनुश्छिन्नं सौभद्रः परवीरहा अन्यदादत्तवांश्चित्रं कार्मुकं वेगवत्तरं तौ तत्र समरे
हृष्टौ कृतप्रतिकृतैषिणौ अन्योन्यं विशिखैस्तीक्ष्णैर्जघ्नतुः पुरुषर्षभौ ततो दुर्योधनो राजा दृष्ट्वा पुत्रं महाबलं
पातितं तव पौत्रेण प्रायात्तत्र जनेश्वर संनिवृत्ते तव सुते सर्व एव जनाधिपाः आर्जुनिं रथवंशेन समंतादभ्यवार
यन् स तैः परिवृतः शूरैः शूरो युधि सुदुर्जयः न स्म वै व्यसतद्राजन्कृष्णतुल्यपराक्रमः सौभद्रमथ संसक्तं
दृष्ट्वा तत्र धनंजयः अभिदुद्राव संक्रुद्धस्त्रातुकामः स्वमात्मजं ततः सरथनागाश्वा भीष्मद्रोणपुरोगमाः अ
भ्यवर्त्तंत राजानः सहिताः सव्यसाचिनं उद्धूतं सहसा व्योम नागाश्वरथसादिभिः दिवाकरपथं प्राप्य रजस्तीव्रमदृश्यत
त तानि नागसहस्राणि भूमिपालशतानि च तस्य बाणपथं प्राप्य नाभ्यवर्तंत सर्वशः प्रणेदुः सर्वभूतानि बभूवु
स्तिमिरा दिशः कुरूणामनयस्तीव्रः समदृश्यत दारुणः नांतरिक्षं न च दिशो न भूमिर्न च भास्करः प्रजज्ञे भरतर्षभ

राम
७७

रणे माधवाभ्येहि मामागच्छ किं भीतोसि कृष्णासामि स्थितोस्मि समरे माभैरिति वाचो विचुक्रुशुः तत्र भीष्मः शांतनवो
नित्यं मंडलकार्मुकः मुमोच बाणान्दीप्ताग्रानहीनाशीविषानिव शरैरेकायनीकुर्वन्दिशः सर्वा यतव्रतः जघान पांड
वरथानादिश्य भारत अनृत्यन्नैरथोपस्थे दर्शयन्पाणिलाघवं अलातचक्रवद्राजंस्तत्र तत्र स्म दृश्यते तमेकं समरे शू
रं पांडवाः सृंजयास्तथा अनेकशतसाहस्रं समपश्यंत लाघवं मायाकृतात्मानमिव भीष्मं तत्र स्म मेनिरे पूर्वस्यां दिशि
तं दृष्ट्वा प्रतीच्यां ददृशुर्जनाः प्रतीच्यां चैनमालक्ष्य दक्षिणस्यां पुनः प्रभो एवं स समरे वीरो गांगेयः प्रत्यदृश्यत न चैनं
पांडवेयानां कश्चिच्छक्नोति वीक्षितुं विशिखानेव पश्यंति भीष्मचापच्युतान्बहून् कुर्वाणं समरे कर्म सूदयंतं च वाहिनीं
व्यक्रोशंत रणे तत्र वीरा बहुविधं बहु अमानुषेण रूपेण चरंतं पितरं तव शलभा इव राजानः पतंति विधिनोदिताः
भीष्माग्निमभिसंक्रुद्धं विनाशाय सहस्रशः नहि मोघः शरः कश्चिदासीद्भीष्मस्य संयुगे नरनागाश्वकायेषु बहु
त्वाल्लघुवेधिनः हिनस्त्येकेन बाणेन सुमुक्तेन सुपत्रिणा गजान्कंकटसन्नद्धान्वज्रेणेवाचलोत्तमान् सगजान्स्ते
गजारोहान्सादिनः सहयानपि नाराचेन सुतीक्ष्णेन निजघान पिता तव यो यो भीष्मं नरव्याघ्रमभ्येति युधि क
श्चन मुहूर्तदृष्टः स पुनः पतितो भुवि दृश्यते एवं सा धर्मराजस्य वध्यमाना महाचमूः भीष्मेणातुलवीर्येण व्यशी
र्यत सहस्रधा प्राकंपत महासेना शरवर्षाभितापिता पश्यतो वासुदेवस्य पार्थस्य च महात्मनः यतमानाश्च ते

भीष्म
८२

विद्रवमानामहारथान् नाशक्नुवन्वारयितुं भीष्मबाणप्रपीडितान् महेंद्रसमवीर्येण वध्यमाना महाचमूः अभ
ज्यत महाराजन चद्वौ सहमाधवः आविध्य रथनागाश्वं पतितध्वजकूबरं अनीकं पांडुपुत्राणां हाहाभूतमचेतनं जघा
नात्र पिता पुत्रं पुत्रश्च पितरं तथा प्रियं सखायं च सखा तदा दैवबलात्कृताः विमुच्य कवचानन्ये पांडुपुत्रस्य सैनि
काः प्रकीर्णकेशा धावंतः प्रत्यदृश्यंत भारत तद्गोकुलमिवोद्विग्नमुद्भ्रांतरथयूथपं ददृशे पांडुपुत्रस्य सैन्य
मार्त्तस्वरं तदा प्रभज्यमानं तत्सैन्यं दृष्ट्वा देवकीनंदनः उवाच पार्थं बीभत्सुं निगृह्य रथमुत्तमं अयं स कालः सं
प्राप्तः पार्थ यः कांक्षितस्तव प्रहरास्मै नरव्याघ्र न चेन्मोहाद्विमुह्यसे यत्त्वया कथितं वीर पुरा राज्ञां समागमे भी
ष्मद्रोणप्रमुखान्सर्वान्धार्त्तराष्ट्रस्य सैनिकान् सानुबंधान्हनिष्यामि ये मां योत्स्यंति संयुगे इति तत्कुरु कौंतेय सत्यं वा
क्यमरिंदम बीभत्सो पश्य सैन्यं स्वं भज्यमानं ततस्ततः द्रवतश्च महीपालान्सर्वान्यौधिष्ठिरे बले दृष्ट्वा हि भीष्मं सं
मरे व्यात्ताननमिवांतकं भयार्त्ताः प्रद्रवंत्येते सिंहं क्षुद्रमृगा इव एवमुक्तः प्रत्युवाच वासुदेवं धनंजयः चोदयाश्वा
न्यतो भीष्मो विगाह्यैनं बलार्णवं पातयिष्यामि दुर्द्धर्षं वृद्धं कुरुपितामहं संजय उवाच ततोश्वान् रजतप्रख्या
न्नोदयामास माधवः यतो भीष्मरथो राजन् दुःप्रेक्ष्यो रश्मिवानिव ततस्तत्पुनरावृत्तं युधिष्ठिरबलं महत् दृ
ष्ट्वा पार्थं महाबाहुं भीष्मं युद्धाय तं माहवे ततो भीष्मः कुरुश्रेष्ठः सिंहवद्विनदन्मुहुः धनंजयरथं तूर्णं शरवर्षैर
वाकिरत् क्षणेन स रथस्तस्य सहयः सहसारथिः शरवर्षेण महता संछन्नो न प्रकाशते वासुदेवस्त्वसंभ्रांतो

राम
८२

धैर्यमास्थाय सत्यवान् चोदयामासतानश्वान्वितुन्वाभीष्मसायकैः ततः पार्थो धनुर्गृह्य दिव्यं जलदनिःस्वनं
पातयामासभीष्मस्य धनुश्छित्वात्रिभिः शरैः सच्छिन्नं कौरव्यः पुनरन्यन्महद्धनुः निमेषांतरमात्रेण सज्यं चक्रे पिता
तव विचकर्षसततो दोर्भ्यां धनुर्जलदनिःस्वनं अथास्य तदपि क्रुद्धश्चिच्छेद धनुरर्जुनः तस्य तत्पूजयामास ला
घवं शांतनोः सुतः साधु पार्थ महाबाहो साधुभिः पांडुनंदन त्वय्येव रूपसंयुक्तं महत्कर्म धनंजय प्रीतोस्मि सुदृढं
पुत्र कुरु युद्धं मया सह इति पार्थं प्रशंस्याथ प्रगृह्याथ महद्धनुः मुमोच समरे वीरः शरान्पार्थरथं प्रति प्रदर्शयद्वा
सुदेवो हययति परं बल मोघं कुर्वन् हयांस्तस्य मंडलान्यचरल्लघु तथा तु भीष्मः सुदृढं वासुदेव धनंजयौ विव्या
ध निशितैर्बाणैः सर्वगात्रेषु मारिष शुशुभाते नरव्याघ्रौ तौ भीष्मशरविक्षतौ गावृषाविव नर्दंतौ विषाणोल्ले
खिताङ्कितैः पुनश्चापि सुसंक्रुद्धः शरैः संनतपर्वभिः कृष्णौ युधि संरब्धो भीष्मो व्यवारयद्दिशः सवार्ष्णेयं
शरैस्तीक्ष्णैः कंपयामास रोषितः मुहुरभ्युत्स्मयन्भीष्मः प्रहस्याद्भुतवत्ततः ततः कृष्णोस्य समरे दृष्ट्वा भीष्म
पराक्रमं संप्रेक्ष्य च महाबाहुः पार्थस्य मृदुयुध्यत भीष्मं च शरवर्षाणि सृजंतमनिशं युधि प्रतपंतमिवा
दित्यं मध्यमासाद्य सेनयोः वरान्वरान्विनिघ्नंतं पांडुपुत्रस्य सैनिकान् युगांतमिव कुर्वाणं भीष्मं यौधिष्ठिरे
बलं एकाह्निहिरणे भीष्मो नाशयेद्यं माधवान् किमु पांडुसुतान्युद्धे समदान् सपदानुगान् द्रवते च

भीष्म· महत्सैन्यंपांडवस्यमहात्मनः एतेचकौरवाःसूर्णंप्रभग्नान्एषसोमकान् ग्प्राद्रवंतरणेहृष्टाहर्षयंतःपितामहं
८४ सोहंभीष्मंनिहन्म्यद्यपांडवार्थायदंशितं भारमेतद्विनेष्यामिपांडवानांमहात्मनां अर्जुनोहिशरैस्तीक्ष्णैस्त
प्यमानोहिसंयुगे कर्तव्यंनाभिजानातिरणेभीष्मस्यगौरवात् तथाचिंतयतस्तस्यभूयएवपितामहः प्रेष
यामाससंक्रुद्धःशरान्पार्थरथंप्रति तेषांबहुत्वाद्धिभृशंशराणांदिशोहिसर्वाव्यपिहिताबभूवुः नचांतरिक्षं
नदिशोनभूमिर्नभास्करोदृश्यततरश्मिमाली ववुश्चवातास्तुमुलाःसधूमादिशश्चसर्वाःपतिताबभूवुः द्रोणोवि
कर्णोथजयद्रथश्चभूरिश्रवाःकृतवर्माकृपश्च श्रुतायुरंबष्टपतिःराजाविंदानुविंदौचसुदक्षिणश्च प्राच्या
व स्वसौवीरगणाश्चसर्वेवसातयःक्षुद्रकमालवाश्च किरीटिनंत्वरयाभिसस्रुर्निदेशगाःशांतनवस्यराज्ञः
वाजिपदातरथौघजालैः

राम
८४

नसत्वः ततःप्रग्रस्याद्भुतदर्शनेनगांडीवनिर्ह्रादमहास्वनेन विपाटजालेनमहास्त्रजालं विनाशयामास किरी
टमाली तमुत्तमंसर्वधनुर्द्धराणामसक्तकर्मा कपिराजकेतुः भीष्मंमहात्मासववर्षभूयःशरैःसुतीक्ष्णैर्विमलैश्च
भल्लैः तथैवभीष्माहतमंतरिक्षेमहास्त्रजालंकपिराजकेतोः विशीर्यमानंददृशुस्तदीयादिवाकरेणेवतमोभिभ
तं एवंविधंकार्मुकभीमनादमदीनवत्सत्पुरुषोत्तमाभ्यां ददर्शलोकःकुरुसंजयाश्चतद्वैरथंभीष्मधनंजयाभ्यां
भीष्मपर्वणिचतुर्थाहोयुद्धे संजयउवाच द्रौणिर्भूरिश्रवाःशाल्यश्चित्रसेनश्चमारिष पुत्रःसंयमनेश्चैवसौभद्रं
समयोधयन् संसक्तमतितेजोभिस्तमेकंददृशुर्जनाः पंचभिर्मनुजव्याघ्रैर्गजैःसिंहशिशुंयथा नातिलक्षतया
कश्चिन्नशौर्येनपराक्रमे वभूवसदृशःकार्ष्णेर्नास्त्रेनापिचलाघवे तथातमात्मजंयुद्धेविक्रमंतमरिंदमं दृष्ट्वापा
र्थोरणेयत्तःसिंहनादमथानदत् पीडमानंचतत्सैन्यंपौत्रंतवविशांपते दृष्ट्वात्वदीयाराजेंद्रसमंतात्पर्यवारय
न् ध्वजिनींधार्त्तराष्ट्राणांदीनेशात्रुरदीनवत् प्रत्युद्ययौसमसौभद्रस्तेजसाचवलेनच तस्यलाघवमार्गस्थमा
दित्यसदृशप्रभं व्यदृश्यतमहत्सापंसमरेयुध्यतःपरैः सद्रौणिमिषुनैकेनविध्वाशाल्यंचपंचभिः ध्वजंसांय
मनेश्चापिसोष्टाभिरपवर्जयत् रुक्मदंडांमहाशक्तिंप्रेषितांसौमदत्तिना सितेनोरगसंकाशांपत्त्रिणाभिजहार
तां शाल्यस्यचमहाघोरांनष्यतःशतशःशरान् निवार्यार्जुनदायादोजघानचतुरोहयान् भूरिश्रवाश्च

भीष्म॰ शल्यश्च द्रौणिः सांयमनिः शलः नात्यवर्त्तंत संरब्धाः कार्ष्णिं बाहुबलोत्कटं ततस्त्रिगर्त्तराजेंद्रो मद्राश्च सहकेक
८९ येः पंचविंशतिसाहस्रास्तव पुत्रेण चोदिताः धनुर्वेदविदो मुख्या अजेयाः शत्रुभिर्युधि पार्थपुत्रं जिघांसंतः परि
वव्रुः किरीटिनं तौ तु तत्र पिता पुत्रौ परिक्षिप्तौ रथर्षभौ ददर्श राजन्पांचाल्यः सेनापतिरमित्रजित् स वारण
रथौघानां सहस्रैर्बहुभिर्वृतः वाजिभिः पत्तिभिश्चैव वृतः शतसहस्रशः धनुर्विस्फार्य संक्रुद्धश्चोदयित्वा वरू
थिनीं ययौ तन्मद्रकानीकं केकयांश्च परंतप तेन कीर्तिमता गुप्तमनीकं दृढधन्विना प्रयुक्तरथनागाश्वं
योत्स्यमानमशोभत सोऽर्जुनं प्रमुखे यांतं पांचाल्यः कुलवर्द्धनः त्रिभिः शारद्वतं बाणैर्जत्रुदेशे समार्पयत्
ततः स मद्रराजानं दशभिर्दशभिः शरैः हत्वा शीघ्रं जघानाश्वं भल्लेन कृतवर्मणः दमनं चापि दायादं पौर
वस्य महात्मनः जघान विपुलाग्रेण नाराचेन परंतपः ततः सांयमनेः पुत्रः पांचाल्यं युद्धदुर्मदं अविध्यद्द
शभिर्बाणैर्दशभिश्चापि सारथिं सोऽतिविद्धो महेष्वासः सृक्किणी परिसंलिहन् भल्लेन भृशतीक्ष्णेन निच
कर्तास्य कार्मुकं अथैनं पंचविंशत्या क्षिप्रमेव समार्प्पयत् अश्वांश्चास्यावधीद्राजन्नुभौ पार्ष्णिसारथिः स
हताश्वे रथे तिष्ठन् ददर्श भरतर्षभ पुत्रः सांयमनेः पुत्रं पांचाल्यस्य यशस्विनः स संगृह्य महाघोरं निस्त्रिंशंप राम
रमायसं पदातिस्तूर्णमभ्यर्छद् द्रुपदस्यात्मजं तं महौघमिवायांतं खात्पतंतमिवोरगं भ्रांतावरणनिस्त्रिं ८९

शंकालोथितमिवांतकं दीप्यंतमिव शस्त्रेण मत्तवारणविक्रमं अपश्यन्पांडवास्तत्र धृष्टद्युम्नश्च पार्षतः त
स्यर्षी बालपुत्रस्य प्रतीपमभिधावतः शितनिस्त्रिंशहस्तस्य शरावरणधारिणः बाणवेगमतीतस्य रथाभ्या
समुपेयुषः त्वरन्सेनापतिः क्रुद्धो बिभेद गदयाशिरः तस्य राजन्सनिस्त्रिंशं सुप्रभं च शरासनं हतस्य पतितं हस्ता
द्धोत्सेधममलं तथा तं निहत्य गदाग्रेण लेभे स परमं यशः पुत्रः पांचालराजस्य महात्मा भीमविक्रमः त
स्मिन्हते महेष्वासे राजपुत्रे महारथे हाहाकारो महानासीत्तव सैन्यस्य भारत ततः सोयमनिः क्रुद्धो दृष्ट्वा
निहतमात्मजं अभिदुद्राव वेगेन पांचाल्यं युद्धदुर्मदं तौ तु तत्र महावीर्यौ समेतौ रथिनां वरौ ददृशुः सर्वे
राजानः कुरवः पांडवास्तथा ततः संयमनिः क्रुद्धः पार्षतं परवीरहा आजघान त्रिभिर्बाणैस्तोत्रैरिव महा
द्विपं तथैव पार्षतः शूरं शल्यः समितिशोभनः आजघानोरसि क्रुद्धस्ततो युद्धमवर्तत भीष्मपर्वणि चतु
र्थाहः संग्रामे धृतराष्ट्र उवाच दैवमेव परं मन्ये धिक्पौरुषमनर्थकं यत्रैन्यं मम पुत्रस्य पांडुसैन्येन वध्यते
नित्यं हि मामकान्तात हतानेव हि शंससि अव्यग्राश्च प्रहृष्टांश्च नित्यं शंससि पांडवान् हीनान्पुरुषकारेण मामकान
द्य संजय पतितान्पात्यमानांश्च हतानेव हि शंससि युध्यमानान्यथाशक्ति घटमानाञ्जयं प्रति पांडवा विजयंत्येव जी
वंते चैव मामकाः सोहमेतानि दुःखानि दुर्योधनकृतानि च अश्रौषं सततं तात दुःसहानि बहूनि च तमुपायं न पश्या
मि जीयंते येन पांडवाः मामका वा जयं युद्धे प्राप्नुयुर्येन संजय भीष्मद्रोणौ कृपश्चैव जयद्रथ पुरोगमाः द्रौणि

भीष्म॰ यपि महेष्वासो विकर्णो वा महाबलः निक्षिप्योवापिकस्तेषां तदा ह्यासीन्महात्मनां विमुखेषु महाप्राज्ञ मम पुत्रेषु सं
९० जय संजय उवाच श्रेणु सर्वं महाराज श्रुत्वा चैवावधारय नैव मंत्रकृतीकिंचिन्नैव मायां तथाविधां नैव विभीषिकां का
चिद्राजन्कुर्वंति पांडवाः युध्यंति ते यथा न्यायं शक्तिमंतश्च संयुगे धर्मं च सर्वकार्याणि कीर्तितानीति भारत आरंभं
तसदा पार्था प्रार्थयाना महद्यशः न ते युद्धान्निवर्त्तंते धर्मोपेता महाबलाः श्रिया परमया युक्ताः यतो धर्मस्ततो
जयः तेनावध्यारणे पार्था जययुक्ताश्च पार्थिव तव पुत्रा दुरात्मानः पापेष्वभिरताः सदा निष्ठुरा हीनकर्माणस्ते
नाहीयंत संयुगे सुबहूनि नृशंसानि पुत्रैस्तव जनेश्वर निकृतानीह पांडूनां नीचैरिव यथा परैः सर्वं च तदनादृत्य
पुत्राणां तव किल्बिषं सापह्नवाः सदैवासन्पांडवाः पांडुपूर्वज न चैतान्बहु मन्यंते पुत्रास्तव विशांपते दुर्धर्षणो
दुःसहश्च चित्रसेनो दुर्मुखः सांयमनिः विकर्णश्च पुरुमित्रश्च भारत एते मद्राधिपरथं पालयंतः स्थिता रणे
भीमसेनो यसंक्रुद्धो धृष्टद्युम्नश्च पार्षतः द्रौपदेयाभिमन्युश्च माद्रीपुत्रौ च पांडवौ धार्त्तराष्ट्रान्महारथान् द
शोव प्रत्यवारयन् नानारूपाणि शस्त्राणि विसृजंतो विशांपते अभ्यवर्त्तंत संहृष्टाः परस्परवधैषिणः तेवै
समीयुः संग्रामे राजन्समित्रेनेतव तस्मिन्दाशरथे युद्धे वर्त्तमाने भयावहे तावकानां परेषां च प्रेक्षिकाद् राम
ष्टिनो भवन् शस्त्राण्यनेकरूपाणि विसृजंतो महारथाः अन्योन्यमभिनंदंतः संप्रहारं प्रचक्रिरे ते यत्ना जा ९०

तसंरंभाः सर्वेन्योन्यजिघांसवः अन्योन्यमभिनंदंतः स्पर्धया संगतामिषः दुर्योधनश्च संक्रुद्धो धृष्टद्युम्नं
महारणे विव्याध निशितैर्बाणैश्चतुर्भिस्त्वरितो भृशं दुर्धर्षणस्तु विंशात्या चित्रसेनस्तु पंचभिः दुर्मुखो नवभि
र्बाणैर्दुःसहश्चेति सप्तभिः विविंशतिः पंचभिश्च त्रिर्दुःशासनस्तथा तान्प्रत्यविध्यद्बलवान् पार्षतः शत्रुताप
नः एकैकं पंचविंशात्या दर्शयन्पाणिलाघवं सत्यव्रतेनु समरे पुरुमित्रं च भारत अभिमन्युरविध्यंतो दशभिर्द
शभिः शरैः माद्रीपुत्रौ तु समरे मातुलं सत्यनंदनौ छादयंतौ शरव्रातैस्तदद्भुतमिवाभवत् ततः शल्यो महारा
ज स्वस्त्रीयौ रथिनां वरौ शरैर्बहुभिरानर्छ कृतप्रतिकृतैषिणौ छाद्यमानौ ततस्तौ तु माद्रीपुत्रौ न चेलतुः अथ दुर्योध
नं दृष्ट्वा भीमसेनो महाबलः दिधक्षुः कलहस्यांतं गदां जग्राह पांडवः तमुद्यतगदं दृष्ट्वा कैलासमिव शृंगिणं
भीमसेनं महाबाहुं पुत्रास्ते प्राद्रवन्भयात् दुर्योधनस्तु संक्रुद्धो मागधं समनोदयत् अनेकदशसाहस्रैः कुंज
राणां तरस्विनां गजानीकेन सहितस्तेन राजा सुयोधनः मागधं पुरतः कृत्वा भीमसेनं समभ्ययात् आप
तंतं च तं दृष्ट्वा गजानीकं वृकोदरः गदापाणिरवारोहद्रथात्सिंह इवोन्नदन् अद्रिसारमयीं गुर्वीं प्रगृह्य महतीं ग
दां अभ्यधावद्गजानीकं व्यादितास्य इवांतकः तस्य नादेन महता मनोहृदयकंपिना व्यत्यवेष्टत मं हत्य गदा
भीमस्य नंदनः ततस्तु द्रौपदीपुत्राः सौभद्रश्च महारथः नकुलः सहदेवश्च धृष्टद्युम्नश्च पार्षतः पृष्ठं भीम
स्य गजान्गदया निघ्नन्विचरन्समरे बली भीमसेनो महाबाहुः सवज्र इव वासवः २

भीष्म. स्परस्तंतः शरवर्षेण वारणान् अभ्यधावंत वर्षंतो मेघाइवगिरीन्यथा क्षुरैः क्षुरप्रैर्वल्लैश्च पीतैरंजलिकैरपि
९१ पातयंतो त्तमांगानि पीडवा गजयोधिनां शिरोभिः प्रपतद्भिश्च बाहुभिश्चैव भूषितैः अश्महृष्टिभिरिवाभा
तिपाणिभिश्च महांकुशैः हृतोत्तमांग[illegible]धेषु गजानां गजयोधिनः अदृश्यंताचलाग्रेषु द्रुमा भग्नशिला
इव धृष्टद्युम्नहतान् हत्वा नपश्यंतम[illegible]गजान् पातितान्पात्यमानांश्च पार्षतेन महात्मना मागधोथमही
पालो गजमैरावणोपमं प्रेषयामास संक्रुद्धः सौभद्रस्य रथं प्रति तमापतंतं संप्रेक्ष्य मागधस्य गजोत्तमं ज
घानैकेषुणा वीरः सौभद्रः परवीरहा तस्यावर्जितनागस्य कार्ष्णिः परपुरंजयः राज्ञो राजतपुंखेन भल्ले
नापहरच्छिरः । विगाह्य तत्कुंजरानीकं भीमसेनोथ पांडवः व्यचरत्समरे मृद्नन् गजानिंद्रो गिरीनिव
एकप्रहाराभिहतान् भीमसेनेन कुंजरान् अपश्याम रणे तस्मिन् गिरीन्वज्रहतानिव भग्नदंतान्भग्न
करान् भग्नसक्थांश्च वारणान् भग्नपृष्ठान् भग्नकुंभान्निहतान्पर्वतोपमान् नदतः सीदतश्चान्यान्
विमुखान्समरे गजान् विसृजा भग्नसेविग्नांस्तथा विशीर्य कृतोपमान् भीमसेनस्य मार्गेनुगतास्तन्य राम
र्वतोपमान् अपश्याम हतान्नागान्निष्टनंतस्तथापरे वमंतो रुधिरं चान्ये भिन्नकुंभा महागजाः वि
ह्वलंतो गता भूमिं शैला इव धरातले मेदो रुधिरदिग्धांगो वसामज्जसमक्षितः व्यचरत्समरे भीमो दं ९१

डपाणिरिवांतकः गजानांरुधिरक्लिन्नांतांगदांविभ्रद्वृकोदरः घोरःप्रतिभयश्चासीत्पिनाकीवपिनाकधृक्
निर्मथ्यमाणःक्रूरेणभीमसेनेनदंतिनः महस्त्राःप्राद्रवंशिष्टंमृद्नंतस्तववाहिनीं तेतुवीरंमहेष्वासाःसौभ
द्रप्रमुखारथाः पर्यरक्षंतयुध्यंतंवज्रायुधमिवामराः शोणिताक्तांगदांविभ्रदुक्षितांगजशोणितैः कृतां
तइवरौद्रात्माभीमसेनोव्यदृश्यत व्यायच्छमानंगदयादिक्षुसर्वासुभारत नृत्यमानमपश्याम नृत्यंतमिवशं
यमदंडोपमांगुर्वीमिंद्राशनिसमस्वनां अपश्याममहाराजरौद्रांविशसनींगदां विमिश्रांकेशमज्जाभिःप्र
दिग्धांरुधिरेणच पिनाकमिवरुद्रस्यक्रुद्धस्याभिघ्नतःपशून् यथापशूनांसंघातंयष्ट्यापालःप्रकालयं
गदयावध्यमानास्तेमार्गणैश्चसमंततः स्वान्यनीकानिमृद्नंतःप्राद्रवन्कुंजरास्तव महावाताइवाभ्राणिवि
धमित्वासवारणान् अतिष्ठत्तुमुलेभीमःश्मशानइवशूलभृत् इतिश्रीमहाभारतेभीष्मपर्वणि
संजयउवाच तस्मिन्हतेगजानीकेपुत्रोदुर्योधनस्तव भीमसेनंघ्नतेत्येवसर्वसैन्यान्यचोदयत् ततःसर्वा
ण्यनीकानितवपुत्रस्यशासनात् अभ्यद्रवन्भीमसेनंनदंतोभैरवान्रवान् तंबलौघमपर्यंतंदेवैरपि
दुरुत्सहं आपतंतंसुदुष्पारंसमुद्रमिवपर्वणि रथनागाश्वकलिलंशंखदुंदुभिनादितं अथानंतम
पारंचनरेंद्रस्तिमितह्रदं तंभीमसेनःसमरेसहोदरमिवापरं सेनासागरमक्षोभ्यंवेलेवसमवारयत्

भीष्मप. तदाश्चर्यमपश्याम अश्रद्धेयमिवाद्भुतं भीमसेनस्य समरे राजि कर्मातिमानुषं उदीर्णां पृथिवीं सर्वां साश्वां
९२ रथकुंजरां असंभ्रमो भीमसेनो गदया समताडयत् ससंवीर्यबलो घोरास्तान्गदया रथिनां वरः अ
तिष्ठत्तुमुले भीमो गिरिर्मेरुरिवाचलः तस्मिंस्तुमुले काले काले परमदारुणे भ्रातरश्चैव पुत्राश्च ध
ष्टद्युम्नश्च पार्षतः द्रौपदेयाभिमन्युश्च शिखंडी च महारथाः न प्राजहुर्भीमसेनं भये नाजौ महाबलं त
तः सायवतीं गुर्वीं प्रगृह्य महतीं गदां अवधीत्तावकान्योधान्दंडपाणिरिवांतकः पोथयन्रथवृं
दानि वाजिवृंदानि चाभिभूः विचरन्समरे भीमो युगांते पावको यथा विनिघ्नन्समरे सर्वान्युगांते वह्नि काल ९
र्नुः भुजवेगेन संकर्षन्रथजालानि पांडवः बलानि च ममर्द भ्रुमनालानीव कुंजरः मर्दन्रथेभ्यो रथि
नो गजेभ्यो गजयोधिनः सादिनश्चाश्वपृष्ठेभ्यो भूमौ चापि पदातिनः गदया व्यधमत्सर्वान्वातो वृ
क्षानिवौजसा भीमसेनो महाबाहुस्तव पुत्रस्य वै बले सा बभौ मज्जवशामांसप्रदिग्धा रुधिरेण च अदृश्यप
न महारौद्रा रथनागाश्ववाहिनी तस्मात्र हतैश्चापि मनुष्यैर्गजवाजिभिः रणांगणं तदभवन्मृत्योरा राम
घातसन्निभं पिनाकमिव रुद्रस्य क्रुद्धस्याभिघ्नतः पशून् यमदंडोपमामुग्रामिंद्राशनिसमस्वनां दद ९२
शुर्भीमसेनस्य रौद्रां विशसनीं गदां आविध्यतो गदां तस्य कौंतेयस्य महात्मनः बभौ भूयो महाघोरं

कालस्येव महाक्षये आचार्यमहतीं सेनां वारयंतं पुनः पुनः दृष्ट्वा मृत्युमिवायांतं सर्वे विमनसो भवन्
न यतो यंतः प्रेक्षतस्मग दामुद्यम्य पांडवः तेन तेन स्म दीर्यंते सर्वसैन्यानि भारत प्रद्रावयंतं सैन्यानि वलौ
घेन पराजितं ग्रसमानमनीकानि व्यादितास्यमिवांतकं तं तथा भीमकर्माणं प्रगृहीतमहागदं दृष्ट्वा शांत
नवो भीष्मः सहसैन्यः समभ्ययात् महता रथवंशेन रथेनादित्यवर्चसा व्यधमन्शरवर्षेण पर्जन्य
इव वृष्टिमान् तमायांतं तथा दृष्ट्वा व्यादितास्यमिवांतकं युयुधानो महावाहुः प्रत्युदीयायमर्षितः
द्रो ५ तस्मिन्क्षणे सात्यकिः सत्यसंधः शिनोप्रवीरोभ्यपतत्पितामहं निघ्नन्नमित्रान्धनुषा दृढेन संकंपयंस्तव
पुत्रस्य सेनां तं यांतमश्वै रजतप्रकाशैः शरान्वमंतं धनुषा दृढेन नाशक्नुवन्वारयितुं तदानीं सर्वे गणा
भारत यत्वदीयाः अविध्यद्वेनं निशितैः पारेषैः रलंवुषो राक्षसो सौ तदानीं तं वै चतुर्भिः प्रत्यविध्यत्तवी
रोनप्तानि नेरभ्यपतद्रथेन अथागतं वृष्णिवरं निशम्य तं शत्रुमध्ये परिवर्तमानं प्राद्रावयन्तं कुरुपुंग
वान् पुनः पुनः प्रणादं तं तन्भाजोः योधास्त्वदीया शरवर्षैर वर्षन्मेघा यथा भूधरमंवुवर्षैः नथापितं
वारयितुं न शेकुर्मध्यंदिने सूर्यमिवा पतंतं नतत्र कश्चित्सविषण्ण आसीदृते राजन्सोमदत्तस्य पुत्रं

भीष्म ९२

सर्वेसमादायधनुर्महात्माभूरिश्रवाभारततसौमदत्तिः दृष्ट्वारथान्स्वानपतीयमानान्प्रत्युद्ययौ
सात्यकिंसौमदत्तिः ततोभूरिश्रवाराजन्सात्यकिंनवभिःशरैः अविध्यद्भृशसंक्रुद्धस्तोत्रैरिवमहा
द्विपं कौरवंसात्यकिश्चैवशरैः सन्नतपर्वभिः अवारयदमेयात्मासर्वलोकस्यपश्यतः ततोदुर्योध
नोराजाभ्रातृभिःपरिवारितः सौमदत्तिंरणेयत्तंसमंतात्पर्यवारयत् तथैवपांडवाःसर्वेसात्यकिंतरसा
रणे परिवार्यस्थितास्सर्वेसमंतात्सुमहौजसः भीमसेनस्तुसंक्रुद्धोगदामुद्यम्यभारत दुर्योधनमुखा
न्सर्वान्पुत्रांस्तेप्रत्यवारयत् रथैरनेकसाहस्रैः क्रोधामर्षसमन्वितः नंदकस्तवपुत्रस्तुभीमसेनंमहारथं
विव्याधनिशितैःषड्भिःकंकपत्रैःशिलाशितैः ततोभीमोमहाबाहुःस्वरथेसुमहाबलः आरुरोहरथश्रेष्ठो
विशोकंचेदमब्रवीत् एतेमहाबलाःशूराधार्तराष्ट्रामहारथाः मामेवभृशसंक्रुद्धास्तुमभ्युद्यतायुधि
अस्मिन्मनोरथफलंचिंतितंबहुवार्षिकं सफलंजातमद्याहंयोहंपश्यामिसोदरान् यत्राशोकसमुक्षि
प्तारेणवोरथरेणुभिः तेप्रयात्यंतरिक्षंचछिन्नाश्चदिगंतरे तत्रायांतिसुसंनद्धाः स्वयंराजासुयोध राम
नभ्रातरश्चास्यसन्नद्धाः कुलपुत्राश्चरणोत्सुकाः एतानेवहनिष्यामिपश्यतस्तेनसंशयः तस्मान्ममाश्वान् ९३
संग्रामेयंतः संयच्छसारथे एवमुक्त्वाततःपार्थः पुत्रंदुर्योधनंतव विव्याधदशभिस्तीक्ष्णैःशरैःकनकभू
षणैः नंदकं ३

क्षिप्रगाः तएनं शरवर्षेण समंतात्पर्यवारयन् गजं च शरवृष्ट्यार्तं विभिदुस्ते समंततः स शास्त्रवृष्ट्याभिह
तः प्रास्रवद्द्विगुणं मदं प्राग्ज्योतिष गजो राजन् नानालिंगैः सुतेजनैः संजातरुधिरोत्पीडः प्रेक्षणीयो भवद्
रण गभस्तिभिरिवार्कस्य संभृतो जलदो महान् स सादितो मदस्रावी भगदत्तेन संयुगे अभ्यधावत्ततः सर्वान्
कालोत्सृष्ट इवांतकः द्विगुणं जवमास्थाय कंपयन्निव मेदिनीं तस्य तत्सुमहद्रूपं दृष्ट्वा सर्वे महारथाः मू
र्छयाभिपरीतांगो ध्वजयष्टिमुपाश्रितः तान्सभीतान्समालक्ष्य भीमसेनं च मूर्छितं ननाद बलवान्नादं भग
दत्तः प्रतापवान् ततो घटोत्कचो राजन्प्रेक्ष्य भीमं तथागतं संक्रुद्धो राक्षसो घोरस्तत्रैवांतरधीयत स कृत्वा दा
रुणां मायां भीरूणां भयवर्द्धिनीं अदृश्यत निमेषार्द्धं घोररूपं समास्थितः ऐरावणं समारूढः सर्वमायाकृ
तं स्वयं तस्य चान्ये दिग्नागा बभूवुरनुयायिनः अंजनो वामनश्चैव महापद्मश्च सुप्रभः त्रय एते महाना
गा राक्षसैः समधिष्ठिताः महाकायास्त्रिधा राजन्प्रस्रवंतो मदं बहु तेजोवीर्यबलोपेता महाबला महाक्र
माः घटोत्कचः स्वयं नागं चोदयामास तं ततः स गजं भगदत्तं तं हंतुकामः परंतप ते चान्ये चोदिता नागा रा
क्षसास्तैर्महाबलैः परिपेतुः सुसंक्रुद्धाश्चतुर्दंष्ट्राश्चतुर्दिशं भगदत्तस्य तं नागं विषाणैस्ते न्यपीडयन्
संपीड्यमानस्तैर्नागैर्वेदनार्त्तः स वातुरः अनदत्सुमहानादमिंद्राशनिसमस्वनं तस्य नाग नदो नादं सुघो

भीष्म॰ रं भीममनिस्वनं श्रुत्वा भीष्मोब्रवीद्द्रोणं राजानं च सुयोधनं ध्रुवं युध्यति संग्रामे हैडिंवेन दुरात्मना भगदत्तो महेष्वासः
९५ लघ्रे च परिवर्त्तते राक्षसश्च महामायः स च राजातिकोपनः एतौ समेतौ समरे कालमृत्युसमावुभौ श्रूयते ह्येष हृष्टा
नां पांडवानां महास्वनः हस्तिनश्चैव सुमहान् भीतस्य नदतो ध्वनिः तत्र गच्छाम भद्रं वो राजानं परिरक्षितुं प्ररक्ष्य
माणः समरे क्षिप्रं प्राणान्विमोक्ष्यते ते त्वरध्वं महावीर्याः किं चिरेण व्रजामहे महान्हि वर्तते भीमः संग्रामे लोमहर्ष
णः भक्तश्च कुलपुत्रश्च भवमरक्ष्य एतेन पतिः युक्तं चास्य परित्राणं कर्त्तुमस्माभिरुच्यते भीष्मस्य तद्वचः श्रुत्वा भा
रद्वाजपुरोगमाः सहिताः सह राजानो भगदत्तपरीप्सया उत्तमं जेवमास्थाय प्रययुर्यत्र सोभवत् तान्प्रयातान्स
मालोक्य युधिष्ठिरपुरोगमाः पांचालाः पांडवैः सार्द्धं पृष्ठतोनुययुः परान् तान्यनीकान्यथालोक्य राक्षसेंद्रः प्र
तापवान् ननाद सुमहानादं विस्फोटमशनेर्दिवि तस्य तं निनदं श्रुत्वा दृष्ट्वा नागांश्च मध्यतः भीष्मः शांतन
वो भूयो भारद्वाजमभाषत न रोचते मे संग्रामो हैडिंवेन दुरात्मना वलवीर्यसमाविष्टः स सहायश्च संप्रति नै
ष शक्यो युधा जेतुं प्रपिवज्रभृता स्वयं लब्धलक्षः प्रहारी च वयं च श्रांतवाहनाः पांचालैः पांडवैश्चैव दिवसं
सततविक्षताः तन्न मे रोचते युद्धं पांडवैर्जितकाशिभिः घुष्यतामवहारो द्य श्वो योत्स्यामः परैः सह पितामहवचः राम
श्रुत्वा तथा चक्रुस्म कौरवाः उपायेनापयाना ते घटोत्कचभयार्दिताः कौरवेषु निवृत्तेषु पांडवा जितकाशि ९५

नः सिंहनादमकुर्वंतः शंखवेणुरवैः सह एवं तदभवद्युद्धं दिवसं भरतर्षभ पांडवानां कुरूणांच पुरस्कृ
त्य घटोत्कचं कौरवास्ततो राजन् प्रययुः शिविरं स्वकं व्रीडमाना निशाकाले पांडवेयैः पराजितैः शर
विक्षतगात्राश्च पांडुपुत्राः महारथाः युद्धं सुमनसो भूत्वा शिविरायैव जिग्मिरे पुरस्कृत्य महाराज भीमसेन
घटोत्कचौ पूजयंतस्तदान्योन्यं मुदा परमया युताः नादंतो विविधान्नादांस्तूर्यस्वनविमिश्रितान् सिं
हनादांश्च कुर्वाणा विमिश्राः शंखनिःस्वनैः विनदंतो महात्मानः कंपयंतश्च मेदिनीं घट्टयंतश्च मर्मा
णि तव पुत्रस्य मारिष प्रयेतुः शिविरायैव निशाकाले परंतपाः दुर्योधनस्तु नृपतिर्दीनो भ्रातृवधेन
च मुहूर्तं चिंतयामास बाष्पशोकसमाकुलः ततः कृत्वा विधिं सर्वं शिविरस्य यथाविधि प्रदध्यौ शो
कसंतप्तो भ्रातृव्यसनकर्षितः इति श्रीमहाभारते भीष्मपर्वणि चतुर्थः दिवसः धृतराष्ट्र उवाच भयं मे
सुमहज्जातं विस्मयश्चैव संजय श्रुत्वा पांडुकुमाराणां कर्म देवैः सुदुःकरं पुत्राणां पराभावं श्रुत्वा संजय सर्व
शः चिंता मे महती सूत भविष्यति कथं त्विति ध्रुवं विदुरवाक्यानि धक्ष्यति हृदयं मम यथा हि दृश्यते स
र्वं दैवं युगेन संजय यत्र भीष्ममुखांच्छूरान्स्त्रज्ञान्योधसुत्तमान् पांडवानामनीकानि योधयंति प्रहा

भीष्म॰ ९८

रिणः केनाऽवध्यामहात्मानः पांडुपुत्रामहाबलाः केन दत्तवरंतातकिंवाज्ञानंवदंतिते येनक्षयंनगच्छंति

दिविभारगणाइव पुनःपुनर्नपश्यामिहतंसैन्यंसपांडवैः मय्येव दंडः पतति दैवंपरमदारुणं दैवमे

वपरंमन्येपौरुषादपिसंजय यत्सैन्यंममपुत्रस्यपांडुसैन्येनबाध्यते नित्यंहिमामकास्तान्हतानेव

वप्रशंससि अन्यंगांश्चप्रहृष्टांश्चनित्यंशंससिपांडवान् विनापुरुषकारेणमामकानघसंजय पति

तान्पात्यमानांश्च हतानेवप्रशंससि युध्यमानायथाशक्तिघटमानाजयंप्रति पांडवाविजयंत्येव

जीयन्ते चैव मामकाः सोऽहंतीव्राणिदुःखानिदुर्योधनकृतानिच अश्रोषंसततंतातदुःसहानिबहूनि

च उपायेनैवपश्यामिजयोयेननपांडवान् मामकावाजयंयुद्धेप्राप्नुयुर्येनसंजय संजयउवाच शृणु

राजन्स्तवहितः श्रुत्वाचैवावधारय नैवमंत्रकृतंकिंचिन्नैवमायांतथाविधं नचैवविभीषिकांकांचित्प्रा

जन्कुर्वंतिपांडवाः युध्यंतेतेयथान्यायंशक्तिमंतश्चसंयुगे धर्मेणसर्वकार्याणिजीवितादीनिभारत

आरंभंतेसदापार्थाजयमुक्ताश्चपार्थिव नतपुत्रास्तुरात्मानःपापेष्वभिरतासदा निष्ठुराहीनकर्माणस्ते

नहीयंतेसंयुगे सुबहूनिनृशंसानिपुत्रैस्तवजनेश्वर निकृतानीहपांडूनांनीचैरिवयथानरैः सर्वंचतद

नादृत्यपुत्राणांतवकिल्बिषं सापह्नवास्तदैवासन्पांडवाःपांडुपूर्वज नचैनान्बहुमन्यंतेपुत्रास्तववि

ते।

राम ९८

शांपते तस्य पापस्य सततं क्रियमाणस्य कर्मणः संप्राप्तं सुमहद्घोरं फलं किंपापसन्निभं तत्त्वं दुःख
महाराजसपुत्रःसुहृज्जनैः नावबुध्यसि यद्राजन्वार्यमाणः सुहृज्जनैः विदुरेणाथभीष्मेण द्रोणेना
थमहात्मना तथा मया चाप्यसकृद्वार्यमाणो न बुध्यसे वाक्यं हितं च पथ्यं च मर्त्यः पथ्यमिवौषधं पु
त्राणां मतमास्थाय जितान्मन्यसि पांडवान् शृणु भूयो यथा तत्त्वं यन्मां त्वं परिपृच्छसि कारणं भर
तश्रेष्ठ पांडवानां जयं प्रति तत्तेऽहं कथयिष्यामि यथाश्रुतमरिंदम दुर्योधनेन संपृष्ट एतदर्थं पि
तामहः दृष्ट्वा भ्रातॄन्रणे सर्वान्निर्जितान्सुमहारथान् शोकसंमूढहृदयो निशाकाले तु कौरवः
पितामहं महाप्राज्ञं विनयेनोपगम्य च यदब्रवीत्सुतस्तुभ्यं तन्मे शृणु नरेश्वर दुर्योधन उवाच द्रोण
श्च त्वं शाल्यश्च कृपो द्रौणिस्तथैव च कृतवर्मा च हार्दिक्यः कांबोजश्च सुदक्षिणः भूरिश्रवा विक
र्णश्च भगदत्तश्च वीर्यवान् महारथाः समाख्याताः कुलपुत्रास्तनुत्यजः त्रयाणामपि लोकानां प
र्याप्ता इति मे मतिः पांडवानां समस्ताश्च नातिष्ठंति पराक्रमं अत्र मे संशयो जातस्तन्ममाचक्ष्व पृ
च्छतः यं समाश्रित्य कौंतेया जयंत्यस्मान्पदे पदे भीष्म उवाच शृणु राजन्वचो मह्यं यत्त्वां वक्ष्यामि
कौरव बहुशश्च मयोक्तोऽसि न च मे तत्त्वया कृतं क्रियतां पांडवैः सार्द्धं शमो भरतसत्तम एतत्क्षतम
हं मन्ये पृथिव्यास्तव चाविभो. भुंक्ष्वे मां पृथिवीं राजन्भ्रातृभिः सहितः सुखी दुर्हृदस्तापयन्सर्वान्

भीष्म० ९७

दयश्चापिवांधवान् ॥ नचमेक्रोशातस्तनुश्रुतवानसि वै पुरा तदिदं समनुप्राप्तं यत्त्वांडून वृमन्यसे
यक्ष्महेतु रवं ध्यत्वे तेषामक्लिष्टकर्मणां तच्छृणुष्वमहाराजममकीर्तयतः प्रभो नास्ति लोकेषु तद्भू
तं भवितानोभविष्यति योजये त्वांडवान्संख्ये पालिताशार्ङ्गधन्वना यत्तुमेकथितं राजन्मुनिभि
र्भावितात्मभिः पुराणगीतं धर्मज्ञ तच्छृणुष्व यथातथं पुराकिल सुराः सर्वे ऋषयश्च समागताः
पितामहमुपासंत पर्वते गंधमादने मध्ये तेषामुपासीनः प्रजापतिरपश्यत विमानं जाज्वल
प्रासास्थितं प्रवरमंवुरे ध्यानेनाचिंत्य तं ब्रह्मा कृत्वा च निजतोञ्जलिं नमश्चकार हृष्टात्मा पर
मं परमेश्वरं ऋषयस्त्वथ देवाश्च दृष्ट्वा ब्रह्माणमुत्थितं स्थिताः प्रांजयः सर्वे पश्यंतो महद
द्भुतं यथातथ्यं तमभ्यर्च्य ब्रह्मा ब्रह्मविदांवरः जगाद जगतः स्रष्टा परं परमधर्मवित् विश्वाव
सुर्विश्वमूर्तिर्विश्वेशो विष्वक्सेनो विश्वकर्मा वशी च विश्वेश्वरो वासुदेवोऽसि तात्मा योगात्मानं
देवतं त्वामुपैमि जय विश्व महादेव जय लोकहिते रत जय योगेश्वर विभो जय योगापराव राम ९७
र पद्मगर्भ विशालाक्ष जय लोकेश्वरेश्वर भूतभव्यभवन्नाथ जय

पवान् व्यधमत्पांडवानीकं तूलराशीमिवानलः तेवध्यमाणा द्रोणेन भीष्मेणच नरोत्तम केकयाः
संजयेः सार्द्धं पलायनपरायणः तथैवतावकं सैन्यं भीमार्जुनपरिक्षतं मुह्यतेतत्रतत्रैव समदेषव
रांगना अभिद्रुतं ततो व्यूहौ तास्मिन्वीरसमागमे आसीद्व्यतिकरो घोरस्तवतेषां च भारत तदद्भुतम
पश्यामतावकानां परैः सह एकायनगताः सर्वे यद्युध्यंत भारत प्रतिसंवार्य चास्त्राणि तेन्योन्यस्य विशां
पते युयुधुः पांडवाश्चैव कौरवाश्च महारथाः भीष्मपर्वणि षष्टे ह्नि धृतराष्ट्र उवाच एवं बहुगुणं सैन्य
मेवं बहुविधं परं व्यूढमेवंयथाशास्त्रममोघं चैव संजय धृष्टमस्माकमत्यंतमभिकामं च नः सदा प्रह्वम
व्यसनोपेतं पुरस्तादृढविक्रमं नातिवृद्धमबालं च न कृशं न च पीवरं लघुवृत्तायतप्रायं सागरप्रख्यम
स्ययं आत्तयानाहृतास्त्रं च बहुशस्त्रपरिग्रहं असियुद्धे नियुद्धे च गदायुद्धे च कोविदं प्रासर्ष्टितोमरे
षु जोपरिघेषु आयसेषु च भिंडिपालेषु शक्तीषु मुशलेषु च सर्वशः अकंपनेषु चापेषु कणपेषु च संजय
क्षेपणीषु विचित्रासु मुष्टियुद्धेषु कोविदं अपरोक्षं च संघेषु व्यायामे च कृतश्रमं शस्त्रग्रहणविद्यासु स
र्वासु परिनिष्ठितं आरोहे पर्यवस्कंदे शरणे सांतचक्रमे सम्यक् प्रहरणे याणे व्यपयाने च कोविदं ना
गाश्वरथयानेषु बहुशः सुपरीक्षितां परीक्ष्य च यथान्यायं वेतनेनोपपादितं न गोष्ठ्या नोपकारे
ण न च वंधुनिमित्ततः आसीदत्र बले श्चापि न कुलीन परिग्रहैः समृद्ध नरमार्यं च तुष्टं सत्कृत वांधवं

भीष्म० हृतोपकारभूयिष्ठंयशस्विचमनस्विच संजयैश्चनरैर्मुख्यैर्वहुशोमुख्यकर्मभिः लोकपालोपमैस्तातपालि
११० तंलोकविश्रुतैः वहुभिःक्षत्रियैर्गुप्तंपृथिव्यांलोकसंमतैः अस्मानुगतैरागात्सवलैःसपदानुगैः महोदधि
मिवापूर्णमापगाभिःसमंततः अपक्षैःपक्षिसंकाशैःरथैर्नागैश्चसंवृतं नानायोधवलंभीमंवाहनोर्मितरंगि
णं क्षेपण्यसिगदाशक्तिशरप्रासमाकुलं ध्वजभूषणसंवाधंरत्नसंचयसंचितं वाहनैरिवसर्पद्भिर्वायु
वेगसकंपनं अपारमिवगर्जंतंसागरप्रतिमंमहत् द्रोणभीष्माभिसंगुप्तंचकृतवर्मणा कृपदुःशासनाभ्यां
चजयद्रथमुखैस्तथा भगदत्तविकर्णाभ्यांद्रौणिसौवलवाह्लिकैः गुप्तंप्रवीरैर्लोकस्यसारवद्भिर्महात्मभिः
यद्धन्यतसंग्रामेदृष्टमेतत्पुरातनं नेतादृशंसमुद्योगंदृष्टवंतोथमानुषाः ऋषयोवामहाभागाःपुराण
भुविसंजय ईदृशोहिवलौघस्तुयुक्तःशस्त्रास्त्रसंपदा वध्यतेयत्रसंग्रामेकिमन्यद्भागधेयतः विपरीत
मिदंसर्वंप्रतिभातिस्मसंजय यत्रेदृशंवलंघोरंनातरद्युधिपांडवान् अथवापांडवार्थायदेवास्तत्रसमागताः
युध्यंतेमामकंसैन्यंयथावदसिसंजय उक्तंहिविदुरेहहितंपथ्यंचसंजय नचगृह्णातितन्सर्वंपुत्रोदुर्यो
धनोमम तस्यमन्येगतिःपूर्वंसर्वज्ञस्यमहात्मनः आसीद्यथासमंतेनयथादृष्टमिदंपुरा अथवाभा राम
व्यमेवंहिसंजयैतत ११०

णिकवचो ज्वलन् तत्यजुः समरे भीमं तव पुत्रा महारथाः तन्नाश्चर्यतत्कौंतेयो जीवमानान्गतानि
ति अन्वीय च पुनः सर्वांस्तव पुत्रानपीडयत् अथाभिमन्युः समरे भीमसेनेन संगतः प्राप्यतेन च सं
योद्यतव सैन्ये महारथाः दुर्योधनप्रभृतयः प्रगृहीतशरासनाः अश्वामश्वैः प्रजवितैः प्रययुः यत्र
ते रथाः अपराह्णे ततो राजन् प्रावर्त्तत महारणः तावकानां च वलिनां परेषां चैव भारत अभिमन्यु
र्विकर्णस्य हयान् हतवान् जवात् अथैनं पंचविंशत्या क्षुद्रकाणां समाचिनोत् हताश्वं स्थमुत्सृज्य वि
कर्णस्तु महारथः आरुरोह रथं राजन् चित्रसेनस्य भास्वरं स्थितावेकरथे तौ तु भ्रातरौ कुरुवर्द्धनौ आ
र्जुनिः शरजालेन छादयामास भारत दुर्जयोथ विकर्णश्च कार्ष्णिं पंचभिरायसैः विव्याध तेनाकंपयत्
कार्ष्णिर्मेरुरिवाचलः दुःशासनस्तु समरे केकयान्पंच मारिष योधयामास राजेंद्र तदद्भुतमिवाभव
त् द्रौपदेयास्तथा पंच दुर्योधनमवारयन् एकैकं त्रिभिरानर्छुः पुत्रं तव विशांपते पुत्रोपि तव दुर्द्धर्षो
द्रौपदेयास्तनयान् रणे सायकैर्निशितैर्वाणै राजघान पृथक्पृथक् तैश्चापि विद्धः शुशुभे रुधिरेण
समुक्षितः गिरिः प्रस्रवणैर्युक्तो गिरिधातुविमिश्रितैः भीष्मोपि समरे राजन् पांडवानां वरूथिनीं
कालयामास वलवान्पालः पशुगणानिव ततो गांडीवनिर्घोषः प्रादुरासीद्विशांपते दक्षिणेन व
रूथिन्याः पार्थस्यारीन्विनिघ्नतः उत्तस्थुः समरे तत्र कवंधानि समंततः कुरूणां वैश्यपसैन्येषु पांडवा

भीष्म॰ ११४

नांच भारत शोणितोदा रथावर्तां नागद्वीपं महोर्मिवत् रथिनो हि नरव्याघ्राः प्रतेरुः रथसागरं छिन्नह
स्ता विकवचा विदेहा मनुजोत्तमाः पतितास्तत्र दृश्यंते भ्रातप्रोद्यसहस्रशः निहतैर्मत्तमातंगैः
शोणितौघपरिप्लुतैः भूर्भातिभरतश्रेष्ठ पर्वतैराचिता यथा तत्राद्भुतमपश्याम तव तेषां भारत न
तत्रासीत्पुमान्कश्चिद्यो युद्धं नाभिकांक्षते एवं युयुधिरे वीराः प्रार्थयाना महद्यशः तावकाः पांडवैः
कांक्षमाणा जयं युधि भीष्मपर्वणि एकोनसप्तत्यधिकशततमोऽध्यायः संजय उवाच ततो दुर्योधनो राजा लोहितायति भास्करे
संग्रामे रभसाभीमं हंतुकामोऽभ्यधावत आयांतमभिप्रेक्ष्य नरवरं दृढवैरिणं भीमसेनस्ततः संक्रु
द्ध इदं वचनमब्रवीत् अयं स कालः संप्राप्तो वर्षपूगाभिकांक्षितः अद्य त्वां निहनिष्यामि यदि नोत्सृ
जसे रणं अद्य कुंत्याः परिक्लेशं वनवासं च कृत्स्नशः द्रौपद्याश्च परिक्लेशं प्रणोत्स्यामि हते त्वयि य
त्त्वं पुरा मत्सरी भूत्वा पांडवानवमन्यसे तस्य पापस्य गांधारे पश्य व्यसनमागतं कर्णस्य मतमास्थाय
सौबलस्य तु यत्पुरा पार्थानचिंतयन्कामान्यथेष्टं कृतवानसि याचमानांश्च यन्मोहाद्दाशा रामं ११४
र्हमवमन्यसे उलूकस्य समा

सैन्यानि रौद्राणि भयानकानि व्यूढानि सम्यक् प्रवलध्वजानि विदार्य हत्वा च निपीड्य शूरांस्तेषां
ड्वानां तरितार योधाः संमोह्य सर्वान् युधि कीर्त्तिभाजस्त्वमाकरं व्यूहसुवज्रकल्पं प्रविश्य भीमे
न निवर्हितोस्मि घोरैः शरैर्मृत्युदंडप्रकाशैः क्रुद्धं तमुद्वीक्ष्य भयेन राजन् संमूर्छितो नालभं शा
र्ममद्य इच्छे प्रसादात्तव सत्यसंध प्राप्तुं जयं पांडवेयांश्च हंतुं तेनैवमुक्तः प्रहसन्महात्मा दुर्योधनं जा
तमन्युं विदित्वा तं प्रत्युवाचातिमना मनस्वी गंगासुतः शास्त्रभृतां वरिष्ठः परेण यत्नेन विगाह्य
सेनां सर्वात्मनाहं तव राजपुत्र इच्छामि दातुं विजयं सुखं च न चात्मानं छादये त्वदर्थे एते तु रौद्रा बहवो
महारथा यशस्विनः शूरतमाः कृतास्त्राः ये पांडवानां समरे सहाया जितश्रमाः क्रोधविषं वमंति
ते नैव शक्याः सहसा विजेतुं वीर्योन्नद्धाः कृतवैरास्त्वया च अहं ह्येतान्प्रतियोत्स्यामि राजन्सर्वात्म
ना जीवितं त्वं विहाय इतो तवार्थाय महानुभावन जीवितं रक्ष्यतमं ममाद्य सर्वांस्तवार्थाय सदेव
दैत्यान् लोकान् जयेहं किमु शत्रूंस्तवेह तान्पांडवान्योधयिष्यामि राजन् प्रियं च ते सर्वमहं क
रिष्ये श्रुत्वैवं वचनं तत्परमप्रीतो दुर्योधनः प्रीतमना बभूव सर्वसैन्यानि ततः प्रहृष्टो निर्गच्छेत्या
ह नृपांश्च सर्वान् तदाज्ञया तानि विनिर्ययुः द्रुतं रथाश्वपादातगजायुतानि प्रहर्षयुक्तानि

भीष्म॰ तुनानिराजन्मलंति नानाविधिशास्त्रवंति स्थितास्य नागानिपदातवंन्निविरेजुराजौ तवराजन्व

११७ न्यानि युद्धे स्थितास्त्रापि मुसंप्रयुक्ताश्च काथिरेदंतिगणाश्चसर्वे शास्त्रास्त्रविद्भिर्नरदेवयोधैरनुष्ठि

ताश्चान्यगणास्त्वजेयाः तथैव पादातिरथाश्वसंघैःप्रयांतिराजन्विविधैवस्त्रनुन्नाः समुद्धतं रवेतरू

णार्कवर्णैरजोवभौछादयन्सूर्यरश्मिन रेजुःपताकारथदंतिसंस्थितावातेरताभ्राम्यमानाःसमंतात्

विरे॰ नानारंगाःसमरेतत्रजुमेघैर्युताविद्युतःखेयथैव धनूंषिविस्फारयतांनृपाणांवभूवशब्दस्तुमु

लोतिघोरः विमथ्यमानस्यसुरासुरैर्घोरैर्यथार्णवस्यादियुगेतदानी तमुग्रनादंवहुरूपवर्णंतवारि

त्मजानांसमुदीर्णवेगं वभौसैन्यंरिपुसैन्यहंतृयुगांतमेघौघनिभंतदानी भीष्मपर्वणि संजयउवा

च अथात्मजंतवपुनर्गांगेयोध्यानमास्थितं अब्रवीद्भरतश्रेष्ठःसंप्रहर्षकरंवचः अहंद्रोणश्चश

ल्यश्चकृतवर्माचसात्वतः अश्वत्थामाविकर्णश्चभगदत्तश्चसैंधवः विंदानुविंदावावंत्यौवाह्लिकःसहवा

ह्लिकैः त्रिगर्त्तराजस्यवलिमागधश्चसुदुर्जयः वृहद्वलश्चकौशल्यश्चित्रसेनोविविंशतिः रथाश्चव

हुसाहस्राःशोभमानामहाध्वजाः देशजाश्चहयाराजन्स्वारूढाहयसादिभिः गजेंद्राश्चमहोद्धृताः

प्रभिन्नकरटामुखाः पादाताश्चतथाशूरानानाप्रहरणायुधाः नानादेशसमुद्भूतास्त्वदर्थेयो

धुमुद्यताः एतेचान्येचवहवस्त्वदर्थेत्यक्तजीविताः देवानपिरणेजेतुंसमर्था इतिमेमतिः अवश्यं राम

हिमहाराजतववाच्यंहितंमया अशक्याःपांडवाजेतुंदेवैरपिसवासवैः वासुदेवसहायाश्चमहेंद्र ११७

समविक्रमः एवमुक्त्वाददौचास्मैविशल्यकरणींशुभां ओषधींवीर्यसंपन्नांविशल्यश्चाभवत्तदा ततः

प्रभातेविम

त्वतं हत्वा प्राविशंत धरातलं चेकितानस्ततः क्रुद्धः पुनश्चिक्षेप तां गदां गौतमस्य वधाकांक्षी ह
ष्यैव पुरंदरः तमापतंतीं विपुलामश्मगर्भां महागदां शरैरनेकसाहस्रैर्वारयामास गौतमः
गौतमस्ततः तदा राजन्प्रगृह्यासिं [illegible] वेगेन महता राजन्चेकितानमुपाद्रवत् तावुभौ बलसं
पन्नौ निस्त्रिंशवरधारिणौ निस्त्रिंशाभ्यां सुतीक्ष्णाभ्यामन्योन्यं संततक्षतुः निस्त्रिंशवेगाभिहितौ तत
स्तौ पुरुषर्षभौ धरणीमनुसंप्राप्तौ सर्वभूतनिषेवितां मूर्छयाभिपरीतांगौ व्यायामेन च मोहितौ
ततोभ्यधावद्वेगेन करकर्षः सुहृत्तया चेकितानं तथाभूतं दृष्ट्वा समरदुर्मदः रथमारोपयत्तं स
[illegible] तथैव शकुनिः शूरः श्यालस्तव विशांपते आरोपयद्रथं तूर्णं गौतमं रथिनां व
रं सोमदत्तिं तथा क्रुद्धो धृष्टकेतुर्महाबलः नवत्या सायकैः क्षिप्रं राजन्विव्याध वक्षसि सोमदत्तिरु
रस्यैस्तैर्भृशं बाणैरशोभत मध्यंदिने महाराज रश्मिभिस्तपनो यथा भूरिश्रवास्तु समरे धृष्टकेतुं
महाबलं हतसूतहयं चक्रे विरथं सायकोत्तमैः विरथं चैनमालोक्य हताश्वं हतसारथिं महता श
रवर्षेण छादयामास संयुगे स च तं रथमुत्सृज्य धृष्टकेतुर्महामनाः आरुरोह ततो यानं शता
नीकस्य मारिष चित्रसेनो विकर्णश्च राजन्दुर्मर्षणस्तथा रथिनो हेमसंनाहाः सौभद्रमभि
दुद्रुवुः अभिमन्योस्ततस्तेषां घोरं युद्धमवर्तत शरीरस्य यथा राजन्वातपित्तकफैस्त्रिभिः

भीष्म
१२४

विरथांस्तवपुत्रांस्तु कृत्वाराजन्महाहवे नजघानमहाराजस्मरभीमस्यभाषितं ततोराज्ञांबहुशतै
र्गजाश्वरथयायिभिः संवृतंसमरेभीष्मंदेवैरपिदुरासदं प्रयांतंशीघ्रमुद्वीक्ष्यपरित्रातुंसुतांस्तव
अभिमन्युंसमुद्दिश्यबालमेकंमहारथं वासुदेवमुवाचेदंकौंतेयःश्वेतवाहनः चोदयाश्वान्
हृषीकेशयत्रैतेबहुलारथाः एतेहिकुशलाःशूराःकृतास्त्रायुद्धदुर्मदाः यथानहन्युर्नःसेनांत
थामाधवचिंतय एवमुक्तःसवार्ष्णेयःकौंतेयेनामितौजसा रथंश्वेतहयैर्युक्तंप्रेषयामाससंयुगे
निष्टानकोमहानासीत्तवसैन्यस्यमारिष यदर्जुनोरणेक्रुद्धःसंयातस्तावकान्प्रति समासाद्यतु
कौंतेयोराज्ञस्तान्भीष्मरक्षिणः सुशर्माणमथोराजन्निदंवचनमब्रवीत् जानामित्वांयुधि
श्रेष्ठमत्यंतंपूर्ववैरिणं पर्यायस्याद्यसंप्राप्तंफलंपश्यसुदारुणं अद्यतेदर्शयिष्यामिपू
र्वजातान्पितामहान् एवंसंजल्पतस्तस्यबीभत्सोःशत्रुघातिनः श्रुत्वातुपरुषंवाक्यंसुश
र्मारथयूथपः नचैनमब्रवीत्किंचिच्छुभंवायदिवाशुभं अभिगम्यार्जुनंवीरोराजभिर्बहुभि
र्वृतः पुरस्तात्पृष्ठतश्चैवपार्श्वतश्चैवसर्वशः परिवार्यार्जुनंसंख्येतवपुत्रैःसहानघ शरैःसंछा
दयामासमेघैरिवदिवाकरं ततःप्रवृत्तःसमहान्संग्रामःशोणितोदकः तावकानांचसमरेपांड
वानांचभारत भीष्मपर्वणिसप्तहि संजयउवाच सतुद्यमानैस्तुशरैर्धनंजयःपदाहतोनाग राम
इवोच्छ्वसन्बली बाणेनबाणेनमहारथानांचिच्छेदचापानिरणेप्रसह्य संछिद्यचापानिचतानिरा १२४
ज्ञांतेषांरणेवीर्यवतांक्षणेन विव्याधबाणैर्युगपन्महा

स्तावन्त एव हि आर्ष्याणां रैठे राक्षसैर्वीरैः प्रासपट्टिशपाणिभिः तेसंरब्धाः समागम्य द्विसाहस्राः प्रहारिणः अचिराद्गमयामा
सुः प्रेतलोकं परस्परं तस्मिंस्तु निहते सैन्ये तावुभौ युद्धदुर्मदौ संग्रामे समतिष्ठेतां यथा वै वृत्रवासवौ आद्रवंतमभिप्रेक्ष्य
राक्षसं युद्धदुर्मदं इरावान्क्रोधसंरब्धः प्रत्यधावन्महाबलः समभ्याशगतस्याजौ तस्य खड्गेन दुर्मदः चिच्छेद कार्मुकं दीप्तं हस्ता
वापं च पंचधा स निकृत्तं धनुर्दृष्ट्वा खं जवेन समाविशत् इरावंतमभिक्रुद्धं मोहयन्मायया तदा ततोऽन्तरिक्षमुत्पत्य इरावा
नपि राक्षसं विमोहयित्वा मायाभिस्तस्य गात्राणि संयुगे चिच्छेद सर्वमर्मज्ञः कामरूपो दुरासदः तथा स राक्षसश्रेष्ठः
कृत्तः कृत्तः पुनः पुनः संबभूव महाराज समवाप च यौवनं मायाहि सहजा तेषां वयो रूपं च कामजं एवं तद्राक्षसस्यांगं छि
न्नं छिन्नं व्यजायत इरावानपि राजेंद्र राक्षसं तं महाबलं परश्वधेन तीक्ष्णेन चिच्छेद च पुनः पुनः स तेन बलिना वीर श्छि
द्यमान इव द्रुमः राक्षसो व्यनदद्घोरं स शब्दस्तुमुलोऽभवत् परश्वधक्षतं रक्षः सुस्राव रुधिरं बहु ततः श्चुक्रोध बलवां
श्चक्रे वेगं च संयुगे आर्ष्यशृंगिस्ततो दृष्ट्वा समरे शत्रुमूर्जितं कृत्वा घोरं महद्रूपं विगृहीतुं प्रचक्रमे अर्जुनस्य सुतं वीर
मिरावंतं यशस्विनं संग्रामशिरसो मध्ये सर्वेषां तत्र पश्यतां तां दृष्ट्वा तादृशीं मायां राक्षसस्य दुरात्मनः इरावानपि
संक्रुद्धो मायां स्रष्टुं प्रचक्रमे तस्य क्रोधाभिभूतस्य संयुगेष्वनिवर्तिनः योऽन्वयो मातृकस्तस्य स एनमभिपेदिवान् स ना
गैर्बहुशो राजन्संवृतः सर्वतो रणे दधार सुमहद्रूपमनंत इव भोगवान् मायया च्छादिते तस्मिन्नन्वये तस्य मातृके वि
मोहितमिरावंतं न्यहनद्राक्षसोऽसिना सकुंडलं समुकुटं पद्मेंदुसदृशप्रभं इरावतः शिरो रक्षः पातयामास भूतले

तस्मिंस्तु निहते वीरे राक्षसेनार्जुनात्मजे विशोकाः समपद्यन्त धार्त्तराष्ट्राः सराजकाः तस्मिन्महति संग्रामे तादृशे भै
रवे पुनः महान्व्यतिकरो घोरः सेनयोः समपद्यत गजा हताः पदाताश्च विमिश्रा दन्तिभिर्हताः रथाश्वा दन्तिनश्चैव
पत्तिभिस्तत्र सूदिताः तथा पत्ती रथो वाश्वा हयश्च बहवो रणे रथिभिर्निहता राजंस्तव तेषां च संयुगे अजानन्नार्जुनश्चा
पि निहतं पुत्रमौरसं जघान समरे शूरान् राज्ञस्तान्भीष्मरक्षिणः तथैव तावका राजन्सृंजयाश्च सहस्रशः जुह्वतः समरे
प्राणान्निजघ्नुरितरेतरं मुक्तकेशा विकवचा विरथाश्छिन्नकार्मुकाः बाहुभिः समयुध्यन्त समवेताः परस्परं तथा मर्मा
तिगैर्भीष्मो निजघान महारथान् कंपयन्समरे सेनां पांडवानां परंतपः तेन यौधिष्ठिरे सैन्ये बहवो मानवा हताः दन्तिनः
सादिनश्चैव रथिनोथ हयास्तथा तत्र भारत भीष्मस्य रणे दृष्ट्वा पराक्रमं अत्यद्भुतमपश्याम शक्रस्येव पराक्रमं तथैव भी
मसेनस्य पार्षतस्य च भारत रौद्रमासीद्रणं घोरं सात्यकस्य च धन्विनः दृष्ट्वा द्रोणस्य विक्रान्तं पांडवान्भयमाविशत्
एक एव रणे शक्तो निहन्तुं सर्वसोमकान् किं पुनः पृथिवीशूरैर्योधव्रातैः समावृतः इत्यब्रुवन्महाराज रणे द्रोणेन पीडि
ताः वर्त्तमाने तथा रौद्रे संग्रामे भरतर्षभ उभयोः सेनयोः शूरा नामृष्यन्त परस्परं आविष्टा इव युध्यन्ते रक्षो भूता महा
बलाः तावकाः पांडवेयाश्च संरब्धास्तात धन्विनः न स्म पश्यामहे कंचिद्यः प्राणान्पः परिरक्षति संग्रामे दैत्यसंकाशे तस्मि
न्वीरवरक्षये भीष्मपर्वणि एप२ माहे धृतराष्ट्र उवाच इरावन्तं तु निहतं दृष्ट्वा पार्था महारथाः संग्रामे किमकुर्वन्त तन्म
माचक्ष्व संजय संजय उवाच इरावन्तं तु निहतं संग्रामे वीक्ष्य राक्षसः व्यनदत्सुमहानादं भैमसेनिर्घटोत्कचः

नदतस्तस्यशब्देनपृथिवीसागरांबरा सपर्वतवनाराजंश्चचालसुभृशंतदा अंतरिक्षंदिशश्चैवसर्वाश्चप्रदिशस्तथा
तंश्रुत्वासुमहानादंतवसैन्यस्यभारत ऊरुस्तंभःसमभवद्वेपथुःस्वेदएवच सर्वएवचराजेंद्रतावकादीनचेतसः सर्वतः
समवेष्टंतसिंहभीतागजाइव नदित्वासुमहानादंनिर्घातमिवराक्षसः ज्वलितंशूलमुद्यम्यरूपंकृत्वाविभीषणं ना
नारूपप्रहरणैर्घोरैराक्षसपुंगवैः आजगामसुसंक्रुद्धःकालांतकयमोपमः तमापतंतंसंप्रेक्ष्यसंक्रुद्धंभीमदर्शनं
स्वबलंचभयात्तस्यप्रायशोविमुखीकृतं ततोदुर्योधनोराजाघटोत्कचमुपाद्रवत् प्रगृह्यविपुलंचापंसिंहवद्विन
दन्मुहुः पृष्ठतोनुययौचैनंस्रवद्भिःपर्वतोपमैः कुंजरैर्दशसाहस्रैर्वंगानामधिपःस्वयं तमापतंतंसंप्रेक्ष्यगजानीके
नसंवृतं पुत्रंतवमहाराजचुकोपसनिशाचरः ततःप्रववृतेयुद्धंतुमुलंलोमहर्षणं राक्षसानांचराजेंद्रदुर्योधनब
लस्यच गजानीकंचसंप्रेक्ष्यमेघवृंदमिवोद्यतं अभ्यधावंतसंक्रुद्धाराक्षसाःशस्त्रपाणयः नदंतोविविधान्नादान्मे
घाइवसविद्युतः शरशक्त्यृष्टिनाराचैर्निघ्नंतोगजयोधिनः भिंदिपालैस्तथाशूलैर्मुद्गरैःसपरश्वधैः पर्वताग्रैश्च
वृक्षैश्चनिजघ्नुस्तेमहागजान् भिन्नकुंभान्विरुधिरान्भिन्नगात्रांश्चवारणान् अपश्याममहाराजवध्यमानान्नि
शाचरैः तेषुप्रक्षीयमाणेषुभग्नेषुगजयोधिषु दुर्योधनोमहाराजराक्षसान्समुपाद्रवत् अमर्षवशमापन्नस्त्यक्त्वा
जीवितमात्मनः मुमोचनिशितान्बाणान्राक्षसेषुपरंतप जघानचमहेष्वासःप्रधानांस्तत्रराक्षसान् संक्रुद्धोभरतश्रे

भीष्म० स्पुत्रो दुर्योधनस्तव वेगवंतं महारौद्रं विद्युज्जिह्वं प्रमाथिनं शरै श्चतुर्भिश्चतुरो निजघान महाबलः ततः पुनरमे
१३५ यात्मा शरवर्षैर्दुरासदं मुमोच भरतश्रेष्ठो निम्नगात्रखलंप्रति तन्नदृष्ट्वा महत्कर्म पुत्रस्य तव मारिष क्रोधेनाभिप्रजज्व
लभैमसेनिर्महाबलः सविस्फार्य महच्चापमिंद्राशनिसमप्रभं अभिदुद्राव वेगेन दुर्योधनमरिंदमं तमापतंत
मुद्वीक्ष्य कालसृष्टमिवांतकं नविव्यधे महाराज पुत्रो दुर्योधनस्तव अथैनमब्रवीत्क्रुद्धः क्रूरः संरक्तलोचनः अद्या
नृण्यं गमिष्यामि पितॄणां मातुरेव च ये त्वया सुनृशंसेन दीर्घकालं प्रवासिताः यच्च ते पांडवा राजन्छलद्यूते पराजि
ताः यच्चैव द्रौपदी कृष्णा एकवस्त्रा रजस्वला सभामानीय दुर्बुद्धे बहुधा क्लेशिता त्वया तवच प्रियकामेन यश्चाश्रमस्था
दुरात्मना सैंधवेन परामृष्टा परिभूय पितॄन्मम एतेषामपमानानामन्येषां च कुलाधम अंतमद्य गमिष्यामि य
दि नोत्सृजसे रणं एवमुक्त्वा तु हैडिंबो महद्विस्फार्य कार्मुकं संदश्य दशनैरोष्ठं सृक्किणी परिसंलिहन् शरवर्षेण महता दु
र्योधनमवाकिरत् पर्वतं वारिधाराभिः प्रावृषीव बलाहकः भीष्मपर्वे एष्टमोहे संजय उवाच ततस्तद्बाणवर्षं तु दु
स्सहं दानवैरपि दधार युधिराजेंद्रो यथा वर्षं महाद्विपः ततः क्रोधसमाविष्टो निश्वसन्निव पन्नगः संशयं परमं प्राप्तः
पुत्रस्ते भरतर्षभ मुमोच निशितांस्तीक्ष्णान्नाराचान्पंचविंशतिं तेपतन्सहसा राजंस्तस्मिन्राक्षसपुंगवे आसीद
शीविषा इव क्रुद्धाः पर्वते गंधमादने स तैर्विद्धः स्रवन्रक्तं प्रभिन्न इव कुंजरः दध्रे मतिं विनाशाय राज्ञः स पिशिताश राम
नः जग्राह च महाशक्तिं गिरीणामपि दारणीं संप्रदीप्तां महोल्काभामशनीं ज्वलितामिव समुद्यच्छन्महाबाहुर्जि १३५

द्वौ मुक्तनयत्तव तानुध तामभिप्रेक्ष्य वेगानामधिपस्त्वरन् कुंजरं गिरिसंकाशं राक्षसं प्रत्यनोदयत् स नागप्रवरेण
जौ बलिनाशीघ्रगामिना पतो दुर्योधनरथ तेमार्गश्चन्यपद्यत रथं चवारयामास कुंजरेणसुतस्यते मार्गमावा
रितं दृष्ट्वा राज्ञा वेगेन धीमता वृटोत्कचो महाराज क्रोधसंरक्तलोचनः उद्यतां तां महाशक्तिं तस्मिंश्चिक्षेपवारणे
स तयाभिहतो राजंस्तेन बाहुप्रमुक्तया संजातरुधिरोत्पीडः पपात च ममार च पतत्यथ गजे चापि वंगानामीश्वरो
बली जवेन समभिद्रुत्य जगाम धरणीतले दुर्योधनोऽपि संप्रेक्ष्य पतितं वरवारणं प्रभग्नं च बलं दृष्ट्वा जगाम परमां
व्यथां क्षत्रधर्मं पुरस्कृत्य आत्मनश्चाभिमानितां प्राप्तेऽपक्रमणे राजा तस्थौ गिरिरिवाचलः संधाय च शितं बाणं
कालाग्निसमतेजसं मुमोच परमक्रुद्धस्तस्मिन्घोरे निशाचरे तमायतं तं संप्रेक्ष्य बाणमिंद्राशनिप्रभं लाघवा
न्मोचयामास महात्मा स घटोत्कचः भृशं च वि ननादोग्रं क्रोधसंरक्तलोचनः त्रासयामास सैन्यानि युगांते जलदो
यथा तं श्रुत्वा निनदं घोरं तस्य भीमस्य राक्षसः आचार्यमुपसंगम्य भीष्मः शांतनवो ब्रवीत् यथैष निनदो घोरः
श्रूयते राक्षसेरितः हैडिंबो युध्यते नूनं राज्ञा दुर्योधनेन ह नैष शक्यो हि संग्रामे जेतुं भूतेन केनचित् तत्र गच्छत
भद्रं वो राजानं परिरक्षत अभिद्रुतो महाभागो राक्षसेन महात्मना एतद्धि परमं कृत्यं सर्वेषां नः परंतपाः पितामहव
चः श्रुत्वा त्वरमाणा महारथाः उत्तमं जवमास्थाय प्रययुर्यत्र कौरवः द्रोणश्च सोमदत्तश्च बाल्हिको ऽथ जयद्रथः

भीष्म° कृपो भूरिश्रवाः शल्यश्चावन्त्यः सबृहद्बलः अश्वत्थामा विकर्णश्च चित्रसेनो विविंशतिः रथाश्चानेकसाहस्रा ये
१३६ तेषामनुजायिनः अभिद्रुतं परीप्सन्तः पुत्रं दुर्योधनं तव तदनीकमनाधृष्यं पालितं तु महारथैः आततायिनमायान्
तं प्रेक्ष्य राक्षससत्तमः नाकंपत महाबाहुर्मैनाक इव पर्वतः प्रगृह्य विपुलं चापं ज्ञातिभिः परिवारितः शूलमुद्ग
रहस्तैश्च नानाप्रहरणैरपि ततः समभवद्युद्धं तुमुलं लोमहर्षणं राक्षसानां च मुख्यस्य दुर्योधनबलस्य च धा
नुषां कूजतां शब्दः सर्वतस्तुमुलो रणे अश्रूयत महाराज वंशानां दह्यतामिव अस्त्राणां पात्यमानानां कवचेषु
शरीरिणां शब्दः समभवद्राजन्नद्रीणामिव भिद्यतां वीरबाहुविसृष्टानां तोमराणां विशांपते रूपमासीद्वियत्स्थानां सर्प्पा
णामिव सर्प्पतां ततः परमसंक्रुद्धो विस्फार्य सुमहद्धनुः राक्षसेन्द्रो महाबाहुर्विनदन्भैरवं रवं आचार्यस्यार्द्धचंद्रेण क्रु
द्धश्छित्त्वा कार्मुकं सोमदत्तस्य भल्लेन ध्वजं चोन्मथ्य चानदत् बाह्लीकं च त्रिभिर्बाणैः प्रत्यविध्यत्स्तनांतरे कृपमेकेन
विव्याध चित्रसेनं त्रिभिः शरैः पूर्णायतविसृष्टेन सम्यक्प्रणिहितेन च जत्रुदेशे समासाद्य विकर्णं समताडयत् न्य
षीदत्स रथोपस्थे शोणितेन परिप्लुतः ततः पुनरमेयात्मा नाराचान्दश पंच च भूरिश्रवसः संक्रुद्धः प्राहिणोद्भरत
र्षभ ते वर्म भित्त्वा तस्याशु प्राविशन्धरणीतलं विविंशतेश्चाश्वत्थाम्नो यंतारौ समताडयत् तौ पेततू रथोपस्थे रश्मीनुत्सृ
ज्य वाजिनां सिंधुराज्ञोऽर्द्धचंद्रेण वाराहं स्वर्णभूषितं उन्ममाथ महाराज द्वितीयेनाच्छिनद्धनुः तु तस्य वाजिनां सिंधु राम
राज्ञोऽर्द्धचंद्रेण वराहं स्वर्णभूषितं उन्ममाथ महाराज द्वितीयेनाच्छिनद्धनुः चतुर्भिरथ नाराचैरावन्त्यस्य महात्मनः १३६

द्रोणेष्ठ २

जघानचतुरोवाहान्क्रोधसंरक्तलोचनः परायतविसृष्टेनपीतेननिशितेनच निर्बिभेदमहाराजतवपुत्रंवृकोदरं सगाढविद्धोव्यथितोरथोपस्थउपाविशत् सशंक्रोधेनचाविष्टोरथस्योराक्षसाधिपः चिक्षेपनिशितांस्तीक्ष्णांक्ष्‌राणाशीविषोपमान् बिभिदुस्तेमहाराजशल्यंयुद्धविशारदं भीष्मपर्वणिपञ्चमाहे संजयउवाच विमुखीकृत्यतान्सर्वांस्तावकान्युधिराक्षसः जिघांसुर्भरतश्रेष्ठदुर्योधनमुपाद्रवत् तमापतंतंसंप्रेक्ष्यराजानंप्रतिवेगितं अभ्यधावज्जिघांसंतस्तावकायुद्धदुर्मदाः तालमात्राणिचापानिविकर्षंतोमहाबलाः तमेकमभ्यधावन्तनदंतःसिंहसंघवत् अथैनंशरवर्षेणसमंतात्पर्यवारयन् पर्वतंवारिधाराभिःशरदीवबलाहकाः सगाढविद्धोव्यथितस्तोत्रार्दितइवद्विपः उत्पपाततदाकाशंसमंतात्वैनतेयवत् व्यनदत्सुमहानादंजीमूतइवशारदः दिशःखंप्रदिशश्चैवनादयन्भैरवंरवं राक्षसस्यतुतंशब्दंश्रुत्वाराजायुधिष्ठिरः उवाचभरतश्रेष्ठभीमसेनमिदंवचः युध्यतेराक्षसोनूनंधार्तराष्ट्रैर्महारथैः तथास्यश्रूयतेशब्दोनदतोभैरवंस्वनं अतिभारंचपश्यामितत्रतातसमाहितं पितामहश्चसंक्रुद्धःपांचालान्हंतुमुद्यतः तेषांचरक्षणार्थाययुध्यतेफाल्गुनःपरैः एतच्छ्रुत्वामहाबाहोकार्यद्वयमुपस्थितं गच्छरक्षस्वहैडिंबंसंशयंपरमंगतं भ्रातुर्वचनमाज्ञायत्वरमाणोमहारथः प्रययौसिंहनादेनत्रासयन्सर्वपार्थिवान् वेगेनमहताराजन्पर्वकालेमहोदधिः तमन्वयात्सत्यधृतिःसोविनिर्युद्धदुर्मदः

भीष्म० अरुणिमान्चसुतनस्य पुत्रः काश्यपस्याभिभूः अभिमन्युमुखाश्चैव द्रौपदेयामहारथाः तत्रैव अविक्रान्तः तत्र धर्मा
१३७ तथैव च अनूपाधिपतिश्चैव नीलः स्वबलमास्थितः महता रथवंशेन हैडिंबं पर्यवारयन् कुंजरैश्च महामत्तैः षष्ठिहायनैः
प्रहारिभिः अन्यरक्षत्तसहिता राक्षसैर्हि रक्षसैर्द्वंद्वघटोत्कचं सिंहनादेन महता नेमिघोषेण चैव हि बृंहितैर्वीररणानां
चकंपयत्तो वसुंधरां तेषामापततोश्रुत्वा सर्वैतत्तावकंबलं भीमसेनभयोद्विग्नं विवर्णवदनं तदा परिवृत्तं महारा
ज परिवार्य घटोत्कचं ततः प्रववृते युद्धं तत्र तत्र महात्मनां तावकानां परेषां च संग्रामेष्वनिवर्त्तिनां नानारूपाणि शस्त्रा
णि विसृजन्तो महारथाः अन्योन्यमभिधावन्तः संप्रहारं प्रचक्रिरे व्यतिषक्तं महारौद्रं युद्धं भीरुभयावहं हया गजैस्स
माजग्मुः पदाता रथिभिः सह अन्योन्यं समरे राजन्प्रार्थयाना महद्यशः सहसा चाभवत्तीव्रं सन्निपातमभूं रजः रथा
श्वगजपत्तीनां खुरनेमिसमुद्धतं धूम्रारुणं रजस्तीव्रं रणभूमिं समावृणोत् नैव स्वं न परं चैव समप्रजानन्परस्परं पि
ता पुत्रं न जानीते पुत्रो वा पितरं तथा निर्मर्यादे तथा भूते वैशसे लोमहर्षणे शस्त्राणां भरतश्रेष्ठ मनुष्याणां च गर्जतां
सुमहानभवच्छब्दो वेणूनामिव दह्यतां गजवाजिमनुष्याणां शोणितोत्र तरंगिणी प्रावर्त्तत नदी तत्र केशशैवलशाद्वला द्रो४
नराणां चैव कायेभ्यः शिरसां पततां रणे शुश्रुवे सुमहाञ्छब्दः पततामश्मनामिव विशिरस्कैर्मनुष्यैश्च छिन्न
गात्रैश्च वारणैः अश्वैः संभिन्नदेहैश्च संस्तीर्णाभूद्वसुंधरा नानारूपाणि शस्त्राणि विसृजन्तो महारथाः अन्योन्य राम
मभ्यवर्त्तन्त सप्रहारं प्रचक्रिरे हया हयान्समासाद्य प्रेषिता हयसादिभिः समाहत्य रणेन्योन्यं निपेतुर्गतजीविताः न १३७

रान्नराः समासाद्य क्रोधरक्तेक्षणा भृशं उरांस्युरोभिरन्योन्यं समाश्लिष्य निजघ्निरे प्रेषिताश्च महामात्रैर्वारणाः
परवारणान् अभ्यघ्नन्विषाणाग्रैर्वारणानेव संयुगे तेगजाः रुधिरोत्पीडाः पताकाभिरलंकृता असंशक्ताः समदृश्यप
न्तमेघा इव सविद्युतः केचिद्भिन्ना विषाणाग्रैर्वारणानेव संयुगे व्यनदन्नभ्यधावन्नगर्जन्तो जलदा इव केचिद्धस्तैर्द्वि
धाच्छिन्नैश्छिन्नगात्रास्तथापरे निपेतुस्तुमुले तस्मिंश्छिन्नपक्षा इवाचलाः पार्श्वैर्विद्रावितास्त्वन्ये त्वारणैः परवार
णाः मुमुचुः शोणितं भूरि धातूनिव महीधराः नाराचैर्विहतास्त्वन्ये तथा विद्धाश्च तोमरैः हतारोहा व्यदृश्यन्त विशृंगा
इव पर्वताः केचित्क्रोधसमाविष्टा मदान्धा निरवग्रहाः रथान्हयान्पदातींश्च ममृदुः शतशो रणे तथा हया हयारोहैः
स्तादिताः प्रासतोमरैः तेन तेनाववर्तन्त कुर्वन्तो व्याकुला दिशः रथिनो रथिभिः सार्द्धं कुलपुत्रास्तनुत्यजः परां शक्तिं
समास्थाय चक्रुः कर्माण्यभीतवत् स्वयंवर इवामर्द्दे प्रजह्नुरितरेतरं प्रार्थयाना यशो राज्ञः स्वर्गं वा युद्धशा
लिनः तस्मिंस्तथा वर्त्तमाने संग्रामे लोमहर्षणे धार्त्तराष्ट्रं महत्सैन्यं प्रायशो विमुखीकृतं इति भीष्मप० ऽष्टमदिवसे
संजय उवाच स्वसैन्यं निहतं दृष्ट्वा राजा दुर्योधनः स्वयं अभ्यधावत संक्रुद्धो भीमसेनमरिंदमं प्रगृह्य सुमह
च्चापमिन्द्राशनिसमस्वनं महता शरवर्षेण पाण्डवं समवाकिरत् अर्द्धचन्द्रं च संधाय सुतीक्ष्णं लोमवाहिनं भी
मसेनस्य चिच्छेद चापं क्रोधसमन्वितः तदन्तरे च संप्रेक्ष्य त्वरमाणो महारथः प्रसंदधे शितं बाणं गिरीणामपि दा
रणं तेनोरसि महाबाहुं भीमसेनमताडयत् स गाढविद्धो व्यथितः सृक्किणी परिलेलिहन् समालंबे तेजस्वी ध्व

भी०प्र० जं हेमपरिस्कृतं तथाविमनसं दृष्ट्वा भीमसेनं वृकोदरः क्रोधेनाभिप्रजज्वाल दिधक्षुरिव पावकः तमेवाभिमुखा
१३८ श्चैव पांडवानां महारथाः समभ्यधावन्क्रोशन्तो राजा जातसंभ्रमा संप्रेक्ष्य तानाथ ततः संक्रुद्धाञ्जातसंभ्रमान् भारद्वा
जोब्रवीद्वाक्यं तावकानां महारथान् क्षिप्रं गच्छत भद्रं वो राजानं परिरक्षत संशयं परमं प्राप्तं मज्जन्तं व्यसनार्णवे
एते क्रुद्धा महेष्वासाः पांडवानां महारथाः भीमसेनं पुरस्कृत्य दुर्योधनमुपद्रुताः नानाविधानि शस्त्राणि विसृ
जन्तो जयेरता नदन्तो भैरवान्नादांस्त्रासयन्तश्च भूमिपाः उवाचाय वचः श्रुत्वा सोमदत्तपुरोगमाः तावकाः स
मवर्त्तन्त पांडवानामनीकिनी कृपो भूरिश्रवाः शल्यो द्रोणपुत्रो विविंशतिः चित्रसेनो विकर्णश्च सैंधवो थ ज
यद्रथः आवंत्यौ च महेष्वासौ कौरवं पर्यवारयत् ते विंशतिपदं गत्वा संप्रहारं प्रचक्रिरे पांडवा धार्त्तराष्ट्राश्च प
रस्परजिगीषवः एवमुक्त्वा महाबाहुर्महद्विस्फार्य कार्मुकं भारद्वाजस्ततो भीमं षड्विंशत्या समार्पयत् भूयश्चैनं मह
ाबाहुः शरैस्समवाकिरन् पर्वतं वारिधाराभिः प्रावृषीव बलाहकः तं प्रत्यविध्यद्दशभिर्भीमसेनः शिलीमुखैः त्व
रमाणो महेष्वासः सव्ये पार्श्वे महाबलः समागाढविद्धो व्यथितो मर्मविद्धश्च भारत प्रनष्टसंज्ञः सहसा रथोपस्थ उपा
विशत् गुरुं प्रव्यथितं दृष्ट्वा राजा दुर्योधनः स्वयं द्रौणिश्च निरस्तसन्क्रुद्धौ भीमसेनमभिद्रुतौ तावापतन्तौ संप्रेक्ष्य तदा
कालान्तकोपमौ भीमसेनो महाबाहुर्गदामादाय सत्वरः अवप्लुत्य रथात्तूर्णं तस्थौ गिरिरिवाचलः समुद्यम गदां
गुर्वी कालदंडोपमां रणे तमुद्यतगदं दृष्ट्वा कैलासमिव शृंगिणं कौरवो द्रोणपुत्रश्च सहितावभ्यधावतां तावाप राम

तं तौ सहितौ त्वरितौ बलिनां वरौ अभ्यधावत वेगेन त्वरमाणो वृकोदरः तमापतंतं संप्रेक्ष्य संरब्धं भीमदर्शनं समभ्य
धावंस्त्वरिताः कौरवाणां महारथाः भारद्वाजमुखाः सर्वे भीमसेनजिघांसया नानाविधानि शस्त्राणि भीमस्योरस्य पातय
न् सहिताः कौरवाः सर्वे पीडयन्तः समंततः तं तं संशयं प्राप्तं पीड्यमानं महारथं अभिमन्युप्रभृतयः पांडवानां म
हारथाः अभ्यधावन्परीप्सन्तः प्राणांस्त्यक्त्वा सुदुस्त्यजान् अनूपाधिपतिर्वीरो भीमस्य दयितः सखा नीलो नीलांबुद
प्रख्यः संक्रुद्धो द्रोणमभ्ययात् स्पर्द्धते हि महेष्वासो नित्यं द्रोणसुतेन सः स विस्फार्य महच्चापं द्रौणिं विव्याध पत्रिणा
यथा शक्रो महाराज पुरा विव्याध दानवं विप्रचित्तं दुराधर्षं देवतानां भयावहं येन लोकत्रयं रोषात्त्रासितं स्वेन तेज
८२ सा यथा नीलेन निर्भिन्नः सुमुखेन पत्रिणा संजातरुधिरोत्पीडो द्रौणिः क्रोधसमन्वितः विस्फार्य धनुश्चित्रं
इंद्राशनिसमस्वनं दध्रे नीलविनाशाय मतिं मतिमतां वरः ततः संधाय विपुलान् भल्लान् कर्मारयापितान्
जघान चतुरो वाहान् पातयामास च ध्वजं सप्तमेन भल्लेन नीलं विव्याध वक्षसि स गाढविद्धो व्यथितो
रथोपस्थ उपाविशत् मोहितं वीक्ष्य राजानं नीलमभ्रचयोपमं घटोत्कचोपि संक्रुद्धो भ्रातृभिः परिवारितः
अभिदुद्राव वेगेन द्रौणिमाहवशोभिनं तथेतरे अभ्यधावन् राक्षसान् भीमदर्शनान् ये भग्ना यतः कु
द्धराक्षसान् युद्धदुर्मदान् तमापतंतं संप्रेक्ष्य राक्षसं घोरदर्शनं अभ्यधावत तेजस्वी भारद्वाजात्मजस्त्व
रन् निजघान स संक्रुद्धो राक्षसान् भीमदर्शनान् ये भवन्नग्रतः क्रुद्धा राक्षसस्य पुरःसरः विमुखांश्चैव

६१

भीष्म० तानं दृष्ट्वा द्रौणिरायस्य तु तैः शरैः आ... तमलक्कायामैमसेनिर्घटोत्कचः प्रादुश्चक्रे ततो मायां घोररू
१३९ पांसुदारुणां मोहयन्समरे द्रौणिं मायावी राक्षसाधिपः ततस्ते तावकाः सर्वे मायया विमुखीकृताः
अन्योन्यं समपश्यंत निकृत्ता मेदिनीतले विचेष्टमानान् कृपणं शोणितेन समुक्षितान् द्रोणं दुर्योधनं शल्य
मश्वत्थामानमेव च प्रायशश्च महेष्वासा ये प्रधानाश्च कौरवाः विध्वस्ता रथिनः सर्वे गजाश्च विनिपा
तिताः हयाश्च सहसारोहा विनिकृत्ताः सहस्रशः तद्दृष्ट्वा तावकं सैन्यं विद्रुतं शिबिरं प्रति मम प्राक्रो
शतो राजन्स्तव देवव्रतस्य च युध्यध्वं मा पलायध्वं च मायैषा राक्षसी रणे घटोत्कचप्रयुक्तेति नातिष्ठं
त विमोहिता नैव ते दुष्ट्वद्रु भीता वदतो मे रावयोर्वचः तांश्च प्रद्रवतां दृष्ट्वा जयं प्राप्ताश्च पांडवाः घटो
त्कचेन सहिताः सिंहनादान्प्रचक्रिरे शंखदुंदुभिघोषाश्च समंतान्सस्वनुर्भृशं एवं तव बलं रा
जन्हेर्देवेन दुरात्मना सूर्यास्तसमवेलायां प्रभग्नं विद्रुतं दिशः संजय उवाच तस्मिन्महति संक्रंदे
राजा दुर्योधनस्तदा गांगेयमुपसंगम्य विनयेनाभिवाद्य च तस्य सर्वं यथावृत्तमाख्यातमुपच
क्रमे घटोत्कचस्य विजयमात्मनश्च पराजयं कथयामास दुर्धर्षो विनिःश्वस्य पुनः पुनः अब्र राम
वीच्च तदा राजन् भीष्मं कुरुपितामहं भवंतं समुपाश्रित्य वासुदेवं यथा परैः पांडवैर्विग्रहो घोरो १३९

समारब्धो मया प्रभो एकादश समाः ख्याता अक्षौहिण्यो मया मम निदेशात् वर्तितुं वेला महासा
धं परंतप सोऽहं त्वरत शार्दूल भीमसेनपुरोगमैः घटोत्कचं समासाद्य पांडवैर्युधि निर्जितः
तन्मे दहति शार्दूल शुष्कं वृक्षमिवानलः तदिच्छामि महाभाग त्वत्प्रसादात् परंतप राक्ष
सं सापशदं हंतुं स्वयमेव पितामह त्वां समाश्रित्य तन्मे कर्तुमिवार्हसि एतच्छ्रुत्वा तु व
चनं राज्ञो भरतसत्तम दुर्योधनमिदं वाक्यं भीष्मः शांतनवोऽब्रवीत् शृणु राजन् मम वचो य
त्वां वक्ष्यामि कौरव यथा त्वया महाराज वर्तितव्यं परंतप आत्मा रक्ष्यो रणे तात सर्वावस्थम
रिंदम धर्मराजेन संग्रामः सदा कार्यो त्वयानघ अर्जुनेन यमाभ्यां वा भीमसेनेन वा पुनः
राजधर्मं पुरस्कृत्य राजा राजानमर्छति अहं द्रोणः कृपो द्रौणिः कृतवर्मा च सात्वतः शल्य
श्च सोमदत्तिश्च विकर्णश्च महारथः तव च भ्रातरः शूरा दुःशासनपुरोगमाः त्वदर्थं प्रतियो
त्स्यामो राक्षसं तं महाबलम् तस्मिन् रौद्रे राक्षसेंद्रे यदि ते हृद्यो महान् अयं वा गच्छतु रणे तस्य
युद्धाय दुर्मतेः भगदत्तो महीपालः पुरंदरसमो युधि एतावदुक्त्वा राजानं भगदत्तमथाब्रवीत्
समक्षं पार्थिवेंद्रस्य वाक्यं वाक्यविशारदः शीघ्रं गच्छ महाराज हैडिंबं युद्धदुर्मदम् वारयस्व रणे
यत्

भी० प्म० १८०

यत्तोभिषतां सर्वधन्विनाम् राक्षसं क्रूरकर्माणां यथेंद्रस्तारकं पुरा तव शास्त्राणि दिव्यानि विक्रमश्चापरंतप स
मागमश्च बहुभिः पुरा भद्रं वरैः सह त्वं वा स्ववाणशार्दूल प्रतियोधा महाहवे स्वबलेन वृतो राजन् जहि रा
क्षसपुंगवम् एतन्श्रुत्वा सुवचनं भीष्मस्य तनयस्ततः प्रययौ सिंहनादेन परानतिमुखो द्रुतम् तमाद्र
वंतं संप्रेक्ष्य गर्जंतमिव तोयदम् अभ्याद्रवंत संक्रुद्धाः पांडवानां महारथाः भीमसेनोभिमन्युश्च राक्षसश्च
घटोत्कचः द्रौपदेयाः सत्यधृतिः तदेवाश्च मारिष वसुधियो वसुधारश्च दाशार्णाधिपतिस्तदा सुप्रती
केन तं श्चापि भगदत्तोप्युपाद्रवत् ततः समभवद्युद्धं घोररूपं भयानकम् पांडूनां भागदत्तेन यमराष्ट्रवि
वर्धनम् प्रमुक्ता रथिभिर्बाणा भीमवेगाः सुतेजनाः ते निपेतुर्महाराज नागेषु च रथेषु च प्रभिन्नाश्च
महाभागा विनीता हस्तिसादिभिः परस्परं समासाद्य सन्निपेतुरभीतवत् मदांधा रोषसंविग्ना वा
विषाणाग्रैर्महारणे विभिदुर्दंतमुसलैः समासाद्य परस्परम् हयाश्च तोमरापीडाः प्रासपाणिभि
रास्थिताः चोदिताः सादिभिर्दिप्रं सन्निपेतुरभीतवत् पादाताश्च पदात्योघैस्ताडिताशक्तितोमरैः न्य
पतंत तदा भूमौ शतसोथसहस्रशः रथिनश्च तदा राजन् कर्णिनालीकसायकैः निहत्य समरे वीरः
सिंहनादान्विनेदिरे तस्मिंस्तथा वर्तमाने संग्रामे लोमहर्षणे भगदत्तो महेष्वासो भीमसेनमथा राम १८०
द्रवत् कुंजरेण प्रभिन्नेन सप्तधा द्रवता मदम् पर्वतेन यथा तोयं स्रवमानेन सर्वतः किरमाणस

हस्तेण सुप्रतीकशिरोगतः शरावरणस्थो भगवान्वारिधाराइवानघ सभीमेशरधाराभि
स्वादयामास पार्थिवः पर्वतं वारिधाराभिः प्रावृषीव वलाहकः भीमसेनस्तु संचक्रुः पादरक्षा
न्परं शतान् निजघान महेष्वासः सन्नद्धः शरवृष्टिभिः तान्दृष्ट्वा न्हतान्युधि भगदत्तः प्र
तापवान् नोदयामास नागेंद्रं भीमसेनरथंप्रति सनागप्रेषितःस्तेन वाणोज्योचोदितो यथा
अभ्यधावंत योगेन भीमसेनपुरोगमाः केकयाश्चाभिमन्युश्च द्रौपदेयाश्च सर्वशः दाशार्णाधि
पतिशूरःक्षत्रदेवश्च मारिष चेदिपश्चित्रकेतुश्च संक्रुद्धः सर्वएवते उत्तमास्त्राणि दिव्यानि दर्श
यंतो महावलाः तमेकं कुंजरंक्रुद्धं समंतात्पर्यवारयन् सविद्धो वहुभिर्वाणैर्व्यरोचत
महाद्विपःसंजातरुधिरोत्पीडो धातुचित्रइवाद्रिराट् दाशार्णाधिपतिश्चापि गजंभूमिधरोप
मं समास्थितोभिदुद्राव भगदत्तस्यवारणं तमापतंतं समरे गजं गजपतिस्तदा दधार सुप्रतीको
पि वेलेव मकरालयं धारितं प्रेक्ष्य नागेंद्रं दाशार्णस्य महात्मनः साधुसाध्विति सैन्यानि पां
डवेयन्यपूजयन् ततः प्राग्ज्योतिषः क्रुद्धस्तोमरान्वै चतुर्द्दश प्राहिणोत्तस्य नागस्य प्रमुखे
नृपसत्तमः तस्यवर्म मुखत्राणं शातकौंभपरिष्कृतं विदार्य प्राविशत् क्षिप्रं वल्मीकमिव
पन्नगाः सगाढविद्धो व्यथितो नागो भरतसत्तम इरावृत्तमदः क्षिप्रं सन्न्यवर्त्तत वेगिनः प्रदुद्रा

भीष्म० वज्रवेगेन प्रणादन्भैरवंस्वनं समर्द्दमानः सुतलं भं वाशुः वक्षाग्निवेजसः तस्मिन्पराजि
१४९ तेनागेपांडवानांमहारथाः सिंहनादंविनद्योच्चैर्युद्धायैवोपतस्थिरे ततोभीमंपुरस्कृत्यभग
दत्तमुपाद्रवन् किरंतोविविधान्बाणान्शस्त्राणिविविधानिच तेषामापततांराजन्
संक्रुद्धानममर्षणं श्रुत्वासन्निनदंघोरममर्षगतसाध्वस भगदत्तो महेष्वासः स्वंनागंप्र
त्यचोदयत् सनागप्रवरः संपतंगुष्ठांगुलिचोदितः तस्मिन्क्षणेसमभवत् संवर्त्तकइ
वानलः रथसंघानतथानागान्हयांश्चसहसादिभिः पदातांश्चसुसंक्रुद्धःशतशोथसह
स्रशः अमृग्नानसमरेराजन्संप्रधावंस्ततस्ततः तेनसंपीड्यमानेतुपांडूनांतद्बलं
महत् सन्कोच महाराजचर्म्मैवाग्नौसमर्पितं भग्नंतुतुमुलंदृष्ट्वाभगदत्तेनधीमता घटो
त्कचोमहाराजभगदत्तंउपाद्रवत् विकटःपुरुषोराजन्दीप्तास्योदीप्तलोचनः रूपंविभी
षणंकृत्वारोषेणप्रज्वलन्निव जग्राहविपुलंशूलंगिरीणामपिदारणं नागंजिघांसुः
सहसाचिक्षेपचमहाबलः सो उत्तमास्त्राणिदिव्याणिदर्शयन्तोमहाबलाः तमेकंकुंजरंक्रु राम
द्धःसमन्तात्पर्यवारयन् सविद्धोबहुभिर्बाणैर्व्यशोचतमहाद्विपः संजातरुधिरोत्पीडोधातु १४९
चित्रइवाद्रिराट् दशार्णाधिपतिश्चापिगजंभूमिधरोपमं समास्थितोभिदुद्राव भगदत्तस्यवा

रणे तमापतंतं संप्रेक्ष्य गजेंद्रं गजपतिः स्वयं दधार सुप्रतीकोपि वेलेव मकरालयं वारितं प्रेक्ष्य नागेंद्रं दशा
र्णस्य महात्मनः साधु साध्विति सैन्यानि पांडवस्य पूजयन् ततः प्राग्ज्योतिषः क्रुद्धस्तोमरांश्चैव चतुर्दश प्रा
हिणोत्तस्य नागस्य प्रमुखे नृपसत्तमः तस्य वर्म मुखत्राणं शातकौंभपरिष्कृतं विदार्य प्राविशत्क्षिप्रं वल्मी
कमिव पन्नगाः स गाढविद्धो व्यथितो नागो भरतसत्तम उपावृत्तमदः क्षिप्रं सन्न्यवर्त्तत वेगितः प्रदुद्राव च
वेगेन प्रनदन्भैरवस्वनं संमर्द्दमानः स्वबलं वायुर्वृक्षानिवौजसा तस्मिन्पराजिते नागे पांडवानां महारथाः
सिंहनादं विनद्योच्चैर्युद्धायैवोपतस्थिरे ततो भीमं पुरस्कृत्य भगदत्तमुपाद्रवन् किरंतो विविधान्बाणाञ्छ
स्त्राणि विविधानि च तेषामापततां राजन्संक्रुद्धानाममर्षिणां श्रुत्वा स निनदं घोरममर्षाद्गतसाध्व
सः भगदत्तो महेष्वासः सनागं समचोदयत् अंकुशांगुष्ठनुन्नः स गजप्रवरो युधि तस्मिन्क्षणे सम
नवत्संवर्त्तक इवानलः रथसंघांस्तथा नागान्हयांश्च सहसादिभिः पादातांश्च सुसंक्रुद्धः शतशोथ सहस्र
स्रशः प्रमन्दात्समरे राजन्संप्रधावंस्ततस्ततः तेन संलोड्यमानं तु पांडूनां तद्बलं महत् संचुकोच महा
राज चर्म्मेवाग्नौ समाहितं भग्नं च स्वबलं दृष्ट्वा भगदत्तेन धीमता घटोत्कचो महाराज भगदत्तमुपाद्र
वत् विकटः पुरुषो राजन्दीप्तास्यो दीप्तलोचनः रूपं विभीषणं कृत्वा क्रोधेन प्रज्वलन्निव जग्राह विपुलं

भीष्म॰

१४२

शूलं गिरीणामपि दारणं नागं जिघांसुः सहसा चिक्षेप च महाबलः सविस्फुलिंगं ज्वालाभिः समंतात्परिवा
रितः तमापतंतं सहसा दृष्ट्वा ज्वालासमाकुलं चिक्षेप रुचिरं तीक्ष्णं अर्धचंद्रं स पार्थिवः चिच्छेद स मह
च्छूलं तेन बाणेन वेगवान् निपपात द्विधा छिन्नं शूलं हेमपरिष्कृतं महाशनिर्यथा भ्रष्टा शक्रमुक्ता न
भोगता शूलं निपतितं दृष्ट्वा द्विधा कृतं तं च पार्थिव रुक्मदंडां महाशक्तिं जग्राहाग्निशिखोपमां चिक्षे
प तां राक्षसस्याथ तिष्ठ तिष्ठेति चाब्रवीत् तामापतंतीं संप्रेक्ष्य वियत्स्थामशनीमिव उत्पत्य राक्षसस्तू
र्णं जग्राह ननाद च बभंज तां त्वरितो जानुमारोप्य भारत तस्मिन्क्षणे समभवत्संवर्तक इवानलः र
थसंघांस्तथा नागान्हयांश्च सहसादिभिः पादातांश्च सुसंक्रुद्धाः शतशोथ सहस्रशः अमृष्यत्समरे रक्षन्सं
प्रधावंस्ततस्ततः तेन संलोड्यमानं तु कौरवाणां बलं महत् संचुकोच महाराज चर्मे माग्नो समाहिते
पश्यतः पार्थिवेंद्रस्य तदद्भुतमिवाभवत् तदवेक्ष्य कृतं कर्म राक्षसेन बलीयसा दिवि देवाः सगंधर्वा
मुनयश्चापि विस्मिताः पांडवाश्च महेष्वासा भीमसेनपुरोगमाः साधु साध्विति नादेन पृथिवीमन्वना
दयन् श्रुत्वा तं सुमहानादं प्रहृष्टानां महात्मनां नामृष्यत महेष्वासो भगदत्तः प्रतापवान् विसृज्य वि
मलांस्तीक्ष्णान्नाराचान्ज्वलनप्रभान् भीमसेनमेकेन विव्याध राक्षसं नवभिः शरैः अभिमन्युं त्रिभिश्चै
व केकयान्पंचभिस्तथा पूर्णायतविसृष्टेन स्वर्णपुंखेन पत्रिणा बिभेद दक्षिणं बाहुं क्षत्रदेवस्य चा

राम

२४२

हवे पपात सहसा तस्य सशरं धनुरुत्तमं द्रौपदेयास्तथा पंच पंचभिः समताडयत भीमसेनस्य चक्रो
ध्यान्निजघ्ना न तुरंगमान् ध्वजं केसरिणं वास्य चिच्छेद विशिखैस्त्रिभिः निर्बिभेद त्रिभिश्चान्यैः सारथिं त
स्य पत्रिभिः स गाढविद्धो व्यथितो रथोपस्थ उपाविशत् विशोको भरतश्रेष्ठ भगदत्तेन संयुगे ततो भीमो
महाराज विरथो रथिनां वरः गदां प्रगृह्य वेगेन प्रचस्कंद रथोत्तमात् तमुद्यतगदं दृष्ट्वा सशृंगमिव पर्वतं
तावकानां भयं घोरं समपद्यत भारत एतस्मिन्नेव काले तु पांडवः कृष्णसारथिः आजगाम महाराज
निघ्नंछत्रून्सहस्रशः यत्र तौ पुरुषव्याघ्रौ पितापुत्रौ परंतपौ प्राग्ज्योतिषेण संरब्धौ भीमसेनघटोत्कचौ
दृष्ट्वा तु पांडवो राजन्युध्यमानान्महारथान् त्वरितो भरतश्रेष्ठ तत्रायाद्विकिरन्छरान् ततो दुर्योधनो रा
जा त्वरमाणो महारथः सेनामचोदयत्क्षिप्रं रथनागाश्वसंकुलां ततः पतंती सहसा कौरवाणां महाच
मूः अभिदुद्राव वेगेन पांडवान्श्वेतवाहनः भगदत्तोपि समरे तेन नागेन भारत विमृद्य पांडववलं युधि
ष्ठिरमुपाद्रवत् तदासीत्तुमुलं युद्धं भगदत्तस्य मारिष पंचालैः सृंजयैश्चैव कैकयैश्चोद्यतायुधैः भीम
सेनोपि समरे तावुभौ केशवार्जुनौ अश्रावयद्यथावृत्तमिरावद्वधमुत्तमं भीष्मपर्वेराष्टमाहे
संजय उवाच पुत्रं तु निहतं श्रुत्वा इरावंतं धनंजयः दुःखेन महताविष्टो निःश्वसन्पन्नगो यथा अथा
ब्रवीत्स राजेंद्र वासुदेवमिदं वचः इदं नूनं महाप्राज्ञो विदुरो दृष्टवान्पुरा कुरूणां पांडवानां च क्षयं घोरं महा

मतिः ततस्तदारतबान्धवः तराष्टुं जनेश्वरं अवध्यावहवोवीराः संग्रामे मधुसूदन निहताः कौर
वैः संख्ये तथास्माभिश्चतेहताः अर्थहेतोर्नरश्रेष्ठक्रियते कर्मकुत्सितं धिगर्थान्यत्कृते ह्येवंक्रिय
तेज्ञातिसंक्षयः अधनस्यमृतंश्रेयो नतुज्ञातिवधाद्धनं किंनुप्राप्स्यामहेकृष्ण हत्वाज्ञातीन्समाग
तान् दुर्योधनापराधेन शकुनेः सौबलस्यच क्षत्रियानिधनंयान्ति कर्णदुर्मंत्रितेनच इदानींच
विजानामिसुकृतंमधुसूदन कृतंराज्ञा महावाहो याचतास्मसुयोधनं राज्यार्द्धंपंचवाग्रामान्ना
कार्षीत्सचदुर्मतिः दृष्ट्वाचक्षत्रियान्शूरान्शयानान्धरणीतले निंदामिभृशमात्मानंधिगस्तुक्षत्र
जीविकां अशक्तमिति मामेते ज्ञास्यंति क्षत्रियारणे युद्धंसमाभिरुचितंज्ञातिभिर्मधुसूदन संचो
दयहयान्क्षिप्रंधार्तराष्ट्रचमूंप्रति प्रतरिष्येमहापारंभुजाभ्यांसमरोदधिं नायंक्लीवयितुंका
ल्योविद्यतेमाधवकश्चित एवमुक्तस्तुपार्थेनकेशवः परवीरहा चोदयामासतानश्वान्पांडुरा
न्वातरंहसः अथशब्दोमहानासीत्तवसैन्यस्यभारत मारुतोद्धतवेगस्यसागरस्येवपर्वणि
अपरान्हेमहाराजसंग्रामःसमपद्यत पर्जन्यसमनिर्घोषोभीष्मस्यसहपांडवैः ततोराजंस्तवसु
ताभीमसेनमुपाद्रवन् परिवार्यरणेद्रोणंवसवोवासवंयथा ततःशांतनवोभीष्मःकृपश्चरथिनां
वरः भगदत्तःसुशर्माचभगदत्तमुपाद्रवन् हार्दिक्योवाल्हिकश्चैवसात्यकिंसमभिद्रुतौ अंब

प कुत्स्नन्नृपतिरभिमन्युमवारयत् पौरवास्त्वन्ये महाराजाशेषानेव महारथान् ततः प्रववृते यु
द्धं घोररूपं भयावहं भीमसेनस्तु संप्रेक्ष्य पुत्रांस्तव जनेश्वर प्रजज्वाल रणे क्रुद्धो हविषा हव्यवा
डिव पुत्रास्तु तव कौंतेयं छादयां चक्रिरे शरैः प्रावृषीव महाराज जलदः पर्वतं यथा संछाद्यमानो
बहुधा पुत्रैस्तव विशांपते सृक्किणी विलिहन् वीरः शार्दूल इव वेगवान् व्यूढोरस्कं ततो भीमः पात
यामास पार्थिव क्षुरप्रेण सुतीक्ष्णेन सोऽभवत् गतजीवितः अपरेण तु भल्लेन पीतेन निशितेन
च अपातयत् कुंडलिनं सिंहः क्षुद्रमृगं यथा ततः सुनिशितान् पीतान् समादत्त शिलीमुखान्
सम्पस्त्वरया युक्ताः पुत्रास्ते प्राप्य मारिष प्रेषिता भीमसेनेन शरस्ताहृदधन्विना अपातयंश्च
पुत्रांस्ते रथेभ्यः सुमहारथान् अनाधृष्टिं कुंडभेदं विराजं दीर्घलोचनं दीर्घबाहुं सुबाहुं चतथै
व कनकध्वजं प्रपतंतस्म ते वीरा विरेजुः भरतर्षभ वसंते पुष्पशबलाः चूताः प्रपतिता इव त
तः प्रदुद्रुवुः शेषाः पुत्रास्तव विशांपते ते कालमिव मन्यंतो भीमसेनं महाबलं द्रोणस्तु समरे
वीरं निर्दहंतं सुतांस्तव यथाद्रिं वारिधाराभिः समंताद्व्यकिरच्छरैः तत्राद्भुतमपश्याम कुंतीपु
त्रस्य पौरुषं द्रोणेन वार्यमाणोपि यज्जघान सुतांस्तव यथा हि गोवृषो वर्षं संधारयति खात्पतत् भीमस्त
था द्रोणमुक्तं शरवर्षमदीधरत् अद्भुतं च महाराज तं चक्रे वृकोदरः यज्जघान सुतांस्तव द्रोणं

१२

भीष्म॰ चैवन्वयोधयत पुत्रेषु तव वीरेषु चित्रसेनार्जुन पूर्वजः मगोष्विव महाराज चरन्व्याघ्रो महाबलः यथा
१४४ वा पशुमध्यस्थो द्रावयेत पशून्वृकः वृकोदरस्तु वस्तानस्तथाव्यद्रावयन्रणे गांगेयो भगदत्तश्च गौत
मश्च महारथाः पांडवं रभसं युद्धे वारयामासुरर्जुनं अस्त्रैरस्त्राणि संवार्य तेषां सोतिरथो रणे प्रवीरा
स्तव सैन्येषु प्रेषयामास मृत्यवे अभिमन्युश्च राजानमंबष्ठं लोकविश्रुतं विरथं रथिनां श्रेष्ठं कारयामास
सायकैः विरथो वध्यमानः स सौभद्रेण यशस्विना अवप्लुत्य रथात्तूर्णं सव्रीडो मनुजाधिपः असिं चिक्षे
प समरे सौभद्रस्य महात्मनः आरुरोह रथं चैव हार्दिक्यस्य महात्मनः आपतंतं च निस्त्रिंशं युद्धमार्गवि
शारदः लाघवाद्व्यंसयामास सौभद्रः परवीरहा निघ्नंतं वीक्ष्य निस्त्रिंशं सौभद्रेण रणे तथा साधु साध्वि
ति सैन्यानां प्रणादोभूद्विशांपते धृष्टद्युम्नमुखास्त्वन्ये तव सैन्यमयोधयन् तथैव तावकाः सर्वे पांडुसै
न्यमयोधयन् तत्राक्रंदो महानासीत्तव तेषां च भारत निघ्नतां भृशमन्योन्यं कुर्वतां कर्म दुष्करं अन्यो
न्यं हि रणे शूराः केशेष्वाक्षिप्य मारिष नखैर्दंतैररयुध्यंत मुष्टिभिर्जानुभिस्तथा बाहुभिश्च तलैश्चै
व निस्त्रिंशैः सुसंशितैः विवरं प्राप्य चान्योन्यमनयन्यमसादनं न्यहनच्च पिता पुत्रं पुत्रश्च पितरं र
णे व्याकुलीकृतसंकल्पा युयुधुः तत्र मानवाः रणे चारूणि चापानि हेमपृष्ठानि भारत हतानाम
पविद्धानि कलापाश्च महाधनाः जातरूपमयैः पुंखैः राजतैश्च चिताः शिताः शराः तैलधौताः व्यराजंत राम १४४

निर्मुक्तभुजगोपमाः हस्तिदंतान् तन्न खड्गान् जातरूपपरिष्कृतान् चर्माणि चापविद्धानि रु
क्मपृष्ठानि धन्विना सुवर्णविकृताः प्रासाः पट्टिसा हेमभूषिताः जातरूपमया शक्त्यश्च कनको
ज्वलाः स्वरूपसंपताश्च पतिता मुशलानि गुरूणि च परिघाः पट्टिशाश्चैव भिंदिपालाश्च मारिष पतिता
स्तोमराश्चापाश्चित्रा हेमपरिष्कृताः कुथाश्च बहुधाकाराः चामरव्यजनानि च नानाविधानि शस्त्रा
णि विसृज्य पतिता नराः जीवंत इव दृश्यंते गतसत्वा महारथाः गदाविमथितैर्गात्रैर्मुशलैर्भि
न्नमस्तकैः गजवाजिरथक्षुण्णा शेरते स्म नरः क्षितौ तथैवाश्वधनुर्नागानां शरीरैरावभौ संछन्ना
वसुधा राजन्पर्वतैरिव सर्वतः समरे पतितैश्चैव शक्त्यृष्टिशरतोमरैः निस्त्रिंशैः पट्टिशैः प्रासै
रयस्कुंतैः परश्वधैः परिघैर्भिंदिपालैश्च शतघ्नीभिस्तथैव च शरीरैः शस्त्रभिन्नैश्च समस्तीर्यंत मेदि
नी निःशब्दैः स्वल्पशब्दैश्च शोणितौघपरिप्लुतैः गतासुभिरमित्रघ्नैर्विबभौ संवृता सततत्रैः
सकेयूरैर्बाहुभिश्चंदनोक्षितैः हस्तिहस्तोपमैश्छिन्नैरूरुभिश्च तरस्विनम् बद्धचूडामणिध
रैः शिरोभिश्च सकुंडलैः पतितैर्वृषभाक्षाणां बभौ भारत मेदिनी कवचैः शोणितादिग्धैः विप्रकी
र्णैः कांचनैः रराज सुभृशं भूमिः शांतार्चिभिरिवानलैः विप्रविद्धैः कलापैश्च पूरितैश्च शरासनैः

श्रीम० विप्रकीर्णैः शरैश्चापि रुक्मपुंखैः समंततः रथैश्च बहुभिर्भग्नैः किंकिणीजालमालिभिः वा
जिभिश्च हतैः कीर्णैः स्रस्तजिह्वैः सशोणितैः अनुकर्षैः पताकाभिः रुमासंघावकैरपि प्रवीराणां
१४५ महाशंखैः विप्रकीर्णैः पांडुरैः स्रस्तहस्तैश्च मातंगैः शयानैर्विबभौ मही नानाविधैरलंकारैः
प्रमदेवाभ्यलंकृता दंतिभिश्चापरैस्तत्र सप्रासैर्गाढवेदनैः करेणुशब्दैर्विमुंचद्भिः शीकरं च मुहुर्मु
हुः विबभौ तद्रणस्थानं गम्यमानैरिवाचलैः नानारागैः कंबलैश्च परिस्तोमैश्च दंतिनां वैडू
र्यमणिदंडैश्च पतितैरंकुशैः शुभैः घंटाभिश्च नरेंद्राणां पतिताभिः समंततः उद्घट्टितविचित्राभिः कु
थाभी रांकवैस्तथा ग्रैवेयैश्चित्ररूपैश्च रुक्मकक्षाभिरेव च यंत्रैश्च बहुधा छिन्नैस्तोमरैश्च सकंपनैः र
थानां रेणुकपिलैर्मुष्टिच्छिन्नैरुत्तरच्छदैः सादिनां च भुजैश्छिन्नैः पातितैः सांगदैस्तथा प्रासैश्च विमलैस्ती
क्ष्णैर्विमलाभिस्तथर्ष्टिभिः उष्णीषैश्च तथा छिन्नैः प्रविद्धैश्च ततस्ततः विचित्रैरविचित्रैश्च जातरू
पपरिष्कृतैः अश्वविधैर्महाराज स्तरणैर्ज्वलकुंडलैः ग्रहनक्षत्रशबला द्यौरिवासीद्वसुंधरा एवमेते महासे
नेमर्दिते तत्र भारत परस्परं समासाद्य तव तेषां च संयुगे तेष्वश्रांतेषु भग्नेषु मर्दितेषु च भारत रात्रिः
समभवद्घोरा नाज्ञायत ततो रणं ततो वहारं सैन्यानां प्रचक्रुः कुरुपांडवाः घोरे निशामुखे रौद्रे वर्त्त राम १४५

मानेसुदासुरणे अवहारं ततः कृत्वा सहिताः कुरुपांडवाः न्यविशंत यथाकामं गत्वा स्वशिबिरे तदा इति श्रीभीष्मपर्वणि समाप्तमष्टमोह्नि युद्धं संजय उवाच ततो दुर्योधनो राजा शकुनिश्चापि सौबलः दुःशासनश्च पुत्रस्तव सूतपुत्रश्च दुर्जयः समागम्य महाराज मंत्रं चक्रुर्विचक्षितं कथं पांडुसुता युद्धे जेतव्याः सगणा इति ततो दुर्योधनो राजा सर्वांस्तानाह मंत्रिणः सूतपुत्रं समाभाष्य सौबलं च महाबलं द्रोणो भीष्मः कृपः शल्यः सोमदत्तिश्च संयुगे न पार्थानभिधावंति न जाने तच्च कारणं अवध्यमानास्ते चापि क्षपयंति बलं मम सोस्मि क्षीणबलः कर्ण क्षीणशस्त्रश्च संयुगे निकृतः पांडवैः शूरैरवध्यैर्दैवतैरपि सोहं संशयमापन्नः करिष्यामि कथं रणे ततोब्रवीन्महाराज सूतपुत्रो नराधिपं मा शुचो भरतश्रेष्ठ प्रकरिष्ये प्रियं तव भीष्मः शांतनवस्तूर्णमपयातु महारणात् निवृत्ते युधि गांगेये न्यस्तशस्त्रे च भारत अहं पार्थान्हनिष्यामि सहितान्सर्वसोमकैः पश्यतो युधि भीष्मस्य शपे सत्येन ते नृप पांडवेषु दयां राजन्सदा भीष्मः करोति वै अशक्तश्च रणे जेतुं भीष्म एतान्महारथान् अभिमानी रणे भीष्मो नित्यं चापि रणप्रियः कथं च पांडवान्युद्धे जेष्यते तात संगतान् स त्वं शीघ्रमितो गत्वा भीष्मस्य शिबिरं नृप अनुमान्य रणे भीष्मं शस्त्रं न्यासय भारत न्यस्तशस्त्रे ततो भीष्मे निहतान्पश्य पांडवान् मयैकेन रणे राजन्ससुहृद्गणबांधवान् एवमुक्तस्तु कर्णेन पुत्रो दुर्योधनस्तव अब्रवीद्भ्रातरं तत्र दुःशासनमिदं वचः अनुया

भीष्म० त्वं यथा सज्जं सर्वं भवति सर्वतः दुःशासन ततः क्षिप्रं सर्वमेवोपपादय एवमुक्त्वा ततो राजन् कर्णमाह जनेश्वरः अनुमान्य ततो भीष्ममितो हं द्विपदां वर आगमिष्ये ततः क्षिप्रं त्वत्सकाशमरिंदम ततस्त्वं पुरुषव्याघ्र प्रकरिष्यसि संयुगे निःपपात ततस्तूर्णं पुत्रस्तव विशांपते सहितो भ्रातृभिः सर्वैर्देवैरिव शतक्रतुः ततस्तं नरशार्दूलं शार्दूलसमविक्रमं आरोहयद्धयं तूर्णं भ्राता दुःशासनस्तदा अंगदी बद्धमुकुटो हस्ताभरणवान्नृपः धार्तराष्ट्रो महाबाहुर्विबभौ सम हेंद्रवत् भंडीपुष्पनिकाशेन तपनीयनिभेन च अनुलिप्तः परार्ध्येन चंदनेन सुगंधिना अरजोंबरसंवीतः सिंहखेलगतिर्नृप शुशुभे विमलार्चिष्मांछरदीव दिवाकरः तं प्रयांतं नरव्याघ्रं भीष्मस्य शिबिरं प्रति अनुजग्मुर्महेष्वासाः सर्वलोकस्य धन्विनः भ्रातरश्च महावीर्यास्त्रिदशा इव वासवं हयानन्ये समारुह्य गजानन्ये च भारत रथानन्ये नरश्रेष्ठाः परिवव्रुः समंततः आत्तशस्त्राश्च सुहृदो रक्षणार्थं महीपतेः प्रादुर्बभूवुः सहिताः शक्रस्येवामरा दिवि संपूज्यमानः कुरुभिः कौरवाणां महारथः प्रययौ सदनं राजन् गांगेयस्य महात्मनः अन्वीयमानः सहितैः सोदरैः सहितो नृपः दक्षिणं दक्षिणः काले संप्रगृह्य भुजं तदा हस्तिहस्तोपमं वीरः सर्वशत्रुनिबर्हणं प्रगृह्णंजलीन्नृणां शृण्वन्वाचः सर्वतो दिक्षु शुश्राव मकराः वाचो नानादेशनिवासिनां संस्तूयमानः सूतैश्च मागधैश्च महोजसा पूजयंश्चैव तान्सर्वान्सर्वलोकेश्वरेश्वरः प्रदीपैः कांचनैस्तत्र गंधतैलावसेचनैः परिवव्रुर्महात्मानं

१४६

भी०प० ३
राम
१४६

प्रज्वलद्भिस्समंततः सतैःपरिवृतो राजा प्रदीपैः कांचनैः शुभैः शुशुभे च समायुक्तो दीप्तैरिव महा
ग्रहैः कंचुकोष्णीषिणस्तत्र वेत्रझर्झरपाणयः प्रोत्सारयंतः शनकैस्तं जनं सर्वतो दिशं संप्राप्य तु
ततो राजा भीष्मस्य सदनं शुभं अवरुह्य हयाच्चापि भीष्मं प्राप्य जनेश्वरः अभिवाद्य ततो भीष्मं नि
षण्णः परमासने कांचने सर्वतोभद्रे स्पर्ध्यास्तरणसंवृते उवाच प्रांजलिर्भीष्मं बाष्पकंठोश्रुलो
चनः त्वां वयं समुपाश्रित्य संयुगे शत्रुसूदन उत्सहेम रणे जेतुं सेंद्रानपि सुरासुरान् किमु पांडुसुतान्
वीरान्ससुहृद्गणबांधवान् तस्माद्दर्हसि गांगेय कृपां कर्तुं मयि प्रभो जहि पांडुसुतान्वीरान्महेंद्र
इव दानवान् एवं मुक्तो महाबाहो निहनिष्यामि सोमकान् पांचालान्पांडवैः सार्द्धं करूषांश्चेति
भारत तद्वचः सत्यमेवास्तु जहि पार्थान्समागतान् सोमकांश्च महेष्वासान्सत्यवाग्भव भारत
दयया यदि वा राजन्द्वेष्यभावान्मयि प्रभो मंदभाग्यतया वापि समरक्षसि पांडवान् अनुजानीहि स
मरे कर्णमाहवशोभिनं सजेष्यति रणे पार्थान्ससुहृज्जनबांधवान् एतावदुक्त्वा नृपतिः पुत्रो दु
र्योधनस्तव नोवाच वचनं किंचिद्भीष्मं भीमपराक्रमं इति श्रीभीष्मपर्वणि [illegible] माहे संजय उवाच
वाक्शल्यैस्तव पुत्रेण सोतिविद्धः पितामहः दुःखेन महताविष्टो नोवाच प्रियमण्वपि स ध्या

भीष्म० त्वासु चिरं दुःखाद्धर्षसमन्वितः स्वसमानो यथा नागः प्रत्युक्तो वैशलाकया उक्त्वा चतुष्पी कोपात्रिर्द्दहन्नि
१४७ वभारत सदेवासुरगंधर्वैर्लोकं लोकविदांवरः अब्रवीत्तव पुत्रेन्तु सामर्षं वैमिदं वचः किन्तु दुर्योधनैवं
मां वाक्शरैर्नु पविध्यसि वर्तमानं यथाशक्तिं कुर्वाणं च तव प्रियं जुह्वानं समरे प्राणांस्त्वैव हितकां
क्षया यदनु पांडवः शूरः खांडवे ग्निमतर्पयत् पराजित्य रणे शक्रं पर्याप्तं तन्निदर्शनं द्रवमाणेषु
५५ शूरेषु सोदरैस्तथाभिभो सूतपुत्रे च राधेये पर्याप्तं तन्निदर्शनं यच्चनः सहितान् सर्वान् चित्ररथानगा
रेतथा एक एव समुद्घातः पर्याप्तं तन्निदर्शनं तथा द्रोणं महेष्वासं शारद्वतमथापि वा. गोग्रहेभि
तवान् पूर्वं पर्याप्तं तन्निदर्शनं विजित्य च यथा कालेयमभूरथमानित उत्तरायैव दत्तौ वस्त्रं पर्याप्तं
तन्निदर्शनं निवातकवचान् युद्धे वासवेनापि दुर्जयान् जितवान् समरे पार्थान् पर्याप्तं तन्निदर्श
ने कोऽहि शक्तो रणे जेतुं पांडवं रभसं रणे यस्य गोप्ता जगद्गोप्ता शंखचक्रगदाधरः वासुदेवोऽनंत
शक्तिः सृष्टिसंहारकारकः सर्वेश्वरो देवदेवः परमात्मा सनातनः उक्तोऽपि बहुशो राजन्नारदाद्यैर्म
हर्षिभिः त्वं तु मोहान्न जानीषे बाच्यावाच्यं सुयोधन मुमुर्षुर्हि नरः सर्वान् वृक्षान् पश्यति कांचनान् त
तथा त्वमपि गांधारे विपरीतानि पश्यसि स्वयं वैरं महत्कृत्वा पांडवैः सृंजयैः सह युध्यस्व तान राम
द्य रणे पश्यामः पुरुषं तव अहं तु सोमकान् सर्वान् सपंचालान् समागतान् निहनिष्ये नरव्याघ्र १४७

वर्जयित्वा शिखंडिनं तेबीहं निहतः संख्ये गमिष्ये यमसादनं तान्वा निहत्य संग्रामे प्रीतिं दास्यामि वै
तव पूर्वं हि स्त्री समुत्पन्ना शिखंडी राजवेश्मनि वरदानात्पुमाञ्जातः सैषा वै स्त्री शिखंडिनी नाम
हं न हनिष्यामि प्राणत्यागे हि भारत यासौ प्राङ्गि॰दिता धात्रा सैषा वै स्त्री शिषंडिनी सुखं स्वपिहि गांधारेश्वो
स्मि कर्त्ता महारणं यं जना कथयिष्यंति यावत्स्थास्यति मेदिनी एवमुक्तस्तव सुतो निर्जगाम नरे
श्वर अभिवाद्य गुरुं मूर्ध्ना प्रययौ स्वं निवेशनम् आगम्य च ततो राजा विसर्ज्य च महाजनम् प्रविवेश र
लेहं यस्तत्रं यं शत्रुक्षयंकरः प्रविष्टः स निशां तां च गमयत् स भारत प्रभातायां तु शर्वर्यां प्रातरुत्थाय वै नृप राज्ञः
समाज्ञापयत सेनां योजयतेति वै अद्य भीष्मो रणे क्रुद्धो निहनिष्यति सोमकान् दुर्योधनस्य तच्छ्रुत्वा रात्रौ वि
लपितं बहु मन्यमानः सतो राजन्प्रत्यादेशमिवात्मनः निर्वेदं परमं गत्वा विनिंद्य परवश्यताम् दीर्घं दध्यौ
शांतनवो योद्धुकामोऽर्जुनं रणे इंगितेन तु तज्ज्ञात्वा गांगेयस्य विचिंतितम् दुर्योधन महाराज दुःशासनमचो
दयत् दुःशासन तथा तूर्णं युक्ता भीष्मरक्षिणः द्वात्रिंशत्त्वमनीकानि सर्वाण्येवाभिचोदय इदं हि समनुप्रा
प्तं वर्षपूगाभिचिंतितम् पांडवानां ससैन्यानां वधो राज्यस्य चागमः तत्र कार्यं महन्मन्ये भीष्मस्यैवाभिरक्षण
म् स नो गुप्तः सुखाय स्याद्धन्यान्मासं युगे युगे अब्रवीच्च विशुद्धात्मा नाहं हन्यां शिखंडिनम् स्त्री पूर्वको ह्य
सौ जातस्तस्माद्वर्ज्यो रणे मया लोकस्तद्वेद यदहं पितुः प्रियचिकीर्षया राज्यं स्फीतं महाबाहो स्त्रियश्च त्यक्त

भीष्म. वान्नुराजैवसा हस्तिपं जातेनस्त्रीरूपेणकर्णचन हन्यांयुधिनरश्रेष्ठसततमेतद्ब्रवीमिते अयंस्त्रीपूर्वको

१४८ राजन्शिखंडीयदितेश्रुतं उद्योगेकथितंपूर्वंतथाजाताशिखंडिनी कन्याभूत्वापुमाजातः सचयोत्स्य

तिभारत तस्याहंप्रमुखेबाणान्नमुंचेयंकथंचन युद्धेतुक्षत्रियांस्तात पांडवानांजयैषिणः सर्वानन्यान्

निहनिष्यामिसंप्राप्तान्बाणगोचरान् एवंसभरतश्रेष्ठोगांगेयः प्राहशास्त्रवित् तत्रसर्वात्मनामन्ये

भीष्मस्यैवाभिपालनं अरक्ष्यमाणंहिवृकोहन्याद्सिंहंमहात्मनं मावृकेणैवशार्दूलंघातयेमशिखं

डिना मातुलःशकुनिःशल्यःकृपोद्रोणोविविंशतिः यत्तारक्षंतुगांगेयंतस्मिन्गुप्तेध्रुवोजयः

ततच्छ्रुत्वानुराजानोदुर्योधनवचस्तदा सर्वतोरथवंशेनगांगेयंपर्यवारयन् पुत्राश्चतवगांगे

यंपरिवार्यययुर्मुदा कंपयंतोभुवंद्यांचक्षोभयंतश्चपांडवान् ततोदुर्धनोराजापुनर्भ्रातरमब्रवी

त् सव्यंचक्रयदामत्युरुत्तमौजाश्चदक्षिणं गोप्तारावर्जुनस्यैतावर्जुनश्चशिखंडिनः संरक्ष्यमा

णः पार्थेनतथास्माभिर्विवर्जितः यथाभीष्मंननोहन्याद्दुःशासनतथाकुरु भ्रातुस्तद्वचनंश्रुत्वा

पुत्रोदुःशासनस्तव भीष्मंप्रमुखतःकृत्वाप्रययौसेनयासह भीष्मंतुरथवंशेनदृष्ट्वातमभिसंवृतं

अर्जुनोरथिनांश्रेष्ठोधृष्टद्युम्नमुवाचह शिखंडिनंनरव्याघ्रभीष्मस्यप्रमुखेनृप स्थापयस्वाद्यराजें राम

द्रतस्यगोप्ताहमप्युत संजयउवाच ततःशांतनवोभीष्मोनिर्ययौसेनयासह व्यूहंचाव्यूहतप १४८

पुसर्वतोभद्रमाहवे कृपश्चकृतवर्मा च शल्यश्चैव महारथाः शकुनिश्च सैंधवश्चैव कांभोजश्च सु
दक्षिणः भीष्मेण सहितास्सर्वे पुत्रैश्च तव भारत अग्रतः सर्वसैन्यानां व्यूहस्य प्रमुखे स्थितः द्रोणो भू
रिश्रवाः शल्यो भगदत्तश्च मारिष दक्षिणं पक्षमाश्रित्य स्थिता व्यूहस्य दंसितः अश्वत्थामा सोमदत्तश्चा
वंत्यौ च महारथौ महत्या सेनया युक्तौ वामं पार्श्वमपालयन् दुर्योधनो महाराज त्रिगर्तैः सर्वतो वृतः
व्यूहमध्ये स्थितो राजन् पांडवान्प्रति भारत अलंबुषो महाराजश्च तायुश्च महारथः पृष्ठतः सर्वसै
न्यानां स्थितो व्यूहस्य दंसितौ एवमेते तदा व्यूहं कृत्वा भारत तावकाः संनद्धाः समदृश्यंत प्रतपंत इवा
ग्नयः ततो युधिष्ठिरो राजा भीमसेनश्च पांडवः नकुलः सहदेवश्च माद्रीपुत्रावुभावपि अग्रतः स
र्वसैन्यानां स्थिता व्यूहस्य दंसितः धृष्टद्युम्नो विराटश्च सात्यकिश्च महारथः स्थिताः सैन्येन महता प
रानीकविनाशनः शिखंडी विजयश्चैव राक्षसश्च घटोत्कचः चेकितानो महाबाहुः कुंतिभोजश्च वीर्य
वान् स्थिता रणे महाराज महत्या सेनया वृताः अभिमन्युर्महेष्वासो द्रुपदश्च महारथः के
कया भ्रातरः पंच स्थिता युद्धाय दंसिताः एवं तेपि महाव्यूहं प्रतिव्यूह्य सुदुर्जयं पांडवाः समरे
शूराः स्थिता युद्धाय मारिष तावकास्तु रणे यत्ता महासेना नराधिप अभ्याययू रणे पार्थान्भी
ष्मं कृत्वाग्रतो नृप तथैव पांडवा राजन् भीमसेनपुरोगमाः भीष्मं युद्धपरिप्रेप्सुः संग्रामे विजगी

भीष्म घवः क्ष्वेडाः किलकिलाशब्दाः क्रकचा गोविषाणिकाः भेरीमृदंगपणवान्नादयंतश्च पुष्करान्
१४५ पांडवाः प्रत्यधावंत नानदंतो भैरवान्रवान् भेरीमृदंगशंखानां दुंदुभीनां च निःस्वनैः उत्कृष्ट
सिंहनादैश्च वल्गुतानैः पृथग्विधैः ततः शब्देन महता प्रचकंपे वसुंधरा पक्षिणश्च महाघोरं व्याह
रंतो विबभ्रमुः निःप्रभाश्चोदितो सूर्यो निःप्रभाः समपद्यत ववुश्च वातास्तुमुलाः शंसंतः सुम
हद्भयं घोराश्च घोरनिर्ह्रादाः शिवास्तत्र ववाशिरे वेदयंत्यो महाराज महद्वैशसमागतं दिशः प्रज्वलि
ता राजन् पांसुवर्षं पपात ह रुधिरेण समुन्मिश्रमस्थिवर्षं तथैव च रुदतां वाहनानां च नेत्रेभ्यः
प्रापतज्जलं सुस्रुवुश्च शकृन्मूत्रं प्रध्यायंतो विशांपते अंतर्हिता महानादाः श्रूयंते भरतर्षभ
राक्षसा पुरुषादानां नदतां भैरवान्रवान् संपतंतश्च दृश्यंते गोमायुबलवायसाः श्वानश्च वि
विधैर्नादैर्वाशंतस्तत्र मारिष ज्वलिताश्च महोल्का वै समाहत्य दिवाकरं निपेतुः सहसा भू
मौ वेदयंत्यो महद्भयं महत्यनीकानि महासमुच्छ्रये ततस्तयोः पांडवधार्तराष्ट्रयोः चकंपिरे
शंखमृदंगनिस्वनैः प्रकंपितानीव वनानि वायुना नरेंद्रनागाश्वसमाकुलानामभ्यायतीनामा
शिवे मुहूर्ते बभूव घोषस्तुमुलश्चमूनां वातोद्धुतानामिव सागराणां महाभारते भीष्मपर्वणि
संजय उवाच अभिमन्यू रथोदारः पतंगैस्तारगोत्तमैः अभिदुद्राव वेगेन दुर्योधनबलं महत् राम
विकिरन् शरवर्षाणि वारिधारा इवांबुदः न शेकुः समरे क्रुद्धं सौभद्रमरिमर्दनं शरैराधिरंगा १४६

इमानं सैन्यसागरमक्षयं निवारयितुमप्याजौ त्वदीयान्कुरुपांडवान् तेनमुक्ताः रणे राजन्धाराः श
त्रुनिवर्हणाः क्षत्रियानानयद्राजन्प्रेतराजनं यमदंडोपमान् घोरान्शरानाशीविषोपमान् सोभद्रः
समरेक्रुद्धः प्रेषयामासशायकान् रथिनांचरथान्स्थूलीहयपृष्ठश्च मादिनं गजारोहं चसगजांत्पातयामास फा
ल्गुनिः तस्यतत्कुर्वतः कर्म हृष्यमाणाः नृपाः खलु पूजयांचक्रिरे दक्षाः प्रशशंसश्च फाल्गुनिं
तान्यनीकानि सौभद्रो द्रावयन्नवहु व्यशोभत तूलराशिमिवोद्धूय मारुतः सर्वतोदिशं तेन वि
द्राव्यमानानि तवसैन्यानि मारिष त्रातारं नाध्यगच्छंत पंकेमग्ना इव द्विपाः विद्राव्य सर्वसैन्यानि फाल्गु
निः स नरोत्तमः अभिमन्युः स्थितो राजन् विधूमो ग्निरिवाज्वलन् नचैनं तावकाः सर्वे विषेहुः वारिघा
तनं प्रदीप्तं पावकं यद्वत्पतंगाः कालनोदिताः स हरन्सर्वशत्रुभ्यः पांडवानां महारथः अदृश्यत म
हेष्वासः सवज्र इव वासवः हेमपृष्ठं धनुश्चास्य ददृशे विचरन्दिशः तोयदेषु यथा राजन् भ्राजमा
ना शतह्रदाः शराश्च निशिताः पीताः निश्चरंति स्म संयुगे तथैव वरतस्तत्र स सोभद्रस्य महात्म
नः रथेनकौ वनं येन ददृशुर्नांतरं नृपाः मोहयित्वा कृपं द्रोणं द्रौणिं च सबृहद्बलं सैंधवं च
महेष्वासो व्यचरल्लघुसुष्ठु च मंडलीकृतमेवास्य धनुः पश्याम मारिष सूर्यमंडलसंकाशं तत
पतस्तव वाहिनीं तं दृष्ट्वा क्षत्रियाः शूराः प्रपन्नमरिंदमाः द्विफाल्गुनमिमं लोके कारिष्यंतस्य कर्मभिः ते
नार्दिता महाराज भारती नाम हाचमूः बभ्राम तत्र तत्रैव योषिन्मदवशादिव द्रावयित्वा च तत्सैन्यं कंपयित्वा

भीष्म० महारथान् वंदयामाससुहृदांमधुजित्येव वासवः तेनविद्राव्यमानेनतवसैन्यानिसंयुगे चक्रूराजन्स्वनघो
१५० रंपर्जन्यनिनदोपमं तच्छ्रुत्वानिनदंघोरंतस्यमारिष माहतोद्भूतवेगस्यसमुद्रस्येवपर्वणि दुर्योधनस्तदारा
जन्नार्ष्यश्रृंगिमभाषत एषकार्ष्णिर्मतावाहोद्वितीयइवफाल्गुनः चमूंद्रावयतेक्रोधात्सत्रोदेवचमूमि
व तस्यचान्यत्रपश्यामिसंयुगेभेषजंमहत् ऋतेत्वांराक्षसश्रेष्ठसर्वविद्यासुपारगं सगत्वात्वरितंवी
रजहिसौभद्रमाहवे वयंपार्थान्हनिष्यामोभीष्मद्रोणपुरःसराः सएवमुक्तोवलवान्राक्षसेंद्रःप्रतापवान्
प्रययौसमरेतूर्णंतवपुत्रस्यशासनात् नर्दमानोमहानादंप्रावृषीवबलाहकः तस्यशब्देनमहतापांडवानांव
लंमहत् प्राचलत्सर्वतोराजन्पूर्यमानइवाचलः वहवश्चजनाराजंस्तस्यनादेनभीषिताः प्रियान्प्राणान्परप
रित्यज्यनिपेतुर्धरणीतले कार्ष्णिश्चापिमुदायुक्तःप्रगृहीतशरासनः नृत्यन्निवरथोपस्थेतद्रक्षःप्रत्य
वारयत् ततःसराक्षसःक्रुद्धःसंप्राप्यैवार्जुनिंरणे नातिदूरेस्थितस्तस्यद्रावयामासवैचमूं सावध्यमाना
समरेपांडवानांमहाचमूः प्रत्युद्ययौरणेरक्षोदेवसेनायथावलिं विमर्दःसुमहानासीत्तस्यसैन्यस्यमा
रिष रक्षसाभीमरूपेणवध्यमानस्यसंयुगे ततःपारसहस्रैस्तांपांडवानांमहाचमूः प्रत्युद्ययौरणेर
क्षोदर्शयन्वैपराक्रमं सावध्यमानातुतथापांडवानामनीकिनी रक्षसाघोररूपेणप्रदुद्राव रणेभयात्
तांप्रमद्यततःसेनांपद्मिनींवारणोयथा ततोऽभिदुद्राव रणेद्रौपदेयान्कुमारकान् तेतुक्रुद्धामहेष्वासाः राम
१५०

द्रौपदेयाः प्रहारिणः राक्षसं दुद्रुवुः सर्वे ग्रहाः पंच यथा रविं वीर्यवद्भिस्ततस्तैस्तु पीडितो राक्षसो
त्तमः यथा क्षययुगे घोरे चंद्रः परिवृतो ग्रहैः प्रतिविंध्यस्ततो रक्षो विभेद निशितैः शरैः सर्वपारशवै
स्तूर्णमंकुशाग्रैर्महाबलः स तैर्भिन्नतनुत्राणः शुशुभे राक्षसेश्वरः मरीचिभिरिवार्कस्य संस्युतो जल
दो महान् विषक्तैः स शरैस्तापितपनीयपरिच्छदैः आर्श्यशृंगिर्बभौ राजन् दीप्तशृंग इवाचलः त
तस्ते भ्रातरः पंच राक्षसेंद्रं महाहवे विव्यधुर्निशितैर्बाणैस्तपनीयविभूषितैः स निर्भिन्नः शरैर्घो
रैर्भुजगैः कोपितैरिव अलंबुषोऽभवद्राजन् नागेंद्र इव चुक्रुधे सोऽतिविद्धो महाराज मुहूर्तमथ मारिष
प्रविवेश तमो दीर्घं पीडितस्तैर्महारथैः प्रतिलभ्य ततः संज्ञां क्रोधात्स द्विगुणीकृतः चिच्छेद सायकां
स्तेषां धनूंषि च महारथः एकैकं च त्रिभिर्बाणैः राजघान स्मयन्निव अलंबुषो रथोपस्थे नृत्यन्नि
व महारथः त्वरमाणः सुसंक्रुद्धो हस्तांस्तेषां महात्मनो जघान राक्षसः क्रूरः सारथीश्च महाबलः वि
भेद च सुसंहृष्टः पुनश्चैनान् सुसंशितैः शरैर्बहुविधाकारैः शतशोऽथ सहस्रशः विरथांश्च महेष्वा
सान् कृतवांस्तत्र राक्षसः अभिदुद्राव वेगेन हंतुकामो निशाचरः तानर्दितान् रणे तेन राक्षसेन दु
रात्मना दृष्ट्वार्जुनिस्ततः संख्ये राक्षसं समुपाद्रवत् तयोः समभवद्युद्धं वृत्रवासवयोरिव ददृशुस्ता

वकाः सर्वे पांडवाश्च महारथाः तौ समेतौ महायुद्धे क्रोधाद्दीप्तौ परस्परं महाबलौ महाराज क्रोधसंरक्तलोचनौ
परस्परमवेक्षेतां कालानलसमौ युधि तयोः समागमो घोरो बभूव कटुकोदयः यथा देवासुरे युद्धे शक्रशं
वरयोरिव इति श्रीमहाभारते भीष्मपर्वणि नवमे युद्धदिवसे धृतराष्ट्र उवाच आर्जुनिं समरे शूरं विनि
घ्नंतं महारथं अलंबुषः कथं युद्धे प्रत्ययुध्यत भारत आर्ष्यशृंगिः कथं चापि सौभद्रः परवीरहा तन्ममा
चक्ष्व तत्त्वेन यथावृत्तं स्म संयुगे धनंजयश्च किं चक्रे मम सैन्येषु संजय भीमो वापि बलिनां श्रेष्ठो राक्षसो वा
घटोत्कचः नकुलः सहदेवो वा सात्यकिश्च महारथः एतदाचक्ष्व मे सर्वं कुशलो ह्यसि संजय संजय उ॰
हंत तेहं प्रवक्ष्यामि संग्रामं लोमहर्षणं यथाभूद्राक्षसेंद्रस्य सौभद्रस्य च मारिष अर्जुनश्च यथा संख्ये भी
मसेनश्च पांडवः नकुलः सहदेवश्च रणे चक्रुः पराक्रमं तथैव तावकाः सर्वे भीष्मद्रोणपुरोगमाः अद्भु
तानि विचित्राणि चक्रुः कर्माण्यभीतवत् अलंबुषस्तु समरे त्वभिमन्युं महारथं विनद्य सुमहानादं
तर्जयित्वा मुहुर्मुहुः अभिदुद्राव वेगेन तिष्ठ तिष्ठेति चाब्रवीत् सौभद्रोपि रणे राजन् सिंहवद्विनदन्
मुहुः आर्ष्यशृंगं महेष्वासं पितुरत्यंतवैरिणं ततः समेयतुः संख्ये त्वरितौ नरराक्षसौ रथाभ्यां रथिनौ
श्रेष्ठौ यथा वै वृत्रवासवौ मायावी राक्षसश्रेष्ठो दिव्यास्त्रज्ञश्च फाल्गुनिः ततः कार्ष्णिर्महाराज निशितैः
शायकैस्त्रिभिः आर्ष्यशृंगं रणे विध्वा पुनर्विव्याध सप्तभिः अलंबुषोपि संक्रुद्धः कार्ष्णिं नवभिराशुगैः
हृदि विव्याध वेगेन तोत्रैरिव महाद्विपं ततः शरसहस्रेण क्षिप्रकारी निशाचरः अर्जुनस्य सुतं संख्ये

पीडयामास भारत अभिमन्युस्ततः क्रुद्धो नवतिं नतपर्वणां चिक्षेप निशितान्बाणान्राक्षसस्य महो
रसि ते तस्य विविशुस्तूर्णं कायं निर्भिद्य मर्मणि स तैर्विभिन्नसर्वांगः शुशुभे राक्षसोत्तमः पुष्पितैः किंशु
कैः राजन्संस्तीर्य इव पर्वतः स धारयन्शरान्हेमपुंखानपि महाबलः विबभौ राक्षसश्रेष्ठः सज्वाल इव प
र्वतः ततः क्रुद्धो महाराज ह्यार्ष्यशृंगिमहाबलः महेंद्रप्रतिमं कार्ष्णिं छादयामास पत्रिभिः तेन ते विशिखा
मुक्ता यमदंडोपमाः शिताः अभिमन्युं विनिर्भिद्य प्राविशद्धरणीतलं तथैवार्जुनिनिर्मुक्ताः शराः कांच
नभूषणाः अलंबुषं विनिर्भिद्य प्राविशद्धरणीतलं सौभद्रस्तु रणे रक्षः शरैः सन्नतपर्वभिः चक्रे विमु
खमासाद्य मयं शक्र इवाहवे विमुखश्च ततो रक्षो वध्यमानं रणेरिणा प्रादुश्चक्रे रणे मायां तामसीं प
रतापनः ततस्ते तामसाः सर्वे हता ह्यासन्महीतले नाभिमन्युमपश्यंत नैव स्वान्न परान्रणे अभि
मन्युश्च तान्दृष्ट्वा घोररूपं महातमः प्रादुश्चक्रे स्त्रमत्युग्रं भास्करं कुरुनंदनः ततः प्रकाशमभवज्जग
त्सर्वं महीपते तां चापि जघ्निवान्मायां राक्षसस्य दुरात्मनः संक्रुद्धश्च महावीर्यो नक्षमेंद्रो नरोत्तमं छा
दयामास समरे शरैः सन्नतपर्वभिः बह्वीस्तथान्या मायाश्च प्रयुक्तास्तेन राक्षसा सर्वास्त्रविदमेयात्मा
वारयामास फाल्गुनिः हतमायस्ततो रक्षो वध्यमानं च सायकैः रथं तत्रैव संत्यज्य प्राद्रवन्महतो भया
त् तस्मिन्विनिर्जिते तूर्णं तावकं संममर्द ह मदांधो वन्यनागेंद्रः सपद्मां पद्मिनीमिव ततः शांतनवो
भीष्मः सैन्यं दृष्ट्वाभिविद्रुतं महता रथवंशेन सौभद्रं पर्यवारयन् कोष्ठकीकृत्य तं वीरं धार्त्तराष्ट्रा महा

भीष्म॰ रथाः एवंसुवहवोऽयुद्धेततस्तुःसायकैर्दृढं सनेपांरथिनांश्रेष्टःपितुस्तुल्यपराक्रमः सदृशोवासुदेव
स्यविक्रमेणवलेनच उभयोःसदृशंकर्मसपितुर्मातुलस्यच रणेवहुविधंचक्रेसर्वशस्त्रभृतांवरः ततो
१५२ धनंजयोराजन्विनिघ्नंस्तववैसैनकान् श्वाससादरणेभीष्मंस्वभानुरिवभास्करं ततस्तुरथनोघाःपुत्रा गा३
स्तवविशांपते परिवव्रुःरणेभीष्मंजुगुपुश्चसमंततः तथैवपांडवाःराजन्परिवार्यधनंजयं रणायम
हतेयुक्ताःदंसिताभरतर्षभ शारद्वतस्ततोराजन्भीष्मस्यप्रमुखेस्थितं अर्जुनंपंचविंशत्यासायकानां
समाच्छिनोत् प्रत्युद्गम्याथविव्याधसात्यकिंस्तुपितैःशरैः हृदिविव्याधसंक्रुद्धःकंकपत्रपरिच्छदैः शैनेये
योपिततःक्रुद्धोभृशंविद्धोमहारथः गौतमार्त्तिकरंघोरंसमादधत्शिलीमुखं तमापतंतंवेगेनशाका
पानिसमुद्युतिं द्विधाचिछेदसंक्रुद्धोद्रोणिःपरमकोपनः समुत्सृज्याथशैनेयोगौतमंरथिनांवरं अभ्य
द्रवद्रणेद्रौणिंराहुःखेशशिनंयथा तस्यद्रोणसुतश्चापंद्विधाचिछेदभारत अथैनंछिन्नधन्वानंताड
यामाससायकैः सोन्यत्कार्मुकमादायशत्रुघ्नंभारसाधनं द्रौणिंषष्ठ्यामहाराजवाहोरुरसिचार्दयत्
सविद्धोव्यथितश्चैवमुहूर्त्तंकश्मलायुतः निषसादरथोपस्थेध्वजयष्टिमुपाश्रितः प्रतिलभ्यततः
संज्ञांद्रोणपुत्रःप्रतापवान् वार्ष्णेयःसमरेक्रुद्धोनाराचेनसमर्द्दयत् शैनेयंतुसनिर्भिद्यप्राविशद्ध
रणींतल्लं वसंतकालेवलवान्विलंसर्पशिशुर्यथा ततोपरेणभल्लेनसायकस्यध्वजोत्तमं चिछेदस राम
मरेद्रौणिःसिंहनादंननादच पुनश्चैनंशरैर्घोरैश्छादयामासभारत निदाघांतेमहाराजयथामेघो १५२

दिवाकरं सात्यकिश्च महाराज शरजालं निहत्य ततः द्रोणिमभ्यपतच्छूरः शरजालैरनेकशः ताप
यामास च द्रौणिं सैनेयः परवीरहा विमुक्तो मेघजालेन यथा च तपनस्तथा शराणां च सहस्रेण पु
नरेणं समुपस्थितः सात्यकिश्छादयामास ननाद च महाबलः दृष्ट्वा पुत्रं तथा यस्तं राहुणेव निशा
करं अभिद्रवंतं सैनेयं भारद्वाजः प्रतापवान् विव्याधतं पृषत्केन सुतीक्ष्णेन महामृधे सपरि
प्सुं सुतं राजन् वार्ष्णेयेनाभिताडितं सात्यकिस्तु रणे हित्वा गुरुपुत्रं महारथं द्रोणं विव्याध विं
शत्या सर्वपारसवैः शरैः तदंतरममेयात्मा कौंतेयः श्वेतवाहनः अभ्यद्रवद्रणे क्रुद्धो द्रोणं प्रति जि ५
महारथः ततो द्रोणश्च पार्थश्च समेयातां महामृधे यथा बुधश्च शुक्रश्च महाराज नभस्तले
इति श्री महाभारते भीष्मपर्वणि नवमे धृतराष्ट्र उवाच कथं द्रोणो महेष्वासः पांडवश्च महारथः
समीयतू रणे वीरौ तन्ममाचक्ष्व संजय प्रियो हि पांडवो नित्यं भारद्वाजस्य धीमतः आचार्यश्च रणे
नित्यं प्रियः पार्थस्य संजय तावुभौ रथिनौ संख्ये दृप्तौ सिंहाविवोत्कटौ कथं समीयतुर्युद्धे भार
द्वाज धनंजयौ संजय उवाच न द्रोणः समरे पार्थं जानीते प्रियमात्मनः क्षत्रधर्मं पुरस्कृत्य
पार्थो वा गुरुमाहवे न क्षत्रिया रणे राजन् वर्जयंति परस्परं निर्मर्यादा हि युध्यंते पितृभिर्भ्रातृभिः
सह रणे भारत पार्थेन द्रोणो विद्धः त्रिभिः शरैः नाचिंतयत तान्बाणान् पार्थचापच्युतान्युधि
शरवृष्ट्या पुनः पार्थश्छादयामास तं रणे सप्रजज्वाल रोषेण गहनेग्निरिवोच्छ्रितः ततोर्जुनं रणे

भीष्म॰
१५२

द्रोणः शरैः सन्नतपर्वभिः वारयामास राजेंद्र मर्चितादिव फाल्गुनं ततो दुर्योधनो राजा सुशर्माणमचोदय
त द्रोणस्य समरे राजन् पार्ष्णिग्रहणकारणात् त्रिगर्त्तराजो वकुद्धो भृशमादाय कार्मुकं छादयामास स
मरे पार्थं बाणै रयोमुखैः ताभ्यां मुक्ता शरा राजन्नंतरिक्षे दिनेदिने हंसा इव महाराज शरत्काले नभस्त
ले ते शराः प्राप्य कौंतेयं समस्ता वि विशुः प्रभो फलाशनं तथा स्वादु यथा वृक्षं विहंगमाः अर्जुनस्तु
रणे राजन् विनिघ्नन् रथिनां वरः त्रिगर्त्तराजं समरे सपुत्रं विव्यधे शरैः ते वध्यमानाः पार्थेन कालेने
व युगक्षये पार्थमेवाभ्यवर्त्तंत मरणे कृतनिश्चयाः मुमुचुः शरवृष्टिं च पांडवस्य रथं प्रति शरवृष्टिं त
तस्तां तु शरवर्षेण पांडवः प्रतिजग्राह राजेंद्र तोयवृष्टिमिवाचलः तत्राद्भुतमपश्याम बीभत्सोर्हस्तला
घवं विमुक्तां बहुभिर्वीरैः शस्त्रवृष्टिं दुरासदां यदेको वारयामास मारुतोभ्रगणानिव कर्मणा तेन पा
र्थस्य तुतुषुर्देवदानवाः अथ क्रुद्धो रणे पार्थस्त्रिगर्त्तान्प्रति भारत मुमोचास्त्रं महाराज वायव्यं पृतनामु
खे प्रादुरासीत्ततो वायुः क्षोभयानो नभस्तलं पातयन्वै तरुगणान् विनिघ्नंश्चैव सैन्यकान् ततो
द्रोणोभिवीक्ष्यैव वायव्यास्त्रं सुदारुणं शैलमन्यं महाराज घोरमस्त्रं मुमोच ह द्रोणेन युधि निर्मुक्ते
तस्मिन्नस्त्रे महामृधे प्रशशाम ततो वायुः प्रसन्नाश्च दिशोभवन् ततः पांडुसुतो वीरस्त्रिगर्तस्य
रथव्रजान् निरुत्साहान् रणे चक्रे विमुखान्विपराक्रमान् ततो दुर्योधनो राजा कृपश्च रथिनां वरः
अश्वत्थामा ततः शल्यः कांबोजश्च सुदक्षिणः विंदानुविंदावावंत्यौ बाह्लीकः सह बाह्लिकैः महता रथ

जलदानिव

राम
१५२

वंशेनपार्थस्यापारयद्दिशः तथैवभगदत्तश्च कृतायुश्च महाबलः गजानीकेनभीमस्य तावावारयतांदिशः
भूरिश्रवाःशलश्चैव सौबलश्च विशांपते शरौघैर्विमलैस्तूर्णं माद्रीपुत्रमवारयत् भीष्मस्तु सहितःसर्वैर्धार्त्त
राष्ट्रैःससैन्यकैः युधिष्ठिरंसमासाद्य सर्वतःपर्यवारयत् आपतंतंगजानीकं दृष्ट्वापार्थोवृकोदरः लेलि
हन्सृक्किणीवीरोमृगराडिवकानने ततस्तुबलिनांश्रेष्ठो गदामादायसंयुगे अवप्लुत्यरथात्तूर्णंतवसैन्य
मभावत तमुद्वीक्ष्यगदांहस्तं ततस्ते गजसादिनः परिवव्रुःरणेयत्ताः भीमसेनंसमंततः गजमध्यमनु
प्राप्तं पांडवःसव्यराजत मेघजालस्यमहतो यथामध्यगतोरविः व्यधमत्सगजानीकं गदयापांडवर्षभः
महाभ्रजालमतुलं मातरिश्वेवसंततं तेवध्यमानाःसमरे भीमसेनेनदंतिनः आर्तनादंरणेचक्रुर्गर्जंतोजल
दाइव बहुधादंतिनश्चैव विव्यधुस्तत्रदंतिभिः फुल्लाशोकनिभःपार्थः शुशुभेरणमूर्द्धनि विषाणेदंतिनांगृ
ह्यनिर्विषाणमथाकरोत् विषाणेनचतेनैव कुंभेभ्यो हस्तिदंतिपान् पातयामाससमरे दंडहस्तइवांतकः
शोणिताक्तांगदांबिभ्रत् मेदोमज्जाकृतच्छविः कृतांगदःशोणिताक्तो रुद्रवत्प्रत्यदृश्यत एवंतेवध्यमाना
श्च हतशेषामहागजाः प्राद्रवंतदिशोराजन् प्रमर्दंतःस्वकंबलं द्रवद्भिस्तैर्महानागैः समंताद्भरतर्षभ
दुर्योधनबलंसर्वंपुनरासीत्पराङ्मुखं महाभारतेभीष्मपर्वणिनवमे संजयउवाच मध्याह्नेतुमहाराज
संग्रामःसमपद्यत लोकक्षयकरोरौद्रो भीष्मस्यसहसोमकैः गांगेयोरथिनांश्रेष्ठो पांडवानामनीकिनीं व्य
धमंतिशितैर्बाणैः शतशोथसहस्रशः सममर्दयतत्सैन्यं पितादेवव्रतस्तव धान्यानांभुवितूलानां प्रकरंगो

भीष्म॰ १५८

गणाइव धृष्टद्युम्नः शिखंडी च विराटो द्रुपदस्तथा भीष्ममासाद्य समरे शरैर्जघ्नुर्महारथं धृष्टद्युम्नं ततो
विध्वा विराटं च त्रिभिः शरैः द्रुपदस्य च नाराचं प्रेषयामास भारत तेन विद्धा महेष्वासाः भीष्मेणामित्रक
र्षिणा चुक्रुधुः समरे राजन्पादस्पृष्टा इवोरगाः शिखंडी तं स विव्याध भारतानां पितामहं स्त्रीत्वं मनसा
ध्यात्वा नास्मै प्राहरत्पुनः धृष्टद्युम्नस्तु समरे क्रोधादग्निरिव ज्वलन् पितामहं त्रिभिर्बाणैर्बाह्वोरुरसि
चार्पयत् द्रुपदः पंचविंशत्या विराटो दशभिः शरैः शिखंडी चापि विंशत्या भीष्मं विव्याध सायकैः सो
ऽतिविद्धो महेष्वासो भीष्मः संख्ये महात्मभिः वसंते पुष्पसबलो वृक्षो ह्यशोक इवाबभौ तान्प्रत्यविध्यद्गांगेयः
त्रिभिस्त्रिभिरजिह्मगैः द्रुपदस्य च भल्लेन धनुश्चिच्छेद मारिष सोऽन्यत्कार्मुकमादाय भीष्मं विव्याध पंच
भिः सारथिं च त्रिभिर्बाणैः सुप्रितैः रणमूर्द्धनि ततो भीष्मं महाराज द्रौपद्याः पंच चात्मजाः कैकेया भ्रातरः
पंच सात्यकिश्चैव सात्वतः अभ्यद्रवंत गांगेयं युधिष्ठिरहिते प्सया निविष्यन्तु पांचाल्यो धृष्टद्युम्नमु
खागताः तथैव तावकाः सर्वे भीष्मरक्षार्थमुद्यताः प्रत्युद्ययूरणे सैन्यं सहसैन्यान्नराधिप तत्रासीत्तुमलं
युद्धं तव तेषां च संकुलं नराश्वरथनागानां यमराष्ट्रविवर्द्धनं रथी नरथीं समासाद्य सादिनश्चैव सादिनं
तथैवेतरान्समासाद्य नरनागाश्वसादिनः अनयत्परलोकाय पशस्त्रैः सन्नतपर्वभिः अस्त्रैश्च विविधैर्घोरैः
स्तत्र तत्र विशांपते रथाश्च रथिभिर्हीनाः हताः सारथयस्तथा विप्रद्रुतांश्च समरे दिशो जग्मुः समंततः
मर्दमानान्नरान्राजन्हयांश्च बहवो रणे वातायमाना दृश्यंते गंधर्वनगरोपमाः रथिनश्च रथैर्हीनाः सं

रक्ष्मारोक द

राम १५८

२१

दिनास्तेजसायुताः कुंडली हमी विग्रणः सर्वे निःकांगद भूषिताः देवपुत्रसमा हपे सौर्ये शाक्रसमायुधि अ
ध्या वैश्रवणे चापि न्यायेन च बृहस्पतिः सर्वतो हीश्वराः शूरा स्तत्र तत्र विशांपते विप्रद्रुताश्च दृश्यंते प्राकृताइ
व मानवाः दंतिनश्च नरश्रेष्ट विहीनाधनसादिभिः मर्दंतः स्वान्यनीकानि संपेतुः सर्वशब्दगाः वर्मभिः
श्चामरैश्छत्रैः पताकाभिश्च मारिष कक्षाभिरयतो नैश्च घंटाभिस्तोमरैस्तथा विशीर्णैर्विप्रधावंतो प्रदृश्यं
ते दिशो दश नागमेघप्रतीकाशैर्जलदोपमनिःस्वनैः तथैव दंतिभिर्हीनां गजारोहान्विशांपते प्र
धावतोन्यपश्याम तव तेषां च संकुले नानादेशसमुत्थांश्च तुरगान्हेमभूषितान् वातायमानांस्त्वद्राज
न् शतशोथ सहस्रशः अश्वारोहान्हतैरश्वैर्गृहीतासीन्समंततः द्रवमानानपश्याम द्राव्यमाना
श्च संयुगे गजो गजं समासाद्य द्रवमाणं महारणे ददौपिष्टं नरसा पदातिं तज्व जिनस्तथा तथैव च रथा
न्राजन्संममर्द्द रणे गजः रथाश्चैव समासाद्य पदातीन्वाजिनस्तथा रथाश्चैव समासाद्य पदाति तुर
गांस्तथा व्यमृद्नन्समरे राजन्तुरगाश्च रथान्रणे एवं ते बहुधा राजन्प्रामर्द्दंत परस्परं तास्मिन्रौद्रे
महायुद्धे वर्त्तमाने महाभये प्रावर्त्तत नदी घोरा शोणितांतन तरंगिनी अस्थिसंचयसंघाता केशशैव
लसाद्वला रथह्रदा शनावर्त्ता हयमाना दुरासदा शीर्षोपलसमाकीर्णा हस्तिग्राहसमाकुला कवचो
ष्णीषफेनाढ्या धनुर्मीना सिकच्छपाः पताकाधजवृक्षाढ्या मर्त्यकूलापहारिणी क्रव्यादसंहसंकीर्णा
यमराष्ट्रविवर्द्धिनी तां नदीं क्षत्रियाः शूराः हयनागरथप्लुतैः प्रतेनुर्वहवो राजन्भयं त्यक्त्वा महाहवे

भीष्म १५५ अप्राप्तो वाहरणे भीतून कश्मलेनाभिसंहृतान् यथा वैतरणीं प्रेतान्प्रेतराजपुरं प्रति प्राक्रोशन्क्षत्रियास्तत्र दृष्ट्वा
तद्वैशसं महत् दुर्योधनाभिप्रायेन क्षयं गच्छंति क्षत्रियाः गुणवत्सु कथं द्वेष्यं धृतराष्ट्रो जनेश्वरः कृतवान्
पांडुपुत्रेषु पापात्मा लोभमोहितः एवं बहुविधा वाचः श्रूयंते स्मात्र भारत पांडवास्तत्र संयुक्ताः श्रुत्वाणं तेषु
दारुणाः तान्निशाम्य तदा वाचः सर्वयोधैरुदाहृताः आगस्कृत्सर्वलोकस्य पुत्रो दुर्योधनस्तव भीष्मं द्रोणं
कृपश्चैव शाल्यं चैव वाथ भारत युद्ध्यध्वमनहंकाराः किंचिरं कुरुथेति द्द ततः प्रववृते युद्धं कुरूणां पां
डवैः सह अक्षद्यूतकृतं राजन्सुघोरं वैशसं तदा यत्पुरा नाभिगृह्णीषे वर्ज्यमानो महात्मभिः वैचित्र
वीर्य तस्येदं फलं पश्य यथाविधि नहि पांडुसुता राजन्ससैन्याः सपदानुगाः रक्षंति समरे प्राणान्कौ
रवाणां विशांपते एतस्मात्कारणाद्घोरो वर्त्तते स्वजनक्षयः देवाद्वा पुरुषव्याघ्र सुशर्माणं मया नृपान्
महाभारते भीष्मपर्वणि नवमदिने संजय उवाच अर्जुनस्तु नरव्याघ्रः सुशर्मप्रमुखान्नृपान् अन
यत्प्रेतराजस्य भवनं शायकैः शितैः सुशर्मापि ततो बाणैः पार्थं विव्याध वै रुषा वासुदेवं च सप्तत्या पा
र्थं नवभिः शरैः तं निवार्य शरौघेन शक्रतुल्यो महारथः सुशर्मणो रणे योधान् प्राहिणोद्यमसाद
नं ते वध्यमानाः पार्थेन काले नेव युगक्षये प्राद्रवंत रणाद्राजन्भये जाते महारथाः उत्सृज्य तुरगान्
के चित् रथान्के चिच्च मारिष गजानन्ये समुत्सृज्य प्राद्रवंत दिशो दश अपरे तु तदादाय गजवाजिर राम
थान्रणे त्वरया परया युक्ताः प्राद्रवंत विशांपते पदातास्त्वापि शस्त्राणि समुत्सृज्य महारणे निरपेक्षा १५५

भ्यधावंततेनतेनस्मभारत वार्यमानाबहुशस्त्रैर्गर्त्तैर्नसुशर्मणा तथान्यैःपार्थिवश्रेष्ठैर्नव्यतिष्ठतिसंयुगे
तद्बलंप्रद्रुतंदृष्ट्वापुत्रोदुर्योधनस्तव पुरस्कृत्यरणेभीष्मंसर्वसैन्यपुरस्कृतं सर्वोद्योगेनमहताधनंजयमु
पाद्रवत् त्रिगर्त्ताधिपतेरर्थेजीवितस्यविशांपते सएकःसमरेतस्मैकिरन्बहुविधान्शरान् भ्रातृभिःस
हितःसर्वैःशोभाविप्रद्रुसाभराः तथैवपांडवाराजन्सर्वोद्योगेनदंशिताः प्रययुःपांडवार्थाययत्रभीष्मोव्य
वस्थितः जानन्तपिरणेसौर्यंघोरंगांडीवधन्विनः हाहाकारोमहानासीत्तोभीष्मोजग्मुःसमंततः ततस्ता
लध्वजंसर्वंपांडवानामनीकिनी छादयामाससमरेशरैःसन्नतपर्वभिः एकीभूतास्ततःसर्वेकुरवःपांडवैः
सह अयुध्यंतमहाराजमध्यंप्राप्तेदिवाकरे सात्यकिःकृतवर्माणंविद्धापंचभिराशुगैः अतिष्ठदाहवेश्च
रान्किरन्बाणैःसहस्रशः तथैवद्रुपदोराजन्द्रोणंविद्धाशितैःशरैः पुनर्विव्याधसप्तत्यासारथिंचास्य
स्यपंचभिः भीमसेनस्तुराजानंबाह्लिकंप्रपितामहं विद्धानादन्महानादंशार्दूलइववानने आर्जुनि
श्चित्रसेनेनविद्धोबहुभिराशुगैः चित्रसेनंत्रिभिर्बाणैर्विव्याधहृदयेभृशं समागतौतुसमरेमहा
वीरौव्यरोचतां यथादिविमहाघोरौराजन्बुधशनैश्चरौ तस्याश्वांश्चतुरोहत्वासूतंनवभिःशरैः
ननादबलवान्नादंसौभद्रःपरवीरहा अहताश्वाद्रथात्तूर्णंदुर्मुखस्यविशांपते द्रोणश्चद्रुपदंवि
ध्वाशरैःसन्नतपर्वभिः सारथिंचास्यविव्याधत्वरमाणःपराक्रमी पीड्यमानस्ततोराजाद्रुपदोवा

भीष्म० हनीपतिः अपायाज्जवनैरश्वैः पूर्ववैरमनुस्मरन् भीमसेनस्ततो राजानं मुहूर्त्तादिव वाह्लिकं व्य
१५६ श्वसत्तरथं चक्रे सर्वसैन्यस्य पश्यतः ससंभ्रमो महाराज संशयं परमो गतः अवप्लुत्य रथोवाहा
द्वाह्लिकः पुरुषोत्तमः आरुरोह रथं तूर्णं लक्ष्मणस्य महारथः सात्यकिः कृतवर्माणं वारयित्वा
८४ महारथः शरैर्बहुविधैः राजन्नाससाद पितामहं सविध्वा भारतं षष्ट्या निशितैः लोमवाहि
भिः ननर्त्त रथोपस्थे विधुन्वानो महाधनुः तस्यायसीं हेमशक्तिं चिक्षेपाथ पितामहः
हेमचित्रां महावेगां नागकन्योपमां शुभां तामापतंतीं सहसा मृत्युकल्पां सुतेजनां ध्वंसयामास
वार्ष्णेयो लाघवेन महायशाः अनासाद्य तु वार्ष्णेयं शक्तिः परमदारुणा न्यपतद्धरणीपृष्ठे
महोल्केव गतप्रभा वार्ष्णेयस्तु ततो राजन् स्वां शक्तिं घोरदर्शनां वेगवद्गृह्य चिक्षेप पितामहरथं
प्रति वार्ष्णेयभुजवेगेन प्रणुन्ना सा महाहवे अभिदुद्राव वेगेन कालरात्रिर्यथा नघ तामापतं
तीं सहसा ध्वजं चिछेद भारत क्षुरप्राभ्यां सुतीक्ष्णाभ्यां स्यानुकीर्यत भूतले छित्वा तु शक्तिं गांगे
यः सात्यकिं नवभिः शरैः आजघानोरसि क्रुद्धः प्रहसन् शत्रुकर्षणः ततः सरथनागाश्वा पांडु राम
वाः पांडुपूर्वजं परिवव्रुः रणे भीष्मं प्राधवत्राणकारणात् ततः प्रववृते युद्धं तुमुलं लोमहर्षणं पांडवा १५६

नां कुरूणां च समरे विजयैषिणां इति श्रीमहाभारते भीष्मपर्वणि भीष्मयुद्धे नवमदिवसे संजय उ
वाच दृष्ट्वा भीष्मं रणे क्रुद्धं पांडवैरभिसंवृतं यथा मेघैर्महाराज तपांते दिवि भास्करं दुर्योधनो महारा
जा दुःशासनमभाषत एष शूरो महेष्वासो भीष्मः शत्रुनिसूदनः छादितः पांडवैः शूरैः समंताद्भर
तर्षभ तस्य कार्यं त्वया शूर रक्षणं सुमहात्मनः रक्ष्यमाणो हि समरे भीष्मोऽस्माभिः पितामहः निहन्या
त्समरे यत्नात् पांचालान् पांडवैः सह तत्र कार्यमहं मन्ये भीष्मस्यैवाभिरक्षणं गोप्ता ह्येष महेष्वासो भी
ष्मोऽस्माकं पितामहः स भवान् सर्वसैन्येन परिवार्य पितामहं समरे दुःकरं कर्म कुर्वाणं परिरक्षत ए
वमुक्तस्तु समरे पुत्रो दुःशासनो तव परिवार्य स्थितो भीष्मं सैन्येन महता वृतः ततः शतसहस्राणि
सादिनां सुवलात्मजः विमलप्रासहस्तानां ऋष्टितोमरधारिणां दर्पितानां सुवेगानां वलस्थानां प
ताकिनां शिक्षितैर्युद्धकुशलै रुपेतानां नरोत्तमैः नकुलं सहदेवं च धर्मराजं युधिष्ठिरं न्यवारयन्नरश्रे
ष्ठं परिवार्य समंततः ततो दुर्योधनो राजा शूराणां हयसादिनां अयुतं प्रेषयामास पांडवानां निवारणे
तैः प्रक्षिप्तैर्महावेगैर्गरुत्मद्भिरिवाहवे खुराहता धरा राजन् चकंपे च ननाद च खुरशब्दश्च सुमहा
न् वाजिनां शुश्रुवे तदा महावंशवनस्येव दह्यमानस्य पर्वते उत्पतद्भिश्च तैस्तत्र समुद्भूतं महद्रजः

भीष्म· दिवाकररथंप्राप्य छादयामासभास्करं वेगवद्भिर्हयैस्तैस्तु सोभितंपांडवंबलं निपतद्भिर्महावेगैर्हं
१५१ सैरिवमहत्सरे द्रवतांचैवशब्देनन प्राज्ञायतकिंचन ततोयुधिष्ठिरोराजामाद्रीपुत्रौचपांडवो प्र
त्यघ्नंस्तरसा वेगंसमरे हयसादिनं उद्धृतस्य महाराज प्रावृट्कालेभिपूर्वतः पोर्णस्यांस्ववेगेनय
थावेलामहोदधेः ततस्तेरथिनोराजंश्छरैःसन्नतपर्वभिः न्यकृंतन्नुत्तमांगानि बिचरंतोदिशो
दश प्रभ्याहताहयारोहाऋष्टिभिःभरतर्षभ अत्यजन्नुत्तमांगानिफलानीवमहाद्रुमः तेसा
दिनोमहाराजंतत्रतत्रविसूदिताः पतिताःपात्यमानाश्चप्रत्यदृश्यन्तसर्वशः वध्यमानाहयास्ते
तु प्राद्रवंतभयार्दिताः यथासिंहंसमासाद्यमृगाः प्राणपरायणाः पांडवास्तुमहाराजजि
त्वाशत्रून्महाहवे दध्मुःशंखांश्चभेरीश्च द्रावयामासुराहवे ततोदुर्योधनोदृष्ट्वा दीनांसैन्यम
वस्थितं अब्रवीद्भरतश्रेष्ठमद्रराजमिदंवचः एषपांडुसुतोज्येष्ठोयमाभ्यांसहितोरणे पश्यत
स्तेमहाबाहोसेनांद्रावयतेबली तंवारयमहाबाहोवेलेवमकरालयं त्वंहिसंश्रूयसेत्यर्थमसह्य
बलविक्रमः श्रुत्वातस्यतद्वाक्यंशल्यः प्रतापवान् प्रययौरथवंशेनयत्रराजायुधिष्ठिरः राम
तदापतद्वैसहसाशल्यस्यसुमहद्बलं महौघंसमरेवारयामासपांडवः मद्रराजंचसमरेधर्मराजोम १५१

वेगं १

हारथः दशभिः सायकैस्तूर्णमाजघानस्तनांतरे नकुलः सहदेवश्च त्रिभिस्त्रिभिरजिह्मगैः मद्र
राजो पितान्सर्वान्राजघान त्रिभिस्त्रिभिः युधिष्ठिरं पुनः षष्ट्या निजघान शितैः शरैः माद्रीपुत्रौ च
संरब्धौ द्वाभ्यां द्वाभ्यामताडयत् ततो भीमो महाबाहो दृष्ट्वा राजानमाहवे मद्रराजवशं प्राप्तं म
त्योरास्यगतं यथा अभ्यपद्यत संग्रामे युधिष्ठिरममित्रहा ततो युद्धं महाघोरं प्रावर्त्तत सुदारुणं
अपरां दिशमास्थाय द्योतमाने दिवाकरे महाभारते भीष्मपर्वणि नवमे संजय उवाच ततः पि
तामहः क्रुद्धो निशितैः सायकोत्तमैः आजघान रणे पार्थान्सहसैन्यान् परंतप भीमं द्वादशभि
र्विध्वा भीमसेनमवध्यत एकैकं पंचभिर्बाणैः सहदेवं च सप्तभिः युधिष्ठिरं च नवभिः सर्वानुरसि
चार्पयत् धृष्टद्युम्नं ततो विध्वा विननाद महाबलः तं विध्वा दशभिर्बाणैर्नकुलो माधवस्त्रिभिः
धृष्टद्युम्नश्च सप्तत्या भीमसेनश्च पंचभिः युधिष्ठिरश्च नवभिः प्रत्यविध्यत्पितामहं द्रोणश्च सा
त्यतं विध्वा भीमसेनमविध्यत एकैकं पंचभिर्बाणैर्यमदंडोपमैः शरैः तौ च सं प्रत्यविध्येतां त्रिभिस्त्रि
भिरजिह्मगैः तोत्रैरिव महानागे द्रोणं ब्राह्मणपुंगवं सौवीराः कितवाः प्राच्याः प्रतीच्योदीच्य
मालवाः अभीषाहाः शूरसेनाः शिबयोऽथ वशातयः संग्रामे नाजहुर्भीष्मं वध्यमानाः शितैः शरा

भीष्म॰ रैः समरे वध्यमानास्तेपांडवेयैर्महात्मभिः पांडवानभ्यवर्त्तंतविविधायुधपाणयः तथैवपांडवा
१५८ राजन्परिवव्रुः पितामहं समसमंतान्परिहतोरथौघैरपराजितैः महतोग्निरिवोत्सृष्टः प्रजज्वाल
दहन्परान् रथान्यंगारश्चापार्चीरसिशक्तिगदेंधनः परस्फुलिंगोभीष्माग्निर्दहन्क्षत्रियर्षभा
न् सुवर्णपुंखैरिषुभिः गार्ध्रपक्षैःसुतेजसैः कर्णिनालीकनाराचैश्छादयामासतद्बलं रिकु
माणान्परान्पासन्निकृत्यमाणधरेधरान् सहस्राणिनिहत्याजौदध्मौशंखंपितामहः अपात
हुजिनश्चैवरथिनश्चशितैः शरैः मुंडतालवनानींवचकारसरथध्वजान् निर्मुंडकारथावरा
जन्गजाश्वाश्चांश्चसंयुगे अकरोत्समहाबाहुः सर्वशस्त्रभृतांवरः तस्यशां भीष्मचा
पच्युताः शराः हतवीराः रथाराजन्युयुक्तान्पवनैर्हयैः अपश्याममहाराजम्रियमाणान्र
णाजिरे चेदिकाशिकरूषाणांसहस्राणिचतुर्दश महारथाः समाख्याताः कुलपुत्रास्तनुत्य
जः नपरावर्त्तिनः सर्वेसुवर्णविकृतध्वजाः संग्रामेभीष्ममासाद्यव्यादितास्यमिवांतकं नि
र्गताः परलोकायसवाजिरथकुंजराः भग्नाक्षोपस्कराः काश्चिद्भग्नचक्राश्चमारिष अपश्य
मततोराजन्शतशोथसहस्रशः सवरूथैः रथैर्भग्नैः रथिभिश्चनिपातितैः शरैश्चकवचैश्चैव राम
ध्वजैश्चविनिपातितैः चापैश्चबाहुभिश्छिन्नैः समास्तीर्यतमेदिनी हतारोहागजाश्चैवहयाश्च १५८

हतसादिनः परिपेतुर्हतं चैवशतशोथ सहस्रशः पतगानाहितैवीराः द्रवमानान्महारथान् नाशक्नु
वन्वारयितुं भीष्मवाणप्रपीडितान् महेंद्रसमवीर्येणवध्यमानामहाचमूः अवध्यतमहाराज चवैसे
हधावतः आविद्धं रथनागाश्वपतितध्वजकूवरं अनीकंपांडुपुत्राणांहाहाभूतमचेतनं जघानचपि
तापुत्रं पुत्रश्चपितरं तथा प्रियंसखायंचाक्रंदन्युद्धत्वाजोवेलास्कृताः विमुच्यकवचानन्येपांडुपुत्र
स्यसैनिकाः प्रकीर्णकेशाधावंताः प्रत्यदृश्यंतभारत तद्गोकुलमिवोद्भ्रांतमुद्भ्रांतरथकुंजरं ददृशे
पांडुपुत्रस्यसैन्यमार्त्तस्वरंतदा प्रभज्यमानंसैन्यंतु दृष्ट्वायादवनंदनः उवाचपार्थंवीभत्सुंनिगृह्य
रथमुत्तमं अयंसकालः संप्राप्तः पार्थयः कांक्षितस्तव प्रहरस्वनरांश्चैत्यान्नचेन्मोहाद्विमुह्यसि
यत्त्वयाकथितंवीरतदाराज्ञांसमागमे विराटनगरेपार्थसंजयस्यसमीपतः भीष्मंद्रोणंमुखान्सर्वा
न्धार्त्तराष्ट्रस्यसैनिकान् सानुबंधान्हनिष्यामियेमांयोत्स्यंतिसंयुगे इतितत्कुरुकौंतेयसत्यंवाच्यम
रिंदम धर्मक्षत्रंपुरस्कृत्ययुध्यस्वभरतर्षभ इत्युक्तोवासुदेवेनतिर्यग्दृष्टिरधोमुखः अकामइव
वीभत्सुरिदंवचनमब्रवीत् अवध्यानांवधंकृत्वाराज्यंवामतकोत्तरं दुःखानिवनवासेवाकिंतुमेसुकृ
तंभवेत् अर्जुनउवाच चोदयाश्वान्यतोभीष्मः करिष्येवचनंतव पातयिष्यामिदुर्धर्षंभीष्मंकु
रुपितामहं ततोश्वान्रजतप्रख्यान्चोदयामासमाधवः यतोभीष्मस्ततोराज दुःप्रेक्ष्योरविर्यथा

भीष्म॰ १५९

निव ततस्तत्पुनरादत्तं युधिवलवलंमहत् दृष्ट्वापार्थमहावाहुं भीष्मायोद्यंतमाहवे ततोभीष्मः कुरुश्रे
सिंहवत्प्रणदन्मुहुः धनंजयरथं शीघ्रं शरवर्षैरवाकिरत् क्षणेन स रथस्तस्य स हयः सहसारथिः
शरवर्षेण महता न प्रज्ञायत किंचन वासुदेवस्त्वसंभ्रांतो धैर्यमास्थाय सात्वतः चोदयामास तानश्वान्
वितुन्नान्भीष्मसायकैः ततो पार्थो धनुर्गृह्य दिव्यं जलदनिस्वनं पातयामास भीष्मस्य धनुश्छित्वा शितैः
शरैः सछिन्नधन्वा कौरव्यः पुनरन्यन्महद्धनुः निमेषांतरमात्रेण सज्यं कृत्वा पिता तव विचकर्षततो
दोर्भ्यां धनुर्जलदनिःस्वनं अथास्य तदपि क्रुद्धश्चिछेद धनुरर्जुनः तस्य तत्पूजयामास लाघवं शांत
नोःसुतः साधु पार्थ महावाहो साधु कुंतीसुतेति च समाभाष्यैनमपरं प्रगृह्य रुचिरं धनुः मुमोच समरे
भीष्मः शरान्पार्थरथान्प्रति अदर्शयद्वासुदेवो हययाने परं वलं मोघान्कुर्वन्शरांस्तस्य मंडलानि
विदर्शयन् शुशुभाते नरव्याघ्रौ भीष्मपार्थौ शरक्षतौ गोवृषाविव संरब्धौ विषाणोल्लेखनांकितौ वासु
देवस्तु संप्रेक्ष्य पार्थस्य मृदुयुद्धतां भीष्मं च शरवर्षाणि सृजंतमनिशं युधि प्रतपंतमिवादित्यं मध्यमा
साद्य सेनयोः वरान्वरान्विनिघ्नंतं पांडुपुत्रस्य सैनिकान् युगांतमिव कुर्वाणं भीष्मं यौधिष्ठिरे वले ना
मृष्यत महावाहुर्माधवः परवीरहा उत्सृज्य रजतप्रख्यान्हयान्पार्थस्य मारिष क्रुद्धो नाम महायो
गी प्रचस्कंद महारथात् अभिदुद्राव भीष्मं च संप्रजुप्रहरणो वली प्रतोदपाणिस्तेजस्वी सिंहवद्विनदन्

राम १५९

मुहुः धारयन्निव पद्भ्यां स जगतीं जगतीश्वरः क्रोधताम्रेक्षणः कृष्णो जिघांसुरमितद्युतिः ग्रसन्नि
व च चेतांसि तावकानां महाहवे दृष्ट्वा माधवमाक्रुद्धं भीष्मायोद्यतमाहवे हतो भीष्मो हतो भीष्मो
इति तत्र स सैनिकाः क्रोशंतः प्राद्रवन्सर्वे वासुदेवभयान्नराः पीतकौशेयसंवीतो मणिश्यामो ज
नार्दनः शुशुभे विद्रवन्भीष्मं विद्युन्माली यथांबुदः स सिंह इव मातंगं यूथपर्षभ येषभं अभिदुद्रा
व तेजस्वी विनदन्यादवर्षभः तमापतंतं संप्रेक्ष्य पौंडवीकांक्षमाहवे असंभ्रमरणे भीष्मो विचक
र्ष महाधनुः उवाच चैनं गोविंदं स संभ्रांतेन चेतसा एह्येहि पुंडरीकाक्ष देवदेव नमोस्तु ते माम
द्य सात्वतश्रेष्ठ पातयस्व महाहवे त्वया हि देव संग्रामे हतस्यापि ममानघ श्रेय एव परं कृष्ण लोके
ष्मिन्निहैव च संभावितोस्मि गोविंद त्रैलोक्येनाद्य संयुगे अन्वगेव ततः पार्थस्तमनुद्रुत्य केशवं
निजग्राह महाबाहुर्बाहुभ्यां परिगृह्य वै निगृह्यमाणः पार्थेन कृष्णो राजीवलोचनः जगाम चैनमादाय
यदेगेन पुरुषोत्तमः पार्थस्तु विष्टभ्य बलाच्चरणौ परवीरहा निजग्राह हृषीकेशं कथंचिद्दशमे पदे
तत एवाच महाक्रांतः क्रोधपर्याकुलेक्षणं निःश्वसंतं यथा नागमर्जुनः परवीरहा निवर्तस्व महाबा
हो नानृतं कर्तुमर्हसि यत्त्वया कथितं पूर्वं न योत्स्यामीति केशव मिथ्यावादीति लोकस्त्वां कथयिष्यं

त्तिमाधव ममैव भारः सर्वोद्दिह निष्यामिचिंतामहं प्रापे माधव युद्धेन सत्येन सुकृतेन च श्रंतं मध्यं

भीष्म॰ गमिष्यामि शत्रूणां शत्रुकर्षण अद्यैव पश्य दुर्धर्षं पात्यमानं महांनतं तारापतिमिवाघर्ण्यं मंत्रके॰

१९० लियदृच्छया माधवस्तद्वचः श्रुत्वा फाल्गुणस्य महात्मनः नकिंचिदुक्त्वा सक्रोधन्यारुरोह रथं पुनः

तोरथस्थो नरव्याघ्रो भीष्मः शांतनवः पुनः ववर्ष शरवर्षेण मेघो वृष्ट्या यथाऽचले प्राणानस्यादत्त यो

धानां पिता देवव्रतस्तव गभस्तिभिरिवादित्यस्तेजांसि शिशिरात्यये यथा कुरूणां सैन्यानि वभंज युधि

धि पांडवाः तथा पांडवसैन्यानि वभंज युधि मे पिता हतविद्रुतसैन्यास्तु निरुत्साहहतौजसः निरी

क्षितुं न शेकुस्ते भीष्ममप्रतिमं रणे मध्यंगतमिवादित्यं प्रतपंतं स्वतेजसा ते वध्यमाना भीष्मेण का

लेनेव युगक्षये वीक्षां चक्रुर्महात्मानः पार्थिवा भयपीडिताः त्रातारं नाध्यगच्छंत गावः पंकगता इ

व पिपीलिका इव क्षुण्णा दुर्बलाः रवलिनारणे देवतेन च ते भीता भयाः सर्वे महारथाः महारथं भा

रमदुःप्रकंपं शातैस्सिमं प्रतपन्तं नरेंद्राः भीष्मं न शेकुः परिवीक्षितुं ते धाराकं वैर्वसूर्यमिवापतंतं वि

मन्द्रतस्तस्य तु पांडुसेनामस्तं जगामाथ सहस्ररश्मिः ततो बलानां श्रमकर्षितानां ततो वहारं प्र

तिसं वभूव इतिश्रीमहाभारते भीष्मपर्वणि नवम संजयउवाच युध्यतामेव तेषां तु भास्करे स्त राम

मुपागते संध्यासमभवद्घोरा नापश्याम ततो रणं ततो युधिष्ठिरो राजा संध्यां प्राप्य च भारत १९०

वध्यमानं बलं चैव भीष्मेणामित्रघातिना मुकुंदशास्त्रं पराहृत्तं पलायनपरायणं भीष्मं च युधि संर
नब्धमनुयान्तं महारथं सोमकाश्च जितान् दृष्ट्वा निरुत्साहान्महारथान् चिंतयित्वा चिरं राजा अवहा
रमरोचयत ततोऽवहारं सैन्यानां चक्रे राजा युधिष्ठिरः तथैव तव सैन्यानामवहारो भवत्तदा ततो
वहारं सैन्यानां कृत्वा तत्र महारथाः न्यवसंत कुरुश्रेष्ठ संग्रामे क्षत्रियपासिताः भीष्मस्य समरे कर्म
चिंतयतस्तु पांडवाः नालभन्त तदा शांतिं भीष्मबाणप्रपीडिताः भीष्मोपि समरे जित्वा पांडवान् सह ८५
सृंजयैः पूज्यमानस्तव सुतैर्वंद्यमानश्च भारत न्यविशत्कुरुभिः सार्द्धं हृष्टरूपैः समंततः ततो
रात्रिः समभवत्सर्वभूतप्रमोदिनी तस्मिन् रात्रिमुखे घोरे पांडवा वृष्णिभिः सह संजयाश्च दुराधर्षा
मंत्रायसमुपाविशत् आत्मनिःश्रेयसं सर्वे प्राप्तकालं महारथाः मंत्रयामासुरव्यग्रं मंत्रनिश्च
यकोविदाः ततो युधिष्ठिरो राजा मंत्रयित्वा चिरं नृप वासुदेवं समुद्वीक्ष्य वाक्यमेतदुवाच ह पश्य
कृष्ण महात्मानं भीष्मं भीमपराक्रमं गजं नलवनानीव विमर्द्दंतं महारथं न च एनं महात्मानमु
त्सहामो निरीक्षितुं लेलिह्यमानं सैन्येषु प्रवृद्धमिव पावकं यथा घोरो महानागस्तक्षको तिवि
षोल्वणः तथा भीष्मो रणे कृष्ण तीक्ष्णशस्त्रप्रतापवान् गृहीतचापः समरे विप्रमुंचन्शितान्
शरान् संख्ये जेतुं यमः क्रुद्धो वज्रपाणिश्च दानवान् वरुणो वासवो वापि सगदो धनेश्वरः नतु

भीष्मः सुसंक्रुद्धः संख्येजेतुं महाहवे सोहमेवंगते कृष्ण दहति भीष्मोहिनः सदा यथा प्रज्वलितं वह्निं
पतंगः समभिद्रुतः एकतामस्तु मन्येति तथाहं भीष्ममीयवान् क्षयं नीतोस्मि वार्ष्णेय राज्यहेतोः
पराक्रमः भ्रातरश्चैवमे शूराः शायकैर्भृशपीडिताः मत्कृते भ्रातृसौहार्दाद्राज्यभ्रष्टा वनंगताः प
रिक्लिष्टा तया कृष्ण मत्कृते मधुसूदन जीवितं बहुमन्येहं जीवितं ह्यत्र दुर्लभं जीवितस्याद्यशे
षेण करिष्ये धर्ममुत्तमं यदि तेहं मनुग्राह्यो भ्रातृभिः सह केशव स्वधर्मस्याविरोधेन त्वमुदाः
हर केशव एतच्छ्रुत्वा वचस्तस्य कारुण्याद्बहुविस्तरं प्रत्युवाच ततः कृष्णः सांत्वयानो युधिष्ठिरं
धर्मपुत्र विषादं त्वं मा कृथाः सत्यसंगर यस्य ते भ्रातरः शूराः दुर्जयाः शत्रुसूदन अर्जुनो भी
मसेनश्च वाय्वग्निसमतेजसः माद्रीपुत्रौ च विक्रांतौ त्रिदशानामिवेश्वरौ मां वा नियुंक्ष्व सौहा
र्द्याद्योत्स्ये भीष्मेण पांडव त्वत्प्रयुक्तो ह्यहं राजन् किं न कुर्यां महाहवे हनिष्यामि रणे भीष्ममा
हवे भरतर्षभ पश्य मे विक्रमं राजन् महेंद्रस्येव संयुगे विमुंचंतं महास्त्राणि पातयिष्यामि तं र
थात् यः शत्रुः पांडुपुत्राणां मच्छत्रुः स न संशयः ममार्था भवदीयास्ते ये मदीयास्तथैव ते तव

भ्राता मम सखा संबंधी शिष्य एव च मांसान्युत्कृत्य वै दद्यामर्जुनार्थं महीपते तव यं तत्र गच्छामः
प्रश्नं कुरु पितामहं प्रणम्य शिरसा चैनं मंत्रं पृच्छाम भारत स नो दास्यति यं मंत्रं तेन योत्स्यामहे प

रान् एवं संमंत्र्यते वीराः पांडवाः पांडुपूर्वज जग्मुस्ते सहिताः सर्वे भीष्मं शरणमच्युतः तानुवाचम
हाबाहु भीष्मः कुरुपितामहः स्वागतं तव वार्ष्णेय स्वागतं ते धनंजय स्वागतं धर्मपुत्राय यमयोः स्वागतं
तथा किं कार्यं वः करोम्यद्य युष्मत्प्रीतिवर्द्धनं सर्वात्मना च कर्त्तास्मि यद्यपि स्यात् सुदुःकरं यथा
ब्रुवाणं गांगेयं प्रीतियुक्तं पुनः पुनः उवाच वाक्यं दीनात्मा धर्मपुत्रो युधिष्ठिरः कथं जयेयं धर्मज्ञ क
थं राज्यं लभेमहि प्रजानां संक्षयो न स्यात् कथं तन्मे वद द्विभो भवान् हि वधोपायं ब्रवीतु स्वयमात्म
नः भवंतं समरे वीरा चर्व हेम कथं वयं नहि ते सूक्ष्ममप्यस्ति योऽहं कुरुपितामह मंडलेनैव धनुषा
दृश्यते संयुगे सदा आददानं संदधानं विचकर्षन्धनुर्नव पश्यामस्त्वां महाबाहो रथे सूर्यमिवास्थि
तं नराश्वरथनागानां हंतारं परवीरहन् कथं वै चोत्सहेत हंतुं त्वां पुमान् भरतर्षभ वर्षता शरवर्षा
णि महांति पुरुषोत्तम सर्वं नीता हि एतन्नो भवता महती मृम यथा युधि तथेमत्वां यथा राज्यं लभेमहि
या वत्सैन्यस्य चाभावं ति तन्मे ब्रूहि पितामह ततोऽब्रवीच्छांतनवः पांडवान् पांडुपूर्वज नकथंचन कौं
तेय मयि जीवति संयुगे युष्मासु दृश्यते बुद्धिः सत्यमेतद्ब्रवीमि ते निर्जिते मयि कौंतेय ध्रुवं जेष्यथ कौ
रवान् क्षिप्रं मयि प्रहरध्व यदीच्छथ रणे जयं अनुजानामि वः पार्थ प्रहरध्वं यथासुखं एवं हि सुकृतं
मन्ये भवतां विदितो ह्यहं हते मयि हतं सर्वं तस्मादेवं विधीयतां युधिष्ठिर उवाच ब्रूहि तस्मादुपा

भीष्म॰
१६२

यंनो यथा युद्धे जयेमहि भवंतं समरे क्रुद्धं दंडपाणिमिवांतकं शक्तो वज्रधरो हंतुं वारुणो वा यमस्तथा
न भवान्समरे शक्यः सेंद्रैरपि सुरासुरैः भीष्म उवाच सत्यमेतन्महाबाहो यथा वदसि पांडव नाहं जेतुं
रणे शक्यः सेंद्रैरपि सुरासुरैः आत्तशस्त्रं तु मां राजन् हन्युर्युधि महारथाः निक्षिप्तशस्त्रे पतिते विमु
क्तकवचध्वजे द्रवमाणे च भीते च तवास्मीति वादिनि स्त्रियां स्त्रीणामधेयेत विकले चैवपुत्रके अप्र
सूते च दुःप्रेक्ष्ये न युद्धं रोचते मम इदं च शृणु मे पार्थ संकल्पं पूर्वचिंतितं अमंगल्यध्वजं दृष्ट्वा न युध्येयं
कथंचन स एष द्रुपदो राजन्तव सैन्ये महारथः तस्य सूनुर्महावीर्यः सर्वशास्त्रास्त्रपारगः शिखंडी सम
रामर्षी शूरश्च समितिंजयः यथाभवच्च स्त्री पूर्वं पश्चात्पुंस्त्वमुपागतः जानंत्येव भवंतोपि सर्वमेतद्य
थातथं अर्जुनः समरे शूरः पुरस्कृत्य शिखंडिनं मामेव विशिखैस्तूर्णमभिद्रवतु दंशितः अमंगल्यध्व
जे तस्मिन्स्त्री पूर्वे च विशेषतः तस्य हर्तुमभीप्सामि गृहीतेषुः कथंचन तदंतरं समासाद्य पांडवो मां ध
नंजयः शरैर्घातयतु क्षिप्रं समंताद्भरतर्षभ न तं पश्यामि लोकेषु यो मां हन्यात्समुद्यतं ऋते कृष्णात्
महाभागात्पांडवाद्वा धनंजयात् एनं तस्मात्पुरोधाय कंचिदन्यं ममाग्रतः आत्तशस्त्रो रणे यत्तो
गृहीतवरकार्मुकः मां पातयतु बीभत्सुरेवं ते विजयो भवेत् एतत्कुरुष्व कौंतेय यथोक्तं वचनं मम
ततो जेष्यसि संग्रामे धार्तराष्ट्रान्समागतान् संजय उवाच तेनुज्ञातास्ततः पार्थाः जग्मुः स्वशिबि राम
रं प्रति अभिवाद्य महात्मानं भीष्मं कुरुपितामहं तथोक्तवति गांगेये परलोकाय दीक्षिते अर्जु १६२

नोदुःखसंतप्तः सव्रीड इदमब्रवीत् अर्जुन उवाच गुरुणा कुरुवृद्धेन कृतप्रज्ञेन धीमता पितामहेन सं
ग्रामे कथं योत्स्यामि माधव क्रीडिता हि वयं बाल्ये वासुदेव महात्मना पांशुरूषितगात्रेण महात्मा कलुषीकृ
तः तस्याहमधिरुह्यांकं बालः किल गदाग्रजः तातेत्यवोचं पितरं पितुः पांडोर्महात्मनः नाहं तातस्तव
पितुस्तातोस्मि तव भारत इति मामब्रवीत् बाल्ये यः वध्यः कथं कामं मे वध्यतां सैन्यं नाहं योत्स्ये महात्म
नः जयो वास्तु वधो वा मे कथं वा कृष्ण मन्यसे श्रीकृष्ण उवाच प्रतिज्ञाय वधं जिष्णो पुरा भीष्मस्य संयुगे
क्षत्रधर्मस्थितः पार्थ कथं नैनं हनिष्यसि पातयैनं रथात्पार्थ वज्राहतमिव द्रुमं नाहत्वा युधि गांगेयं
विजयस्ते भविष्यति दृष्टमेतत्पुरा देवैर्गमिष्यति यमक्षयं हंता भीष्मस्य पूर्वेद्युः इति तन्नान्यथा
न हि भीष्मं दुराधर्षं व्यात्ताननमिवांतकं त्वदन्यः शक्नुयाद्धंतुमपि वज्रधरः स्वयं जहि भीष्मं महाबा
हो शृणु चेदं वचो मम यदुवाच पुरा शक्रं महाबुद्धिः बृहस्पतिः ज्यायांसमपि चेद्वृद्धं गुणैरपि समन्वि
तं आततायिनमामंत्रा हन्याद्घातकमागतं शाश्वतोयं स्थितो धर्मः क्षत्रियाणां धनंजय योद्धव्यं
रक्षितव्यं च यष्टव्यं चानसूयुभिः अर्जुन उवाच शिखंडी निधनं कृष्ण भीष्मस्य भविता ध्रुवं दृष्ट्वैव हि स
दा भीष्मः पांचाल्यं विनिवर्तते ते वयं प्रमुखे तस्य स्थापयित्वा शिखंडिनं गांगेयं पातयिष्याम उपाये
नेति मे मतिः अहमन्यान्महेष्वासांस्तान् वारयिष्यामि सायकैः शिखंडी विबुधाग्र्यो भीष्ममेवाभि

ति १

भीष्म॰ १६२

यास्यतु स्म तं ते कुरुमुख वतनां हन्यां शिखंडिनं कन्या ह्येषा पुरा जाता पुरुषः समपद्यत इत्येवं निश्चि
यं कृत्वा पांडवाः सहमाधवाः अनुमान्य महात्मानं प्रययुर्हृष्टमानसाः शयनानि यथास्वानि भेजिरे पु
रुषर्षभाः धृतराष्ट्र उवाच कथं शिखंडी गांगेयमभिद्रवत संयुगे पांडवाश्च ततः भीष्मं तन्ममाचक्ष्व सं
जय संजय उवाच ततः प्रभाते विमले सूर्यस्योदयनं प्रति वाद्यमानासु भेरीषु मृदंगेष्वानकेषु
च ध्मायत्सु दधिवर्णेषु जलजेषु समंततः शिखंडिनं पुरस्कृत्य नियाताः पांडवा युधि कृत्वाग्रे
हे महाराज सर्वशत्रुनिवर्हणं शिखंडी सर्वसैन्यानामग्रमासीद्विशांपते चक्ररक्षौ पुनस्तस्य भीमसे
नधनंजयौ पृष्ठतो द्रौपदेयाश्च सौभद्रश्चैव वीर्यवान् सात्यकिश्चेकितानश्च तेषां गोप्ता महारथाः धृ
ष्टद्युम्नस्ततः पृष्ठात्पांचालैरभिरक्षितः ततो युधिष्ठिरो राजा यमाभ्यां सहितः प्रभुः प्रययौ सिंहनादेन
नादयन्भरतर्षभ विराटस्तु ततः पश्चात्स्वेन सैन्येन रक्षितः द्रुपदश्च महाराज ततः पश्चादुपाद्रवत्
केकया भ्रातरः पंच धृष्टकेतुश्च वीर्यवान् जघनं पालयामास पांडुसैन्यस्य भारत एवं व्यूह्य महत्सैन्यं पांडवा
स्तव वाहिनीं अभ्यद्रवंत संग्रामे त्यक्त्वा जीवितमात्मनः तथैव कुरवो राजन्भीष्मं कृत्वा महाबलं अग्रतः
सर्वसैन्यानां प्रययुः पांडवान्प्रति पुत्रैस्तव दुराधर्षैः रक्षितः सुमहाबलैः ततो द्रोणो महेष्वासः पुत्रस्ता
स्य महारथः भगदत्तस्ततः पश्चाद्गजानीकेन संवृतः कृपश्च कृतवर्मा च भगदत्तमनुव्रतौ कांबोजराजो राम १६२
बलवांस्ततः पश्चात्सुदक्षिणः मागधश्च जयत्सेनः सौबलश्च बृहद्बलः तथेतरे महेष्वासाः सुशर्मप्र

२२

मुखान्नृपाः जघनं पालयामासुस्तव सैन्यस्य भारत दशमे दिवसे प्राप्ते भीष्मः शांतनवो युधि आसु
रानकरोद्व्यूहान्पैशाचानथराक्षसान् ततः प्रवृत्ते युद्धे तु वर्तते चाच भारत अन्योन्यं निघ्नतां राजन्यमरा
ष्ट्रविवर्द्धनं अर्जुनप्रमुखा राजन्पुरस्कृत्य शिखंडिनं भीष्मं युद्धेऽभ्यवर्त्तन किरंतो विविधाञ्छरान् ततो
भारत भीमेन पीडितास्तावका भारे[illegible]घपरिक्लिष्टाः परलोकमयुस्तदा नकुलः सहदेवश्च सात्य
किश्च महारथः तव सैन्यं समासाद्य पीडयामासुरोजसा ते वध्यमानाः समरे तावका भरतर्षभ नाश
क्नुवन् वारयितुं पांडवानां महद्बलं ततस्तत्तावकं सैन्यं वध्यमानं समंततः संप्राद्रवद्दिशश्च कल्म
मानं महारथैः त्रातारं नाध्यगच्छंत तावका[illegible] विशांपते वध्यमानाः शितैर्वाणैः पांडवैः सहसृंजयैः
धृतराष्ट्र उवाच पीड्यमानं बलं दृष्ट्वा [illegible] भीष्मः पराक्रमी यदकार्षीद्रणे क्रुद्धस्तन्ममाचक्ष्व संजय
सकथं पांडवान्युद्धे प्रत्युद्यातः परंतपः विमुंचन्सायकान्वीरस्तन्ममाचक्ष्व संजय संजय उवाच आ
चक्ष्वे ते महाराज यदकार्षीत्पितामहः [illegible] तव पुत्रस्य सैन्ये पांडवसृंजयैः प्रहृष्टमनसः शूराः पांड
वाः पांडुपूर्वज अभ्यवर्त्तत युद्धेच्छुस्तमस्तव पुत्रस्य वाहिनी तद्विनाशं मनुष्येंद्र नरवारणवाजिनां नामृष्य
तदा भीष्मः सैन्यं घातं रणे परैः स पांडवान्महेष्वासान् पांचालांश्च सहसृंजयान् नाराचैर्वत्सदंतैश्च शि
तैरंजालिकैस्तथा अभ्यवर्त्तत युद्धेच्छुः [illegible] जीवितमात्मनः स पांडवानां प्रवरान्पंचराजन्महावलान्
श्चान्नस्त्रान् रणे यत्तान् वारयामास सायकैः नाराचैर्वत्सदंतैश्च शितैरंजलिकैस्तथा निजघ्नुस
मेरे क्रुद्धो हस्त्यश्चापासितं वहु रथिनः पातयन्राजन्रथेभ्यः पुरुषर्षभ सादिनश्चाश्वपृष्ठेभ्यः प

दातांश्च समागतान् गजारोहान् गजेभ्यश्च परेषां विनदन् भयं तमेकं समरे भीष्मं त्वरमानं महारथं पांड
भीष्म॰ १८४ वाः समवर्त्तंत वज्रहस्तमिवासुराः शक्राशनिसमस्पर्शान् विमुंचंतिशितान् शरान् दिक्षु सर्वासु घोरोसु
घोरं संधारयन्वपुः मंडलीकृतमेवास्य नित्यं धनुरदृश्यत संग्रामे युध्यमानस्य शक्रचापोपमं महत् चक्रपाणिर्न्निवं
तं दृष्ट्वा समरे राजन् पुत्रास्तव विशांपते विस्मयं परमं प्राप्ताः पितामहमपूजयन् पार्था विमनसो भूत्वा प्रेक्ष
तं पितरं तव युध्यमानं रणे भीष्मं विप्रचित्तिं महासुराः नचैनं वारयामासुर्व्यात्ताननमिवांतकं दशमे हनि
संप्राप्ते रथानीकं शिखंडिनः अदहन्निशितैर्बाणैः कृष्णवर्त्मेव काननं तं शिखंडी त्रिभिर्बाणैरभ्यवि
ध्यत्स्तनांतरे आशीविषमिव क्रुद्धं कालसृष्टमिवांतकं सतेनातिभृशं विद्धः प्रेक्ष्य भीष्मः शिखं
डिनं अनिच्छन्निव संक्रुद्धः प्रहसन्निदमब्रवीत् कामं युध्य स वा मेवा न त्वं योत्स्ये कथंचन यैव हि विहिता स्रष्टा
धाता या सैव हि त्वं शिखंडिनी तस्य तद्वचनं श्रुत्वा शिखंडी क्रोधमूर्छितः उवाच समरे भीष्मं सृक्किणी
परिसंलिहन् जानामि त्वां महाबाहो क्षत्रियाणां क्षयंकरं मयाश्रुतं च ते युद्धं यामदग्न्येन वै मुहुः दि
व्यश्च ते प्रभावोयः समया च हि श्रुतः मया जानन्नपि प्रभावं ते योत्स्येद्याहं त्वया सह पांडवानां प्रियं
कुर्वन्नागतश्च नरोत्तम अद्य त्वा योधयिष्यामि रणे पुरुषसत्तम ध्रुवं च त्वां हनिष्यामि शपे सत्येन ते
ग्रतः एतच्छ्रुत्वा वचो मह्यं यत्क्षमं तत्समाचर काममस्यस्व मा वा यून मे जीवन्विमोक्ष्यसे संहृष्टः राम
क्रियतेभीष्मे लोकोयं समितिंजय संजय उवाच एवमुक्त्वा ततो भीष्मं पंचभिर्नतपर्वभिः अविध्य १८४
त रणे राजन् प्रणुन्नो वाक्यशायकैः तस्य तद्वचनं श्रुत्वा सव्यसाची धनंजयः कालोयमिति संचिं

त्वयि शिखंडिनमचोदयत् अहं त्वामनुयास्यामि परान्विद्रावयन् शरैः अभिदुद्राव संरब्धो भीष्मं भीमपराक्र-
मं न हि ते संयुगे पीडां शक्तः कर्तुं महाबलः तस्मादद्य महाबाहो वीर भीष्ममभिद्रव अहं त्वां समरे भीष्मं यास्य- यदि २
सि मारिष अवहासोस्य लोकस्य भविष्यसि मया सह नावहास्याय यथा वीर भवेम परमाहवे तथा कुरु रणे य-
त्नं साधयस्व पितामहं द्रोणं च द्रोणपुत्रं च कृपं चाथ सुयोधनं चित्रसेनं विकर्णं च सैंधवं च जयद्रथं विंदानु-
विंदावावंत्यौ कांबोजं च सुदक्षिणं भगदत्तं तथा शूरं मागधं च महारथं सौमदत्तिं रणे शूरं आर्ष्यशृंगं च
राक्षसं अहमावारयिष्यामि वेलेव मकरालयं कुरूंश्च सहितान्सर्वान्ये चैषां सैनिकाः स्थिता निवारयिष्या-
मि रणे साधयस्व पितामहं इति श्री महाभारते भीष्मपर्वणि दशमे युद्ध दिवसे धृतराष्ट्र उवाच कथं शि-
खंडी गांगेयमभ्यधावत्पितामहं पांचाल्यः समरे क्रुद्धो धर्मात्मानं धृतव्रतं केरक्षन् पांडवानीके शिखंडि-
नमुदायुधं त्वरमाणास्त्वराकाले जिगीषंतो महारथाः कथं शांतनवो भीष्मः स तस्मिन्दशमेहनि अयु-
ध्यत महावीरैः पांडवैः सह संजयैः नामृष्यामि रणे भीष्मं प्रत्युद्यातं शिखंडिनं कच्चिन्न रथभंगोस्य धनुर्वा
शीर्यतास्यतः संजय उवाच नाशीर्यत धनुस्तस्य रथभंगो न चाप्यभूत् युध्यमानस्य संग्रामे भीष्मस्य भ-
रतर्षभ व्यनिघ्नन्समरे शत्रून् शरैः सन्नतपर्वभिः अनेकशतसाहस्रास्तावकानां महारथाः रथा दं-
ति गजा राजन्हयाश्चैव ससज्जिताः अभ्यद्रवंत युद्धाय पुरस्कृत्य पितामहं यथाप्रतिज्ञं कौरव्यः स चापि
समितिंजयः पार्थानामकरोद्भीष्मः सततं समितिक्षयं योध्यमानं महेष्वासं विनिघ्नंतं परान् शरैः पांचालाः

भीष्म
१६५ पांडवैः सार्द्धं सर्व एवाभ्यवारयन् दशमे हनि संप्राप्ते ततस्तां रिपुवाहिनीं कीर्यमाणां शितैर्वाणैः शतशोथ
सहस्रशः न हि भीष्मं महेष्वासं पांडवाः पांडुपूर्वज अशक्नुवन् रणे जेतुं पाशहस्तमिवांतकं अथोपायान्महाराज
सव्यसाची परंतपः त्रासयन् रथिनः सर्वान् बीभत्सुरपराजितः सिंहवद्विनदन्नुच्चैर्धनुर्ज्यां निक्षिपन्मुहुः
शरौघान्विसृजन्पार्थो व्यचरत्कालवद्रणे तस्य शब्देन वित्रस्तास्तावका भरतर्षभ सिंहस्येव महाराज
प्रद्रवंत महाभयात् जयंतं पांडवं दृष्ट्वा त्वत्सैन्यं चाभिपीडितं दुर्योधनस्ततो भीष्ममब्रवीच्चैरपीडितः
एष पांडुसुतस्तात श्वेताश्वः कृष्णसारथिः [illegible] दहते मामकान्सर्वान्कृष्णवर्त्मेव काननं पश्य सैन्यानि गां
गेय द्रवमाणानि सर्वशः पांडवेन युधां श्रेष्ठ काल्यमानानि संयुगे यथा पशुगणान्पालः संकालयति
कानने तथेदं तावकं सैन्यं काल्यते शत्रुतापन धनंजयशरैर्भग्नं द्रवमाणमितस्ततः भीमो ह्येष दुरा
धर्षो विद्रावयति मे बलं सात्यकिश्चेकितानश्च माद्रीपुत्रौ च पांडवौ अभिमन्युश्च विक्रांतो वाहिनीं द
हतो मम धृष्टद्युम्नस्तथा वीरो राक्षसश्च घटोत्कचः व्यद्रावयति सेनां सत्सैन्यान्मम महारणे वध्यमा
नस्य सैन्यस्य सर्वैस्तैस्तैर्महाबलैः नान्यां गतिं प्रपश्यामि स्थाने युद्धं च भारत ऋते त्वां पुरुषव्याघ्र देव
तुल्यपराक्रम पर्याप्तं तु भवान्क्षिप्रं पीडितानां गतिर्भव एवमुक्तो महाराज पिता देवव्रतस्तव चिंतयि
त्वा मुहूर्त्तं तु कृत्वा निश्चयमात्मनः तव संधारयन्पुत्रमब्रवीच्छांतनोः सुतः दुर्योधन विजानीहि स्थि
रो भव विशांपते पूर्वकालं तव मया प्रतिज्ञातं महाबल हत्वा दश सहस्राणि क्षत्रियाणां महात्मना संग्रामा राम
द्व्यपयातव्यमेतत्कर्म ममाह्निकं इति तत्कृतवांश्चाहं यथोक्तं भरतर्षभ अद्य चापि महत्कर्म प्रकरिष्ये म १६५

साल्वे अहं च निहतः द्रोणो हन्निं चा द्य पांडवान् अद्य ते पुरुषव्याघ्र प्रतिमो क्षेत्र एं महार भर्तृपिंड
कृतं राजन् निहतः पृतनामुखे मृत्युं त्वा भरतश्रेष्ठ क्षत्रया न प्रतिपद्धरे: आससाद दुराधर्ष: पां
डवानामनीकिनी अनीकमध्यमे तिष्ठन् गांगेयं भरतर्षभ आशीविषमिव क्रुद्धं पांडवा पर्यवारयन्
दशमे हनि तस्मिंस्तु दुर्योधन शांतिमात्मनः राजंश्चैवतु सहस्राणि कुंजराणां तस्विनां सारोहाणां
महाराज हयानां वायुतं पुनः तेषामादत्ते तेजांसि जलं सूर्य इवांशुभिः हत्वा दश सहस्राणि कुंजराणां
महाबल: नचापि पांडवेयानां केचिच्छक्तो निरीक्षितुं पूर्णं घातसहस्रे द्वे पदातीनां नरोत्तम प्रजज्वाले
रणे भीष्मा विधूम इव पावकः नचैकं पांडवेयानां केचिच्छेकु निरीक्षितुं उत्तरं मार्गमास्थाय तपंत
मिव भास्करं ते पांडवेयाः संरब्धाः महेष्वासेन पीडिताः वधायाभ्यद्रवन् भीष्मं संजयाश्च महारथाः
आयुध्यमानो बहुभिर्भीष्मः शांतनवस्तदा अवकीर्णो महाबाहुः शैलो मेघैरिवासितैः पुत्रस्तु तु
व गांगेयं समंतात् पर्यवारयन् महत्या सेनया सार्द्धं ततो युद्धमवर्तत इति श्रीमहाभारते भीष्मपर्व
णि संजय उवाच अर्जुनस्तु रणे राजन् दृष्ट्वा भीष्मस्य विक्रमं शिखंडिनमथो वाच समभ्येति पिताम
हं नचापि भीस्त्वया कार्या भीष्माद् द्य कथंचन अहमेनं शरैस्तीक्ष्णैः पातयिष्ये रथोत्तमात् एवमु
क्तस्तु पार्थेन शिखंडी भरतर्षभ अभ्यद्रवत गांगेयं श्रुत्वा पार्थस्य भाषितं
महाबलः धृष्टाच द्रवतां भीष्मं श्रुत्वा पार्थस्य भाषितं विराट द्रुपदो वृद्धो कुंतिभोजश्च दंशिताः अ

= भीष्मप्रेमुखे रणेयंतु सिंहव्याघ्रेश्वि शूर्यया धृष्टद्युम्नं महाराज भीष्मांतकमुपागतं चरम

णे यत्तं रणेकृतवर्मा व्यवारयत =

भीष्म॰ अद्रवंतगांगेयं पुत्रस्य तव पश्यतः नकुलः सहदेवश्च धर्मराजश्च वीर्यवान् तथेतराणि सैन्यानि

१६६ सर्वाण्येव विशांपते समाद्रवंतगांगेयं श्रुत्वा पार्थस्यभाषितं प्रत्युद्ययुस्तावकाश्च समेतांस्तान्

महारथान् यथाशक्ति यथोत्साहं तन्मे निगदतः शृणु चित्रसेनो महाराज चेकितानं च वीर्यवा

न् कृतवर्मा महाराज सोमदत्तिश्च वीर्यवान् विकर्णो दुर्मुखश्चैव

चित्रसेनो महाराज चेकितानं समभ्ययात् तथैव नकुलं वीरं किरंतं सायकान् वहून् विकर्णोवि

रयामास भीष्मः भीष्मस्य जीवितं सहदेवं तथा यांतं यत्तं भीष्म रथं प्रति वारयामास संक्रुद्धः

कृपः शारद्वतो यदि राक्षसं क्रूरकर्माणं भैमसैनिं महाबलं भीष्मस्य निधनं प्रेप्सुं दुर्मुखोऽभ्य

द्रवद्बली सात्यकिं समरे क्रुद्धो सात्यकिं गिरवारयत् धृष्टद्युम्नं महाराजा यांतं भीष्म रथं प्रति

सुदक्षिणो महाबाहुः कांभोजः प्रत्यवारयत् विराट द्रुपदौ वृद्धौ समेतावरिमर्द्दनौ अश्व

त्थामा ततो क्रुद्धोवारयामास भारत तथा पांडुसुतं ज्येष्ठं भीष्मस्य वधकांक्षिणं भारद्वाजो

रणेयत्तो धर्मपुत्रमवारयत् अर्जुनं समरे योद्धुं नोत्सहत्तापि वासवः किमु भीष्मोरणे वीराम

तसत्वो त्यजीवितः इतिसेनापतेश्चा ता पांडवानां महारथाः अभ्यद्रवंत संहृष्टा गांगे राम

यस्यरथं प्रति आगतस्तान्समरे वार्योऽयोधात्प्रबलानिच न्यवारयंत संहृष्टास्तावकाः पुरु १६६

षर्षभ दुःशासनोमहाराज भयंत्यक्त्वा महारथः भीष्मस्यजीविताकांक्षीधनंजयमुपाद्रवत् तथैव
पांडवाःशूरा गांगेयस्यरथंप्रति अभिद्रवंतसंग्रामे तवपुत्रान्महारथान् तत्राद्भुतमपश्यामचित्र
रूपंविशांपते दुःशासनरथंप्राप्यपार्थो नाभ्यवर्त्तत यथावारयते वेलां क्षुभितंवैमहार्णवं त
थैवफाल्गुनंवीरं तवपुत्रोन्यवारयत् उभौहिरथिनांश्रेष्ठौउभौभारतदुर्जयौ उभौचंद्रार्कसदृशौ
कांत्यादीप्त्याचभारत ततोस्तौजातसंरंभावन्योन्यवधकांक्षिणौ समीयतुर्महासंख्ये यमशक्रौयथा
पुरा दुःशासनोमहाराज पांडवविशिखैस्त्रिभिः वासुदेवंचसुप्तत्याताडयामाससंयुगे ततोर्जुनोजा
तमन्युर्वार्ष्णेयंवीक्ष्यपीडितं दुःशासनं[illegible]तेनाजौनाराचानांसमार्दयत् तेतस्यकवचंभित्वापपुःशो
णितमाहवे दुःशासनस्ततःक्रुद्धःपार्थंविव्याधपंचभिः ललाटेभरतश्रेष्ठशरैःसुनिशितैस्त्रिभिः
ललाटस्थैस्ततैर्बाणैःशुशुभेपांडवोत्तमः यथामेरुर्महाराजशृंगैरत्यर्थमुच्छ्रितैः सोतिविद्धोम
हेष्वासःपुत्रेणतवधन्विनः व्यराजतरणेपार्थःकिंशुकःपुष्पवानिव दुःशासनंततःक्रुद्धःपीडयामा
सपांडवः पर्वणीवसुसंक्रुद्धोराहुरुग्रोनिशाकरं पीड्यमानोबलवताऽपुत्रस्तवविशांपते विव्याधसम
रेपार्थंकंकपत्रैःशिलाशितैः तस्यपार्थोधनुश्छित्वात्वरमाणःपराक्रमी आजघानततःपश्चात्पुत्रं
तेनवभिःशरैः सोन्यत्कार्मुकमादायभीष्मस्यप्रमुखेस्थितं अर्जुनंपंचविंशत्याबाह्वोरुरसिचार्पय
त् तस्यक्रुद्धोमहाराजपांडवःशत्रुसूदनः अप्रेषीद्विशिखान्घोरान्यमदंडोपमाञ्छितान् अप्राप्ता

भीष्म॰
९८

नैव तान्स बाणान्द चिच्छेद नभसस्तव पतमानस्य तद्द्रुतमिवाभवत् पार्थं च निशितैर्बाणैर् विव्याध नय
स्तव ततः क्रुद्धो रणे पार्थः शरान्संधाय कार्मुके प्रेषयामास समरे स्वर्णपुंखान्शिलाशितान् अश्म
जं तं महाराज तस्य कायं महात्मनः यथा हंसा महाभागा तडागं प्राप्य भारत पीडितश्चैव पुत्रस्ते पांडवेन
महात्मना हित्वा पार्थं रणे शूरं भीष्मस्य रथमाश्रयत् अगाधमज्जतस्तस्य द्वीपो भीष्मोभवत्तदा प्रति
लभ्य ततः संज्ञां पुत्रस्तव विशांपते अ[illegible] ततः शूरो भूय एव पराक्रमी शरैः सुनिशितैः पार्थं यथा
वृत्रः पुरंदरं निर्बिभेद महावीर्यो वियव्यथे च वसोर्जुन इतिश्रीमहाभारते भीष्मपर्वणि संजय उवा
च सात्यकिं दंशितं युद्धे भीष्मायाभ्युद्यतं रुष आर्ष्यशृंगिर्महेष्वासो वारयामास संयुगे तं माधव
स्तु संक्रुद्धो राक्षसं नवभिः शरैः अर्दयामास राजेंद्र संक्रुद्धः शिनिपुंगवं सैनेयः शरसंघास्तु प्रे
षयामास संयुगे राक्षसाय सुसंक्रुद्धस्तमलंबुषः परवीरहा ततो रक्षो महाबाहुः सात्यकिं सत्यविक्रमं
विव्याध निशितैस्तीक्ष्णैः सिंहनादं ननाद च माधवस्तु भृशं विद्धो राक्षसेन रणे तदा धैर्यमालंब्य ते
जस्वी जहास च ननाद च भगदत्तस्ततः क्रुद्धो माधवं निशितैः शरैः अर्दयामास समरे तोत्रैरिव महा
गजं विहाय राक्षसं युद्धे शैनेयो रथिनां वरः प्राग्ज्योतिषाय चिक्षेप शरान्संनतपर्वणः तस्य प्रा
ग्ज्योतिषो राजा माधवस्य महद्धनुः चिच्छेद शितधारेण भल्लेन कृतहस्तवत् अथान्यद्धनुरादाय
विद्रवत्परवीरहा भगदत्तं रणे क्रुद्धो विव्याध निशितैः शरैः सोतिविद्धो महेष्वासः सृक्किणी संलि

राम
१९८

हन्मुद्धः शक्तिं कनकवैडूर्यभूषितां मायसीं दृढां कालदंडोपमां घोरां प्राहिणोत्सात्यकाय वै तामाप
तंतीं सहसा तस्य बाहुबलेरितां सात्यकिः समरे राजन्क्रोधाच्चिच्छेद सायकैः सा पपात तदा भूमौ महो
ल्केव गतप्रभा शक्तिं विनिहतां दृष्ट्वा पुत्रस्तव विशांपते महता रथवंशेन वारयामास माधवं तथा परि
वृतं दृष्ट्वा वार्ष्णेयानां महारथं दुर्योधनोऽपि संहृष्टो भ्रातॄन्सर्वानुवाह च तथा कुरुत कौरव्या यथा वः सात्य
की युधि न जीवन्प्रतिनेष्येति महता स्यंदनव्रजात् अस्मिन्हते हतं मन्ये पांडवानां महद्बलं तत्तथेति वच
स्तस्य परिगृह्य महारथः सैनेयं योधयामास भीष्मस्य प्रमुखे तदा अभिमन्युं तथायांतं भीष्मायाभ्युद्य
तं रणे कांबोजराज बलवान्वारयामास संयुगे आर्जुनिर्नृपतिं विद्ध्वा शरैः सन्नतपर्वभिः पुनरेव चतुः
षष्ट्या राजन्विव्याध तं नृप सुदक्षिणस्तु समरे कार्ष्णिं विव्याध पंचभिः सारथिं चास्य नवभिरिच्छन्भी
ष्मस्याजीवितं तद्युद्धमासीत्सुमहत्तयोस्तत्र पराक्रमे यदभ्यधावद्गांगेयं शिखंडी शत्रुतापनः विराटद्रु
पदौ हृद्धौ वारयंतौ महाचमूं भीष्मं च युधि संरब्धौ प्राद्रवंतौ महारथौ अश्वत्थामा ततः क्रुद्धः समीयाद्र
थसत्तमः ततः प्रववृते युद्धं तयोस्तस्य च भारत विराटो दशभिर्भल्लैराजघान परंतप यतमानं महे
ष्वासं द्रौणिमाहवशोभिनं द्रुपदस्तु त्रिभिर्बाणैर्विव्याध निशितैस्तदा गुरुपुत्रं समासाद्य भीष्मस्य पुर
तः स्थितः अश्वत्थामा ततस्तौ तु विव्याध नवभिः निशितैः शरैः विराटद्रुपदौ वृद्धौ भीष्मं प्रति समुद्य
तौ तत्राद्भुतमपश्याम वृद्धयोश्चरितं महत् यद्द्रौणेः सायकान्घोरान्प्रत्यवारयतां युधि सहदेवं त

भीष्म. याद्यांतं कृपः शारद्वतोभ्ययात् यथा नागवनं नागो मत्तो मत्तमिव द्विपं कृपश्च समरे राजन् माद्रीपुत्रं महा
१६० रथं आजघान शरैस्तूर्णं सप्तत्या रुक्मभूषणैः तस्य माद्रीसुतश्चापं द्विधा चिछेद सायकैः अथैनं छिन्न
धन्वानं विव्याध नवभिः शरैः सोन्यत्कार्मुकमादाय समरे भारसाधनं माद्रीसुतं च संहृष्टो दशभिर्नि
शितैः शरैः आजघानोरसि क्रुद्धः रक्षन् भीष्मस्य जीवितं तथैव पांडवो राजन् शारद्वतममर्षणं आ
जघानोरसि क्रुद्धो भीष्मस्य वधकांक्षया तयोर्युद्धं समभवद्घोररूपं महाभयं नकुलं तु रणे क्रुद्धं वि
कर्णः शत्रुतापनः विव्याध सायकैः षष्ट्या रक्षन् भीष्मस्य जीवितं नकुलस्तु भृशं विद्धस्तव पुत्रेण
धन्विना विकर्णं सप्तसप्तत्या निर्बिभेद शिलीमुखैः तत्र तौ नरशार्दूलौ भीष्महेतोः परंतपौ अन्यो
न्यं जघ्नतुः वीरौ गोष्ठे गोवृषभाविव घटोत्कचं रणे यांतं निघ्नंतं तव वाहिनीं दुर्मुखस्समुपेयाद्भी
ष्महेतोः पराक्रमी हैडिंबस्तु ततो राजन् दुर्मुखं शत्रुतापनं आजघानोरसि क्रुद्धो रणे निशितैः शा
रैः भीमसेनसुतं चापि दुर्मुखस्सुमुखैः शरैः षष्ट्या वीरो दहृष्टो विव्याध रणमूर्द्धनि धृष्टद्युम्नं
तथा यांतं भीष्मस्य वधकांक्षिणं हार्दिक्यो वारयामास रक्षन् भीष्मस्य जीवितं हार्दिक्यं पार्षतः शूरो
विद्धा पंचभिरायसैः पुनः पंचाशता तूर्णमाजघान महारथः तथैव पार्षतो राजा हार्दिक्यं नवभिः शि
रैः विव्याध विशिखैर्दीप्तैः कंकपत्रपरिच्छदैः तयोः समभवद्युद्धं भीष्महेतोर्महारणे अन्योन्यातिशा
रे युक्तं यथा वृत्रमहेंद्रयोः भीमसेनमथायांतं भीप्रतिम महाबलं भूरिश्रवाभ्ययात्तूर्णं तिष्ठतिष्ठेति चा राम
ब्रवीत् सोमदत्तिरथो भीमं निजघान स्तनांतरे नाराचेन सुतीक्ष्णेन रुक्मपुंखेन संयुगे उरस्थेन बभौ तेन १६०

भीमसेनः प्रतापवान् स्कंदसंस्थो यथा क्रौंचः पुरा नृपतिसत्तम ततो शरान्सूर्यसंकाशान् कर्मारपरिकर्मिता अ
न्योन्यस्य रणे क्रुद्धौ चिक्षिपाते मुहुर्मुहुः भीष्मो भीष्मवधाकांक्षी सोमदत्ति महारथे तथा भीष्मजये गृध्रः सोमद
त्तिः पांडवं कृतप्रतिकृते यत्नैर्योधयामास तौ रणे युधिष्ठिरं महाराज महत्या सेनया वृतं भीष्मायाभिमुखं यां
तं भारद्वाजोन्यवारयत् द्रोणस्य रथनिर्घोषं पर्जन्यनिनदोपमं श्रुत्वा प्रभद्रका राजन्समकंपंत भारत सा सेना
महती राजन् पांडुपुत्रस्य संयुगे द्रोणेन वारितायत्ता न चचाल पदात्पदं चेकितानो रणे क्रुद्धो भीष्मं प्रति जनेश्वरं
चित्रसेनस्तव सुतं क्रुद्धरूपमवारयत् भीष्महेतोः पराक्रांतं भीमसेनो महारथः चेकितानं परं शक्त्या योधयामास भार
त तथैव चेकितानोपि चित्रसेनमयोधयत् तद्युद्धमासीत् सुमहत् त्वयोस्तत्र पराक्रमे अर्जुनो वार्यमाणस्तु बहुशस्तनयेन ते
विमुखीकृत्य पुत्रं ते तव सेनां ममर्द ह दुःशासनोपि परया शक्त्या पार्थमवारयत् कथं भीष्मं ततो हन्यादिति निश्चित्य भारत तथैव चे
कितानोपि पुत्रस्य तव वाहिनी लोड्यते रथिनां श्रेष्ठैस्तत्र तत्रैव भारत महाभारते भीष्मपर्वणि संजय उवाच अथ वीरो महेष्वासो मत्त
वारणविक्रमः समादाय महच्चापं मत्तवारणवारणं विधुन्वानो रथश्रेष्ठं द्रावयंस्तैर्महारथान् एतं नो पांडवेयानां पातयानो महार
पः निमित्तानि निमित्तज्ञः सर्वतो वीक्ष्य वीर्यवान् प्रतपंतमनीकानि द्रोणपुत्रमभाषत अयं स दिवसस्तात यत्र पार्थो म
हाबलः जिघांसुः समरे भीष्मं परं यत्नं करिष्यति उत्पतंति हि मे बाणाः धनुः प्रास्फुरतीव च योगमस्त्राणि नेच्छंति क
दा मे वर्त्तते मतिः दिक्षु शांतासु घोराणि व्याहरंति मृगद्विजाः नीचैर्गृध्रा निलीयंते भारतानां चमूं प्रति नष्टप्रभ इव
आदित्यः सर्वतो लोहिता दिशः रसते व्यथते भूमिरनुस्तनति वाहनं कंकागृध्रा वडाश्चैव व्याहरंति मुहुर्मुहुः शिवाश्चाशिवा
वै घोरा वेदयंत्यो महद्भयं पपात महती मध्ये उल्का चादित्यमंडलात् सकबंधः सपरिघो भानुमावृत्य तिष्ठति प
रिवेषस्तथा घोरश्चंद्रभास्करयोरभूत् वेदयंति भयं घोरं राज्ञां देहावकर्तनं देवतायतनस्थाश्च कौरव्येंद्रस्य देवताः
कंपते च हसंते च नृत्यंति च रुदंति च अपसव्यं ग्रहाः क्रूराः [illegible] मायां निशाकरं अवाक्शिराश्च भगवानुदति

भीष्म शनचंद्रमाः व पूर्वे च नरेंद्राणां विगतानी वलक्षये धार्त्तराष्ट्रस्य सैन्येषु न च भ्राजंति दंशिताः सेनयो रुभयो श्चैव
१६९ समंतात्र क्रमते महान् पांचजन्यस्य निर्घोषो गांडीवस्य च निःस्वनाः धृवमादाय बीभत्सु रुत्तमास्त्राणि संयुगे अपा
स्य तान् रणे योधा नभ्येति च पितामह हृष्यंति रोमकूपानि सीदतीव च मे मनः चिंतयित्वा महावाहो भीष्मार्जुनस
मागमं तं वै निकृतप्रज्ञो पांचाल्यं पापचेतनं पुरस्कृत्य रणे पार्थो भीष्मस्यायोधनं गतः अब्रवीच्च पुरा भीष्मो ना
हं हन्यां शिखंडिनं स्त्री ह्येषा विहिता धात्रा दैवाच्च स पुनः पुमान् अमंगल्यध्वजश्चैव याज्ञसेनि र्महारथः न चा
मंगलिके तस्मिन्प्रहरे दापगासुतः एतद्विचिंतयानस्य संज्ञा सीदति मे भृशं अद्यैव तु रणे पार्थः कुरुवृद्धमुपाद्रवत्
युधिरस्य च क्रोधो बीभत्सो श्च समागतः मम चासु समारंभो प्रज्ञांतामशुभं ध्रुवं मनस्वी बलवान्शूरः कृतास्त्रो दृढविक्रमः
दूरपाती दृढेसुश्च निमित्तज्ञश्च पांडवः अजेयः समरे चैव देवैरपि सवासवैः बलवान्बुद्धिमांश्चैव जितक्लेशो युधांवरः
विजयी च रणे नित्यं भैरवास्त्रश्च पांडवः तस्य मार्गं परिहरन्द्रुतं गच्छ यतव्रत पश्य चैतन्महावाहो वैशसं संयुगे मह
त् हेमचित्राणि शूराणां महांति च शुभानि च कवचान्यव दीर्यंते शरैः सन्नतपर्वभिः छिद्यंते च ध्वजाग्राणि तोम
राणि धनूंषि च प्रासाश्च विमलास्तीक्ष्णाः शक्त्यश्च कनकोज्वलाः ध्वजयंत्यश्च नाभानां धाक्रुद्धेल किरीटिनां
नायं संरक्षितुं कालः प्राणान्पुत्रोपजीविभिः यांति स्वर्गं पुरस्कृत्य यशसे विजयाय च हयनागरथाकीर्णां महाघोरां या
सुदुर्गमां रथेन संग्राम नदीं तरत्येव कपिध्वजः ब्रह्मण्यता दमो दानं तपश्च चरितं महत् इहैव दृश्यते राज्ञो भ्राता यस्य
धनंजयः भीमसेनश्च बलवान्माद्रीपुत्रौ च पांडवौ वासुदेवश्च वार्ष्णेयो यस्य नाथो व्यवस्थितः तस्यैष मन्युप्रभावो
धार्त्तराष्ट्रस्य दुर्मतेः तपोदग्धशरीरस्य तपो दहति भारतान् एवं संदृश्यते पार्थो वासुदेवव्यपाश्रयः दारयन्सर्वसैन्यानि
धार्त्तराष्ट्राणि सर्वशः एतदालोक्यते सैन्यं क्षोभ्यमानं किरीटिना महोर्मिविकृतं सुमहन्निमितेच महात्मनः समुद्रकुक्षिप्रतिमं राम
सर्वतो तिरथैः स्थितैः सात्यकिश्चाभिमन्युश्च धृष्टद्युम्नवृकोदरौ परिरक्षंति राजर्षे यमौ च मनुजेश्वरं महेंद्रस्य सहपाश्चया
मोमहाशाले दृवो द्रुतः एवमर्छत्यनीकानि द्वितीय इव फाल्गुनः उत्तमास्त्राणि गाधत्वगृहीत्वान्य महद्धनुः पश्य गोयाहि राजान १६९

मानुषैरेवसत्यसंधोमहारथः अथवादेवतैःपार्थसर्वशस्त्रास्त्रपारगः त्वांतुचक्राहरंप्राप्यदुग्धोघो
रेणचक्षुषा एवमुक्तोमहाराजःप्रत्युवाचजनार्द्दनं तवप्रसादाद्विजयःक्रोधात्तवपराजयः त्वंहिनःश
रणंकृष्णभक्तानामभयंकरः अनाश्चर्योजयस्तेषांयेषांत्वमसिकेशव रक्षितासमरेनित्यंनित्यंचा
पिहितेरतः सर्वथात्वंसमासाद्यनाश्चर्यमितिमेमतिः एवमुक्तःप्रत्युवाचस्मयमानोजनार्द्दनः
नान्येनैनयुक्तरूपंवचनंपार्थवोत्तम इतिश्रीमहाभारतेभीष्मपर्वणिदशमेयुद्धदिवसे संजय
उवाच व्युष्टायांमहाराजरजन्यांसर्वपार्थिवाः पांडवाधार्त्तराष्ट्राश्चप्रतिजग्मुःपितामहं तंवीरश
यनेवीरंशयानंकुरुसत्तमं अभिवाद्योपतस्थुर्वैक्षत्रियाःक्षत्रियर्षभं कन्याश्चंदनचूर्णैश्चला
जैर्माल्यैश्चसर्वशः स्त्रियोबालास्तथावृद्धाःप्रेक्षकाश्चपृथग्जनाः समभ्ययुःशांतनवंभूतानीव
तमोनुदं तूर्याणिगणिकावारास्तथैवनटनर्त्तकाः उपनृत्यंजगुश्चैववृद्धंकुरुपितामहं उपार
म्यदयुद्धेभ्यःसन्नाहान्विप्रमुच्यच आयुधानिचनिक्षिप्यसहिताःकुरुपांडवाः अन्वासतदुराध
र्षंदेवव्रतमरिंदमं अन्योन्यंप्रीतिमंतस्तेयथापूर्वंयथावयः सापार्थिवशताकीर्णासमितिर्भीष्म
शोभिता शुशुभेभारतीदीप्तादिवीवादित्यमंडलं विबभौचनृपाणांसापितामहमुपासतां देवाना
मिवदेवेशंपितामहमुपासतां भीष्मस्तुवेदनांधैर्यान्निगृह्यभरतर्षभ अभितप्तःशरैश्चैव

भीष्म.
१८६

नातिहृष्टमनाब्रवीत् शराभिन्नप्रकायोहं शरसंतापमूर्छितः भक्ष्यानुच्चावचांस्तत्र वारिकुंभांश्च
शीतलान् उपनीतं च ततः स भीष्मः शांतनवोब्रवीत् नाद्यतात मया शक्यं भोगान्कांचन मानुषान्
उपभोक्तुं मनुष्येभ्यः शरशय्यागतोह्यहं प्रतीक्षमाणस्तिष्टामि विवृत्तिं शशिसूर्ययोः एवमुक्त्वा शां
तनवो दीनवाक्सर्वपार्थिवान् धनंजयं महाबाहुमभ्यभाषत भारत अथोपेत्य महाबाहुः अभि
वाद्य पितामहं अतिष्टत्प्रांजलिः प्रह्वः किं करोमीति चाब्रवीत् तं दृष्ट्वा पाण्डवं राजन्नभिवाद्य तु
स्थितं अभ्यभाषत धर्मात्मा भीष्मः प्रेक्ष्य धनंजयं दह्यते दः शरीरं मे संस्यूतोस्मि महेषुभिः म
र्माणि परिदूयंते वदनं मम शुष्यति ह्लादनार्थं शरीरस्य प्रयच्छापो ममार्जुन त्वं हि शक्तो महेष्वा
स दातुमंभो यथाविधि अर्जुनस्तु तथेत्युक्त्वा रथमारुह्य वेगवान् अधिज्यं बलवत्कृत्वा गांडी
वं व्याक्षिपद्धनुः तस्य ज्यातलनिर्घोषं विस्फूर्जितमिवाशनेः वित्रेसुः सर्वभूतानि श्रुत्वा सर्वे च पा
र्थिवाः ततः प्रदक्षिणी कृत्वा रथेन रथिनां वरः शयानं भरतश्रेष्ठं सर्वशास्त्रभृतां वरं संधाय च
शरं दीप्तमभिमंत्र्य महायशाः पर्जन्यास्त्रेण संयुज्य सर्वलोकस्य पश्यतः अविध्यत पृथिवीं पार्थः पा
र्श्वे भीष्मस्य दक्षिणे उत्पपात ततो धारा विमला वारिणः शिवा दिव्यस्यामृतकल्पस्य दिव्यगंधर
सस्य च अतर्पयत्ततः पार्थः शीतया वारिधारया भीष्मः कुरूणामृषभं दिव्यकर्मपराक्रमः ।

राम
१८६

कर्मणानेन पार्थस्य शक्रस्येव विकुर्वतः विस्मयं परमं जग्मुस्तत्र ते वसुधाधिपाः तत्कर्म प्रेक्ष्य वी
भत्सुरतिमानुषमद्भुतं संत्रासवेपनं कुरवो गावः शीतार्दिता इव विस्मयाश्चोत्तरीयाणि विधुन्व
न्सर्वतो नृपाः शंखदुंदुभिनिर्घोषैस्तुमुलं सर्वतोभवत् ततः शांतनवश्चैव राजन्वीभत्सुमब्र
वीत् सर्वपार्थिववीराणां सन्निधौ फल्गुनं प्रिय नैतच्चित्रं महाबाहो त्वयि कौरवनंदन कथितो ना
रदेनैव पूर्वर्षिरमितद्युतिः वासुदेवसहायस्त्वं महत्कर्म करिष्यसि यत्नोत्सहति देवेंद्रः सु
ह देवैरपि ध्रुवं विदुस्त्वां निधनं पार्थ सर्वक्षत्रस्य तद्विदः धनुर्द्धराणामेकस्त्वं पृथिव्यां प्रवरो नृ
पैः मनुष्या जगति श्रेष्ठाः पक्षिणां गरुडो वरः सरसां सागरः श्रेष्ठो गौश्चतुष्पदां आदित्यस्ते
जसां श्रेष्ठो गिरीणां हिमवान्वरः जातीनां ब्राह्मणः श्रेष्ठः श्रेष्ठस्त्वमसि धन्विनां नवैश्रुतं धा
र्तराष्ट्रेण वाक्यं संबोध्यमानं विदुरेण चैव द्रोणेन रामेण जनार्द्दनेन मुहुर्मुः संजयनापि चोक्तं परीत
बुद्धिर्हि विसंज्ञकल्पो दुर्योधनो नाभ्यनंदद्वचो मे संश्रोष्यसे वनिहतान्श्चिराय शस्त्राग्निगो भीमबलाभि
भूतः ततः श्रुत्वा तद्वचः कौरवेंद्रो दुर्योधनो दीनमना बभूव तमब्रवीच्छांतनवो भिवीक्ष्य निबोध
राजन्नबवीत मन्युः दृष्टं दुर्योधनेदं यथा पार्थेन धीमता जलस्य धारा जनिता शीतस्यामृत गं

भीष्म. धिनः एतस्यकीर्त्तिर्लोकेस्मिन्नान्याकिंचनविद्यते आग्नेयं वारुणं सौम्यं वायव्यमथवैष्णवं ऐंद्रं
१८७ पाशुपतंब्राह्मंपारमेष्ठं प्रजापतिं [illegible] कृष्ण सवितुर्दिव्यान्यस्त्राणि सर्वशः सर्वस्मिन्मानषेलोकेवेत्त्य
कोन्यः धनंजयः कृष्णोवादेवकीपुत्रो [illegible] वेदकश्चन नशक्यः पांडवास्तात युधाजेतुंकथंचन अमानुषा
णि कर्माणि तस्यैतानिमहात्मनः [illegible] नासंख्ये [illegible] एणाहवशोभिना कृतिनासमरेराजन्संधिस्तेनात
युज्यतां यावद्धर्मं नतेशेषां पार्थः [illegible] भिः नाशयत्यर्जुनस्तात तावत्संधिंप्रयोजय नानिर्दहतिते
यावत्क्रोधदीप्तेक्षणस्तम् युधिष्ठिरो [illegible] संधिस्तेतातयुज्यतां नकुलःसहदेवश्च भीमसेनश्च पांडवः
यावच्चमूंमहाराजनाशयंतिनसं[illegible] तावत्ते पांडवैः सार्द्धं सौभ्रात्रंतातरोचतां युद्धंमदंतमेवास्तु तात न
शंसास्यपांडवैः एतत्ते रोचतांवाक्यं [illegible] नराधिप एतत्क्षमंमहंमन्येतवस्यैवकुलस्यच त्यक्त्वामन्युं
मुपपद्यस्वपार्थैः पर्याप्तमेतद्य [illegible] फाल्गुनेन भीष्मस्यांतादस्तुवःसौहृदंवासंप्रश्लेषः साधुराजन्प्रसी
द [illegible] शेषं दीयतांपांडवानामिंद्रप्रस्थं धर्मराजोनुशास्तु मामित्रध्रुक्पार्थिवानां जघन्यः पापांकीर्त्तिंप्रा
प्स्यसे [illegible] नरेंद्र ममावसानाच्छांतिरस्तु प्रजानां संगच्छंतां पार्थिवाःप्रीतिमंतः पितापुत्रंमातुलंभागिनेयो
भ्राताचैवभ्रातरंप्रैतुराट् नचेदेवंप्राप्तकालंवचोमेमोहाविष्टः प्रतिपत्स्यसबुद्ध्या भीष्मस्यांतादेवदन्त्रा
प्स्यसर्वेसत्यामेतांभारतीमीरयामि एतद्वाक्यंसौहृदादापगेयोमध्येराज्ञांतेसुतंश्रावयित्वा तूष्णी
मासीच्छल्यसंतप्तमर्मात्यात्मानंवेदनांसन्निगृह्य इतिश्रीमहाभारतेभीष्मपर्वणि संजयउवाच
राम ८

ततस्ते पार्थिवाः सर्वे जग्मुः स्वानालयान्पुनः तूष्णींभूते महाराज भीष्मे शंतनुनंदने श्रुत्वा तु निहतं भीष्मं
राधेयः पुरुषर्षभः ईषदागतसंत्रासस्त्वरयोपजगाम ह स ददर्श महात्मानं शरतल्पगतं तदा जन्मशय्या
गतं देवं कार्त्तिकेयमिव प्रभुं निमीलिताक्षं तं वीरं साश्रुकंठस्तदा वृषः अभ्येत्य पादयोस्तस्य निपपात महा
द्युतिः राधेयोहं कुरुश्रेष्ठ नित्यं चाक्षिगतस्तव द्वेष्योत्यंतमनागाः सन्निति चैनमुवाच ह तच्छ्रुत्वा कु
रुवृद्धः सबलात्संवृतलोचनः शनैरुद्वीक्ष्य सस्नेहमिदं वचनमब्रवीत् रहितं धिष्ण्यमालोक्य समुत्सार्य च
रक्षिणः पितेव पुत्रं गांगेयः परिष्वज्यैकबाहुना एह्येहि मे विप्रतीप स्पर्द्धसे त्वं मया सह यदि त्वं नाभि
गच्छेथा न ते श्रेयो भवेद्ध्रुवं कौंतेयस्त्वं न राधेयो न तवाधिरथः पिता सूर्यजस्त्वं महाबाहो विदितो ना
रदान्मम कृष्णद्वैपायनाच्चैव केशवाच्च न संशयः न च द्वेषोस्ति मे तात त्वयि सत्यं ब्रवीमि ते तेजोवधनि
मित्तं तु परुषाण्यहमुक्तवान् अकस्मात्पांडवान्हि त्वं द्विषसीति मतिर्मम येनासि बहुशो रूक्षं चोदितः
सूर्यनंदनः जानामि समरे वीर्यं शत्रुभिर्दुःसहं तव ब्रह्मण्यतां च शौर्यं च दाने च परमां गतिं न त्वया सदृशः
कश्चित्पुरुषेष्वमरोपम कुलभेदं च मत्वाहं सदा परुषमुक्तवान् इष्वस्त्रे भारसंधाने लाघवेस्त्रबले त
था सदृशः फाल्गुनेनासि कृष्णेन च महात्मना कर्ण राजपुरं गत्वा त्वयैकेन धनुष्मता तस्यार्थे कुरुराज
स्य राजानो मर्दिता युधि तथा च बलवान्राजा जरासंधो दुरासदः समरे समरश्लाघी त्वया न सदृशोभ
वत् ब्रह्मण्यः सत्यवादी च तेजसार्क इवापरः देवगर्भोजितः संख्ये मनुष्यैरधिको भुवि व्यपनीतोद्य मन्यु

भीष्म॰ र्मेयस्त्वां पुनः पुरा कृतः दैवं पुरुषकारेण न शक्यमनिवर्त्तितुं सोदर्याः पांडवा वीरा भ्रातरस्तेरिसूदन संग
१८८ छेतान्महावाहो मम चेदिछसि प्रियं मयाभवतु निर्वृत्तं वैरमादित्यनंदन पृथिव्यां सर्वराजानो भवंत्वद्य निरा
मयः कर्ण उवाच जानाम्यहं महाप्राज्ञ सर्वमेतन्न संशयः अपकीर्णस्त्वहं कुंत्या सूतेन च विवर्द्धितः भुंक्त्वा
भिष्मा॰ दुर्योधनैश्वर्यं न कर्त्तुमुत्सहे वसु चैव शरीरं च पुत्रदारं तथा यशः सर्वं मे दुर्योधनस्यार्थे त्यक्तं मे भूरि द
क्षिणाः तथा दुर्योधनस्यार्थे वीरमार्गनिषेवणात् कोपिताः पांडवा नित्यं मयाश्रित्य सुयोधनं अवश्यभावी
वै योर्थो न स शक्यो निवर्त्तितुं दैवं पुरुषकारेण को निवर्त्तितुमुत्सहे पृथिवीक्षयशंसीनि निमित्तानि
पितामह भवद्भिरुपलब्धानि कथितानि च संसदि पांडवाः वासुदेवश्च विदिता मम सर्वशः अजेयाः पुरु
षैरन्यैरिति तांश्चोत्सहामहे विजयिष्ये रणे पांडूनिति मे निश्चलं मनः धनंजय उत्सहे तस्य धाम प्री
तिमानसः अनुजानीष्व मां तात युद्धे प्रीतमनाः सदा अनुज्ञातस्त्वया वीर युद्ध्यामेति या मतिः दु
रुक्तं विप्रतीपं च प्रभावाच्चापलात्तथा यन्मया पकृतं किंचित्तन्मे क्षंतुमर्हसि भीष्म उवाच नमेद्वेषो
मयोस्त्वत्र तु वैरमेतत्सुदारुणं अनुजानामि कर्ण त्वां युध्यस्व स्वर्गकाम्यया निर्मन्युर्गतसंरंभः कुरु कर्म हि राम
षास्मिहि यथाशक्ति यथोत्साहं सतां वृत्तेषु वृत्तवान् अहं त्वामनुजानामि यदिच्छसि तदाप्नुहि क्षत्र १८८

धर्माद्धितात्स्वर्गमवाप्स्यसिनसंशयः यथा...निरहंकारोबलवीर्यव्यपाश्रयः धर्मोरियुद्धाद्दधिकः
क्षत्रियाणांनविद्यते इत्थमेह कृतंतत्तत्स्तु...रात्सुमहत्मया नचैनंशक्यतेकर्तुंयतोधर्मस्ततोजयः
इत्युक्त्वातिगांगेयमभिवंद्यप्रमाद्यच राधेयोरथमास्थाययायात्तत्रवसुतप्रति यइदंश्रणुयात्सम्य
ग्भीष्मपर्वनरोत्तमः वांछितंफलमाप्नोतिविष्णुलोकेमहीयते अश्वमेधसहस्त्राणिवाजपेयश
तानिच क्रियमाणेनयत्पुण्यंतत्पुण्यंलभतेनरः वाचकंपूजयेत्तस्मागवस्त्रदूर्व्यादिभिस्तथा वाच
केप्रीतिमापन्नेप्रीताःस्युःसर्वदेवताः तस्मात्तुवाचकंसम्यक्पूजयेद्विष्णुरूपिणं इतिश्रीमहा
भारतेशतसाहस्र्यांसंहितायांवैयासिक्यांभीष्मपर्वसमाप्तम् शुभमस्तु श्रीकृष्णायनमः श्रीरस्तु
संवत् १८६१ माघेमासेकृष्णपक्षेस...म्यांभौमवासरे श्रीधरःशिवसहायव्यलिखद्भीष्मपर्वच॥ ॥ ॥ ॥